अनभीप्सितम्

डॉ० प्रशस्यमित्रः शास्त्री

5.2

अनभीप्सितम्

(अभिनवचिन्तनात्मकं सामयिकं संस्कृतकथाकदम्बकम्)

लेखकः
डॉ० प्रशस्यमित्रः शास्त्री
प्राध्यापक, संस्कृत-विभाग
फिरोज गांधी स्नातकोत्तर कालेज
रायबरेली-(उ०प्र०)

अक्षयवट प्रकाशन
इलाहाबाद

अनभीप्सितम्
(अभिनवचिन्तनात्मकं सामयिकं संस्कृतकथाकदम्बकम्)

- लेखकः :
  डॉ० प्रशस्यमित्रः शास्त्री

- प्रथमं संस्करणम् : २००७
- मूल्यम् : शतद्वयं रूप्यकं
- प्रकाशक :
  अक्षयवट प्रकाशन
  २६, बलरामपुर हाउस
  इलाहाबाद-२११००२
- मुद्रक :
  दूबे प्रिन्टर्स एण्ड ग्राफिक्स
  ५० अ, बलरामपुर हाउस
  इलाहाबाद-२११००२

ANABHEEPSITAM

(A Selection of Modern Sanskrit Stories)

Author

Dr. Prashasya Mitra Shastri

Lecturer, Sanskrit Department

Feroze Gandhi P.G. College

Raibareli-(U.P.)

Akshayavata Prakashan

Allahabad

ANABHEEPSITAM
(A Selection of Modern Sanskrit Stories)

- **Author**
  Dr. Prashasya Mitra Shastri

- **First Edition : 2007**
- **Price : Rs. two hundred**
- **Published By :**
  Akshayavata Prakashan
  26, Balrampur House
  Allahabad-211002
- **Printed At :**
  Dubey Printers & Graphics
  50 A,Balrampur House
  Allahabad-211002

पुरोवाक्

संस्कृतभाषायां गद्यलेखनस्य प्रवृत्तिः पद्यलेखनस्याऽपेक्षया प्रायशः कश्चिदल्पीयसी एव प्राप्यते। तत्राऽपि कथालेखनं अङ्गुलिगण्या लेखका एव विदधति। तत्राऽपि नवसामयिकसन्दर्भान् आधुनिकसमस्याश्चाऽधिकृत्य कथालेखनं न्यूनतरम् एव दृश्यते।

अन्यभारतीयभाषासु कथालेखनस्य कार्यं व्यापकरूपेण प्राप्यते। संस्कृतभाषायां पद्यलेखनं तु पुराकालादेव पर्याप्तं समुन्नतमासीत् परन्तु गद्यकाव्यलेखने प्रायशो लेखकास्तथाविधम् उत्साहं न दर्शयन्ति।

तत्सर्वं निरीक्ष्यैव विगतवर्षेषु मम संस्कृतकथाप्रणयने विशिष्टाऽभिरुचिः प्रवृत्तिश्च समुद्भूता। परिणामतः मम द्वौ कथासंग्रहौ १९९४ ईशवीयाऽब्दे "अनाघ्रातं पुष्पम्" अथ च २००१ ईशवीयाब्दे "आषाढस्य प्रथमदिवसे" इति नामधेयेन प्रकाशितौ बभूवतुः। तत्र प्रथमः कथासंग्रहस्तु दिल्ली-संस्कृत-अकादमी द्वारा "गोस्वामी गिरिधारी लाल पुरस्कारेण" सभाजितः। द्वितीयोऽपि कथासंग्रहः "राजस्थान-संस्कृत अकादमी" द्वारा स्वीय-सर्वोच्च-पुरस्कारेण पुरस्कृतः। एतयो र्द्वयोरपि कथासंग्रहयोः प्रकाशने दिल्लीस्थ राष्ट्रिय-संस्कृत-संस्थानस्य वित्तीयं साहाय्यमुल्लेखनीयमासीत्।

अधुना सहृदयानां संस्कृतपाठकानाम् अभिरुचिं निरीक्ष्य पुनः ममेदं तृतीयं कथासंकलनम् "अनभीप्सितम्" इति नामधेयेन प्रकाश्यते।

एतस्मिन् कथा-संग्रहे द्वादश कथाः संगृहीता वर्त्तन्ते। एतासु कथासु मानवमानसस्य यत् सूक्ष्मतरं गहनं च चिन्तनं वर्त्तते तत्सर्वं निपुणतया निर्वर्ण्य वर्त्तमान-परिस्थिति-जन्यं संघर्षं च प्रस्तुत्य जीवने विद्यमानानां समस्यानां समुद्योतकानां प्रभावाऽनुभवानां च यथशक्यं सहजं चित्रणम् उपस्थापयितुं मया विशिष्टः प्रयासः कृतो वर्त्तते।

तत्र प्रथमे कथानके स्वर्गीयस्य पत्युः पावनस्मृत्यां स्वकीयं सर्वस्वं त्यक्तवत्याः युवत्याः मानसिकस्थितेः सबलं चित्रणं प्रस्तुतम्। द्वितीयकथायां पूर्वदूषितमनोवृत्तिं परित्यज्य पश्चात् सुधारं प्राप्तवतो युवकस्य सात्त्विकतायाः परिचयनिरूपणं कृतम्। तृतीयकथायां पाश्चात्त्यजीवनशैल्याः अपेक्षा भारतीया जीवनशैली गौरवास्पदेति प्रतिपादितम्। एतस्याः कथायाः नामधेयेनैव कथासंग्रहस्य नामधेयम् "अनभीप्सितम्" इति कृतम्।

चतुर्थी कथा विदेशे कार्यरतानां युवकानां जीवनव्यस्ततां निरूप्य परिवारम्प्रति तेषाम् असामञ्जस्यं प्रदर्शयति। "अनपेक्षितम्" इति नामधेया पञ्चमी कथा आधुनिकयुगीनस्य मानवस्य द्वैधं जीवनं निरूपयति। षष्ठे कथानके युवकयोः विभिन्नां मनोवृत्तिं निरूप्य जीवनमूल्यानां स्थापना सबलं निरूपिता।

सप्तम्यां नवम्याम् एकादश्यां च कथायां परिवारस्थानां वृद्धजनानाम् उपेक्षाभावं निरूप्य तेषां मनःस्थितीनां सजीवं चित्रणं प्रस्तुतम्। अशम्यां दाम्यां च कथायां परिस्थितिवशीभूतायाः नार्याः मनोवृत्तेः निरूपणं प्रकृतम्। अन्तिमायां द्वादश्यां कथायां तु साम्प्रतिके एकान्ततमये जीवनेऽपि सामाजिकम् उत्तरदायित्वम् आवश्यकमिति निरूप्य युवत्याः पश्चात्तापभावना सुदृढं प्रस्तुता।

मन्ये सहृदयाः संस्कृतपाठकाः एताः कथाः समधीत्य एतदनुभविष्यति यत् संस्कृत-कथालेखका अपि अन्यभाषाणां कथालेखकानाम् अपेक्षया कथमपि न्यूनाः हीनाः वा न वर्त्तन्ते। एताः कथाः अधीत्य यदि तथाविधोऽनुभवः प्राप्यते तदा निश्चितमेवाऽहमपि स्वकीयम्प्रयासमेनं फलीभूतं मंस्ये।

एष कथासंग्रहोऽपि राष्ट्रियसंस्कृतसंस्थानद्वारा प्रदत्तेनार्थिक-साहाय्येन प्रकाश्यते। तदर्थं संस्थानस्याधिकारिणः प्रति धन्यवादमहं विज्ञापयामि।

पुस्तकस्य मुद्रणे प्रकाशनादिव्यवस्थायां च अक्षयवट-प्रकाशनस्य प्रबन्धकेन श्री सत्यव्रतमिश्रेण यः सहयोगः प्रदत्तस्तदर्थमहं तं प्रति विशिष्टां कृतज्ञतां प्रकटयामि।

रक्षाबन्धनम् (संस्कृतदिवसः)
श्रावणी पूर्णिमा
९ अगस्त, २००६ ई०

डा० प्रशस्यमित्रः शास्त्री
बी-२९, आनन्द नगर, रायबरेली
मोबाइल-०९४५१०७४१२३

***

प्रास्ताविकं किञ्चित्

शास्त्रिणं प्रशस्यमित्रं द्वित्रेभ्यो दशकेभ्योऽहं जाने। पूर्वमस्य लेखन्या उत्प्रासापर-पर्याय-'हास्यव्यङ्ग्य' संवलितानि पद्यानि लघुलघूनि श्रुतिपथमागतानि, यत्र तत्र प्रवर्तमानासु काव्यगोष्ठीषु। सामान्यानां श्रोतॄणां सहृदयानाञ्चास्य रचनाविषयं यात्किञ्चिदाकर्षणमप्यनुभवगोचरतां गतम्। प्राचीनेऽपि संस्कृतसाहित्ये प्रवृत्ति-रियमुपलभ्यते, परं काश्चिद् रचनाः अपवादस्वरूपाः परित्यज्य,प्राचीनासु रचनासु हासजननमेव रचनाकाराणां प्रधानं लक्ष्यमनुभूयते। शूद्रकस्य पादताडितके भाणे पद्यमिदं लभ्यते-

न प्राप्नुवन्ति यतयो रुदिते न मोक्षं नैवायतिञ्च परिहासकथा रुणद्धि।
तस्मात् प्रतीतमनसा हसितव्यमेव वृत्तिं बुधेन खलु कौरुकुचीं विहाय।।

(केयं खलु कौरुकुची वृत्तिरिति जिज्ञासायां चक्रधरस्य 'न्यायमञ्जरी ग्रन्थिभङ्गिमा' गता टिप्पणीयमुद्घियते-"कुरुकुची लोकवञ्चनार्थं क्षान्तिमाधार्यते दम्भरूपा")

परिहासस्य शोभना परिभाषा प्रस्तुता, आचार्यैः गोवर्द्धनैः 'आर्यसप्तशत्याम्'-

अन्यमुखे दुर्वादो यः प्रियवदने स एव परिहासः।
इतरेन्धनजन्मा यो धूमः सोऽगुरुभवो धूपः।।

अस्तु, दृष्टिसम्पन्नैः कैश्चिद् रचनाकारैः स्वसमयस्य समाजमधिष्ठिता विसङ्गतयः प्रवाहमयोभिर्वाचोयुक्तिभिः प्रस्तुताः। परं, स्वातन्त्र्योत्तरकाले विशंतिशतकस्यान्त्येषु वर्षेषु ये हास्य-व्यङ्ग्यकारा लेखकाः ख्यातिमधिगतवन्तस्तेषु प्रशस्यमित्र शास्त्री परिगणयितुं शक्यते। तस्य 'हास्य-व्यङ्ग्य' संवलितासु कृतिषु हास-विलासः (१९८६) नर्मदा (१९९७) च स्मृतिमागच्छतः।

विगतायाः शताब्द्या अन्त्ये दशके शास्त्रिणा प्रशस्यमित्रेण संस्कृते लघुकथानां लेखनं प्रारब्धम्। अस्य 'अनाघ्रातं पुष्पम्' इत्याख्यो लघुकथानां सङ्ग्रहः १९९४ खिष्टाब्दे प्रकाशितः। 'आषाढस्य प्रथमदिवसे' इत्याख्योऽपि सङ्ग्रहः प्रकाशित इति श्रुतवानस्मि। समाजस्य विविधेषु क्षेत्रेषु व्याप्तां विषमतां जीवनक्षेत्रे च प्रत्यहमुपचीयमानाः विसङ्गतीः ध्यायं ध्यायं नैकैः संस्कृतरचनाकारैः लघुकथाः सम्प्रस्तुताः। प्रवर्तमाने सम-सामयिके संस्कृत-साहित्यक्षेत्रे श्री राजेन्द्रमिश्राः श्री कलानाथ शास्त्रिणः, श्री केशवचन्द्रदाशाः, श्री प्रभुनाथ द्विवेदिनः, श्री वनमाली विश्वालाः, श्री नारायण दासाश्च स्मृतिपथमायान्ति।

अयञ्च प्रसन्नताया विषयो यत् प्रशस्यमित्रशास्त्रिणस्तृतीयो लघुकथा-सङ्ग्रहः 'अनभीप्सितम्' इति नाम्ना प्रकाशमायातीति। एतद्गतं लघुकथाद्वयम्, 'अमृताः

स्मृतिः' 'अनभीप्सितम्' इति मयाऽऽकलितम्। आदितः अन्तं यावत् कथानकस्य सम्प्रस्तुतौ पाठकानामौत्सुक्यं संरक्षितुं प्रयतितं श्री शास्त्रिणा। अपि च, लेखकस्यास्य दृष्टिः समाजस्य सूक्ष्मेक्षिकया निरीक्षणे जागरूका प्रतिभाति। प्रसङ्गेऽस्मिन् पूर्वपठितानां शास्त्रिणो लघुकथानां यत्किञ्चिदालोचनमपि मदीयं कर्तव्यमस्ति परं, कार्यमिदं सदसद्विचारनिपुणेषु पाठकेष्वायत्तमिमि न किञ्चिदुच्यते।

संस्कृतसाहित्यस्य समसामयिकस्य लेखकेषु जीवनस्य प्रवर्तमानस्य सूक्ष्म-दृष्ट्याऽऽकलनं, उपयुक्तया च वाचोयुक्त्या प्रवाहमय्या च शैल्या प्रस्तुतीकरणम् इत्यादयो गुणा अध्येतुं प्रवृत्तस्य कस्यापि हृदि मन्ये स्फुटीभवन्ति। प्रशस्यमित्रस्य एका लघीयसी लघु-कथा 'उच्चं पदम्' इति नाम्ना नवदिल्लीस्थ साहित्य अकादेम्या प्रकाशिते लघुकथानां सङ्ग्रहे सम्पादकेन सङ्गृहीता इत्यपि लेखकस्यास्य लघुकथाकारत्वेन मान्यत्वस्य प्रमाणम्। भाषायामस्य लेखकस्य कुत्रचित् पाणिनीयव्याकरणमर्यादाया उल्लङ्घनं दृष्टिपथमायाति, क्वचित् वाक्यानां प्रवाहमयत्वमपि बाधितमिव प्रतीयते। सत्यप्येवं शास्त्रिणः प्रशस्यमित्रस्य इमाः कथाः पाठकान् अवश्यमाक्रष्टुं प्रभावितांश्च कर्त्तुं समर्था इति शक्यमभिधातुम्।

०९.०७.२००६

जगन्नाथ पाठकः
(राष्ट्रपतिपुरस्कृतः, साहित्य अकादमी-
वाचस्पति पुरस्कारसम्मानितश्च)

***

कथानुक्रमः

***

नवकथा-कथनै-रपराजितम्,
रसिक-मानस-तोषसमादृतम्।
बुधजनैरसकृत् परिशीलितम्,
जयति काव्यमिदं ह्यनभीप्सितम्।।

(द्रुतविलम्बितम्)

लिप्सां सदा जनयते त्वनभीप्सितं मे,
लोके विचित्रचरितं परिचेतुकामम्।
एतासु संस्कृतकथास्ववगाहमानः,
आनन्दमेष्यति सुसंस्कृत-पाठकोऽयम्।।

(वसन्ततिलकावृत्तम्)

संसारे परितो भवन्ति घटनाः संवीक्ष्य ताः सूक्ष्मतः,
स्वार्थाऽऽसक्त-समाज-चिन्तनविधिं चाऽऽलक्ष्य लोके भृशम्।
नानाभाव-विचार-सार-सरसं सम्मोद-सन्दायकम्,
काव्यं स्यादनभीप्सितं कविजनैर्मन्ये स्वतः स्वीकृतम्।।

(शार्दूलविक्रीडितम्)

अमृता स्मृतिः

जूनमासस्य तप्तमये मध्याह्ने गृहकार्यं निष्पाद्य अत्यन्तं परिश्रान्ता अहं यदा विद्युद्व्यजनं शीतकारकं (रूम कूलर) संचाल्य पर्यङ्के समुपविष्टवती तदा द्वारस्थितायाः विद्युद्घटिकायाः कर्कशध्वनिना क्षोभः सञ्जातः। क्षणानन्तरमेव सा घटिका यदा पौनःपुन्येन शब्दायमाना जाता तदा क्षुब्धहृदया यथाकथञ्चित् उत्थाय द्वारम् उद्घाटयितुं प्रचलिता। इदमपि विचारितवती यत् मन्ये अन्यस्मात् नगरात् कश्चिद् बन्धुः समायातः भवेत्।

परन्तु यदा आतपचाकचिक्यं ग्रीष्मकालस्य तप्तमयं च वातावरणं सहमाना द्वारम् उद्घाटितवती तदा समक्षमेव तत्र नारीद्वयं समुपस्थितम् आसीत्। तयोः हस्तेषु एकं रजिस्टरपत्रकं, लेखनी, कानिचित् पत्राणि च विराजन्ते स्म। सरोषं तयोः आपाद-मस्तकं निरीक्षणं विधाय यदा किमपि वक्तुम् ऐच्छम् तदैव न जाने कथं तयोः दुरवस्थां मुखमालिन्यं विवशताभावं च संधाय मम रोषः अस्तंगतः।

तयोः शरीरवर्णोऽपि मन्ये आतपकारणादेव श्यामलतायुक्तः समभवत्। मस्तके निदाघजन्याः स्वेदबिन्दवः, वस्त्राण्यपि अधिकांशतः स्वेदक्लिन्नानि, ओष्ठाश्च, शुष्काः आसन्।

यस्मात् कारणात् मम कोपः प्रकटनात् पूर्वमेव प्रशान्तोऽभवत्, तत्र सर्वाधिका भूमिका तयोः नयनानाम् एव बभूव। क्षमायाचनाभावः समुद्विग्नता विवशता च तयोः नयनेषु प्रकटिता भवति स्म। मन्ये तयोः मनसि स्वत एव एषा अनुभूतिः समुत्पद्यते स्म यत् तयोः तत्र आगमनं नितान्तम् असामयिकं वर्तते।

द्वारदेशस्थिता अहं ते पृष्टवती-'कथयतां भवत्यौ .....किम् इच्छतः अत्र?" इति।

पूर्वं तु मम रूक्षां मुखाकृतिं विलोक्य तयोः किमपि वक्तुं (मन्ये) साहसमेव नाऽभवत्, परन्तु मम वाचम् आकर्ण्य तयोः साहसं समागतम्। तयोः अन्यतरा या किञ्चित् प्रौढा बभूव सा माधुर्यमिश्रेण स्वरेण स्वहस्ते विद्यमानानि टिकटपत्रकाणि मम अभिमुखं प्रकुर्वती एवम् अवादीत्-"वयं कैन्सररोगपीडितानां सहायतार्थम् एषां पत्रकाणां विक्रयणं कुर्मः। एकस्य पत्रकस्य मूल्यं विंशतिः रूप्यकाणि। यदि भवती कानिचित् पत्रकाणि क्रीणीयात् तर्हि महती कृपा भवेत्। अथ च पत्रकक्रेतॄणां कृते लाटरीद्वारा केचन पुरस्काराः अपि घोषिताः भविष्यन्ति। एतत्पुण्यकर्मणे भवत्या एव कश्चित् पुरस्कारो निःसरेत्। एतत् सर्वं कार्यक्रमजातम् एकस्मिन् विशिष्टे समारोहे सम्पत्स्यते। तत्र भवत्याः आगमनमपि कामयामहे" इति।

तदनन्तरं सा द्वितीया महिला या किल काचित् अभिरूपतरा प्रथमायाः अपेक्षया

अल्पवयस्का दुर्बला च आसीत् सा अस्याः साहाय्यं कुर्वती प्रोवाच–"मन्ये अस्मिन् पुण्यमये कर्मणि भवती अवश्यमेव भागं ग्रहीष्यति। नैवात्र अस्मदीयः कश्चित् व्यक्तिगतः स्वार्थः। वयं केवलं लोकसेवाभावनया एव एतेषां विक्रयणं कुर्मः।"

तस्याः शब्दोच्चारणप्रयत्नः अतिशयविनम्रतायुक्तः आसीत्। अहम् इदमपि अनुभूतवती यत् सा मम चक्षुषोः साम्मुख्यं न कामयते। अत एव तस्याः दृष्टिक्षेपः किञ्चित् इतस्ततः इव प्रवर्तते। न जाने तत् कथम्! मन्ये तस्याः क्षमायाचनायाः एवंविधः कश्चित् प्रकारः एव स्यात्, अस्तु।

"क्षणद्वयम् अत्रैव स्थीयताम्। अहं रूप्यकाणि समानीय आगच्छामि"–इत्युक्त्वा अहं गृहाभ्यन्तरे प्रविष्टवती। प्रवेशसमये च विचारितवती यत् किं ते तावत्पर्यन्तं गृहद्वारि आतपे एव स्थास्यतः? किं ते बहिः प्रकोष्ठे समुपवेश्य शीतलजलादिभिः सत्कर्तव्ये? परन्तु पुनर्मम स्वार्थमयं चिन्तनं प्रबलीभूतं येन मया विचारितं यत् व्यर्थमेव एतस्मिन् सर्वस्मिन् औपचारिककर्मकाण्डे समयस्य हानिः भवेत् अतः ते शीघ्रमेव इतः प्रस्थापयितव्ये।

यदा अहं रूप्यकाणि नीत्वा समागतवती तदा दृष्टवती यत् ते उभे अपि आशापूर्णाभ्यां नयनाभ्यां मम प्रासादात् कतिपयपददूरस्थम् अग्रिमं प्रासादं प्रेक्षमाणे तिष्ठतः। प्रायः ते अनुमानं कुरुतः स्म यत् तत्र प्रासादं गत्वा कियन्ति पत्रकाणि विक्रेतुं शक्यानि। अहं शतं रूप्यकाणि प्रदाय प्रोक्तवती–"कृपया पञ्च पत्रकाणि प्रदेयानि" इति।

ते मह्यं पत्रकाणि प्रदाय धन्यवादं च ज्ञापयित्वा यदा पुरतः गन्तुं समुद्यते तदैव सा कृशकाया दुर्बलदेहयष्टिः द्वितीया महिला प्रथमं वारं मां नेत्रोत्थापनपुरःसरं निपुणं निरीक्ष्य मन्दस्वरेण प्रोक्तवती–"भगवान् भूतनाथः भवत्यै बहुभद्रम् एतदर्थं करिष्यति"।

यद्यपि सा क्षणपर्यन्तमेव माम् अवलोकितवती परन्तु अहं तु यथा तस्याः नयनयोः सम्मोहने समाकृष्टा सती तत्रैव स्थिरगतिः सञ्जाता। अहं बहु व्यग्रताभावेन विचारितवती यत् तस्याः नयनयोः किम् एवंविधं वस्तुजातं वर्तते? कथं तां निरीक्ष्य मम मनसि व्याकुलता समुदेति? यथा कश्चित् शान्तसलिले सरसि प्रस्तरं प्रक्षिपेत्।

सा प्रस्थानं कुर्वती पुनरेव मदभिमुखं भूत्वा निपुणतया मां विलोकितवती। पुनः किञ्चित् व्यग्रभावेन उद्विग्नमानसेन भीतदृष्ट्या वा त्वरितमेव स्वकीयदृष्टिक्षेपम् अन्यत्र कृतवती। परन्तु नयनानाम् इदानीन्तनेन संघर्षेण यथा सर्वं रहस्यं समुद्घाटितम् अभवत्। विद्युत् चमत्कृतेनेव एकं विस्मृतं चित्रं मम हृदयाकाशे चलायमानं समभवत्। "अरे! त्वम् .....? पद्मजे! ओह! पद्मजे? इति चीत्कारस्वरेण समाह्वयन्ती धावन्ती च अहं ताम् अनुगतवती।

सा स्वकीयसहचारिण्या महिलया समं तीव्रं प्रचलन्ती पर्याप्तं दूरं गतवती। परन्तु यदा सा माम् आत्मानम् अनुगच्छन्तीं विलोकितवती तदा रुद्धगतिका भूत्वा व्यग्रमानसेन स्वहस्तं परस्परं संयोज्य मर्दितवती। प्रतीयते यथा यस्य सम्भावना आसीत् तदेव अनभिमतं संवृत्तम्।

"पद्मजे! किं भवती मां न पर्यचिनोत्? अहं तस्याः समीपं गत्वा दीर्घनिःश्वासं प्रक्षिपन्ती प्रोवाच। "अहं सुमनोलता ..... भवत्याः कक्षा-सहचरी।"

"अहं तु भवतीं प्रथमदर्शने एव पर्यचिनवम्!" पद्मजा मन्दस्वरेण प्रोक्तवती- "परन्तु भवती एव मां नैव पर्यचिनोत्। मम विचारेण इदं मत्कृते सुखकरमेव बभूव। अहं तु तदर्थं भगवते धन्यवादमेव प्रकटयामि स्म, परन्तु ....." सा स्वकीयं वाक्यम् अपूर्णमेव कृतवती।

"मदीयः कः अपराधः .....? किं वा मया तथाविधम् आचरितं येन भवती इच्छति यत् अहं भवतीं न परिचिनुयाम्?" अहं दुःखाहता प्रोक्तवती।

"नहि भोः! नहि" सा हस्तम् उत्थाप्य निवारयन्ती इव प्रत्युवाच-"नाहं संसारस्य केनापि प्राणिना समं विद्वेषं धारयामि। अहं तु स्वकीयं भाग्यमपि नैव निन्दामि। एवमेव अहं त्वदीये सौख्ययुक्ते शान्तजीवने किमपि चिन्तासमन्वितं झञ्झावातं समुत्पादयितुं न ऐच्छम्।"

तस्याः भावविन्यासः निराशाद्योतकः कष्टप्रदश्च अभवत्। परन्तु तस्याः मनोभावानां प्रकटीकरणस्य प्रकारः तथैव प्रतिभासते स्म यथा विद्यार्थिजीवनकाले बभूव। तथैव दुराग्रहपूर्णः स्वभावः, उद्दण्डताद्योतिका जीवनशैली, स्वाभिमानसमन्वितं चिन्तनं च स्पष्टमेव परिलक्ष्यन्ते स्म। तस्याः शरीरस्य गौरांगतायाः स्थाने श्यामलता समारूढा। तस्या कौशेयमयानां शिरोरुहाणां चमत्कृतिस्थाने विकटा रूक्षता प्रादुर्भूता। रसमयौ ओष्ठौ अपि शुष्कौ। करयोः उपरि स्नायुतन्त्रीजालं स्पष्टतया प्रकटीभूतम्। परन्तु तस्याः जीवनशैली तथैव आसीत् यथा मया अध्ययनवेलायां दृष्टा। तदेव गाम्भीर्यम् ..... स एव उपेक्षाभावः .....सैव स्वाभिमानिता ..... तथैव संघर्षप्रवृत्तिः।

"पद्मजे! किं तव संवृत्तम्! आयाहि, मया समं गृहं समायाहि .....। अहं सर्वं ज्ञातुं कामये" इति वदन्ती अहं तस्याः कृशं करं स्वकीयपाणौ संगृह्य स्वगृहाभिमुखं समाकर्ष्टुं प्रयतितवती।

सा स्वकीयं करं मोचितवती। पूर्वापेक्षया सहृदयताधिक्यं प्रदर्शयन्ती प्रोक्तवती- "सुमनोलते! साम्प्रतं तु अहम् अत्यन्तं व्यस्ता भवामि। समारोहस्य आयोजने नितरां निमग्ना अस्मि। मया तव गृहं दृष्टमेव। पुनः कदाचित् अवकाशक्षणेषु समागत्य वार्त्तां करिष्यामि।"

"अस्तु भवती स्वकीयं गृहसंकेतं ददातु। येन यदि भवती स्ववचनं विस्मरेत् तदा अहमेव सम्पर्कं साधयेयम्"-अहं पुनः तस्याः करं स्वपाणौ संयोज्य प्रत्युक्तवती।

मम वाचं निशम्य पद्मजा स्वकीयचर्मस्यूततः एकं पत्रं निःसार्य ममाभिमुखं कुर्वती प्रोक्तवती-"अयमेव मम कार्यालयस्य स्थानसंकेतः। अत्र दूरभाषसंख्यापि वर्तते।"

अहं तत्पत्रं दृष्टवती। तत् कस्यचित् कैन्सर–एसोसिएशन–कार्यालयस्य संकेतपत्रम् आसीत्। तत्र सा स्वकीयं नामधेयं लेखन्या एव विलिख्य मह्यं प्रदत्तवती। मया च तत् पत्रं किमपि अमूल्यवस्तुजातमिव सुरक्षितं कृतम्। अहं किञ्चिदन्यदपि तां प्रष्टुमिच्छामि स्म, परन्तु पद्मजा सत्वरमेव स्वकीयसहयोगिन्याः हस्तं गृहीत्वा तीव्रचरणैः ततः प्रस्थितवती।

अहं हतप्रभेव तयोः ततः प्रस्थानं विलोकयन्ती स्थिता। ते उभे अपि मम दृष्टितः दूरं गते। अहमपि अनन्यमनस्का सती गृहं प्रत्यागतवती। गृहं च प्रविश्य शयनकक्षे महार्घयुक्ते पर्यङ्के स्वशरीरं प्रक्षिप्तवती। मम चक्षुषोः पुरतः छात्रजीवनकालस्य स्मृतीनां प्रतिच्छायाः व्यक्ताऽव्यक्तरूपेण नरीनृत्यन्त्यः प्रतिभासितुं प्रारब्धाः।

० ० ०

अहं स्मरामि, पद्मजा अस्माकं कक्षायाः प्रतिभाशालिनी लोकप्रिया च छात्रा बभूव। सर्वासां प्राध्यापिकानां छात्राणां च दृष्टिकेन्द्रं सैव भवति स्म। तस्य कारणं नेदम् आसीत् यत् सा अतिशयधनाढ्यस्य सुता। अथवा सर्वाभ्यः छात्राभ्यः विशिष्टप्रतिभासम्पन्ना अभूत्, अथवा विश्वविद्यालयस्य सर्वेषु कार्यक्रमेषु अग्रिमा भवति स्म। एवंविधास्तु अन्याः अपि छात्राः तत्र अभूवन्। परन्तु पद्मजा ताभ्यः विलक्षणा एव। तस्याः व्यक्तित्वमेव किमपि विलक्षणत्वं भजते स्म।

पद्मजा धनाढ्यस्य पितुः सुता बभूव परन्तु तस्याः परिधानानि नितान्तं साधारणानि भवन्ति स्म। सामान्यच्छात्रा इव सा विश्वविद्यालयं बसयानेन रिक्शायानेन वा समागच्छति स्म यद्यपि तस्याः गृहे चत्वारि कारयानानि बभूवुः सा कदाचिदपि स्वपितुः नामधेयस्य उपयोगं कस्यचिदपि स्वकार्यस्य सिद्ध्यर्थं न कुरुते स्म। केवलं सा स्वयोग्यता–कुशलताबलेन एव स्वकीयं जीवनं प्रगतिपथे कामयते स्म।

पद्मजा प्रायः कथयति स्म–"स्वजनकस्य समृद्धिकारणात् सामर्थ्यकारणाद् वा किमपि प्राप्तुम् अनुचितम्। वंशपरम्परायाः प्रभाववलयस्य समुल्लेखः हीनताद्योतकः भवति। तत्र स्वोपार्जितयोग्यताकारणात् भवान् किं प्राप्तुं शक्नोतीति वास्तविकं जीवनम्। येषु स्वाभिमानः न भवति ये वा योग्यता–विहीनाः भवन्ति ते एव स्ववंशस्य जनकस्य तेषां सामर्थ्यस्य वा समाश्रयं गृह्णन्ति।"

वस्तुतः तादृशसामर्थ्यं तु दुर्लभेषु जनेष्वेव भवति। यस्याः गृहे अनेकानि कारयानानि भवेयुः सा रिक्षाद्वारा बसयानद्वारा वा विश्वविद्यालयं समागच्छेत्, यस्याः जनकस्य वस्त्रनिर्माण–कार्यशालायां निर्यातगुणवत्तायुक्तं वस्त्रं निर्मितं स्यात् सा 'खादी' वस्त्रं परिधाय विश्वविद्यालयं समागच्छेत् इति तु अस्माकं सर्वेषां कृते सुमहत् आश्चर्यकरमेव बभूव।

पद्मजा प्रायशः कथयति स्म–"मानवेन जीवनार्थं कापि स्वकीया विशिष्टा दृष्टिः

ग्रहीतव्या। तस्य केनचित् निजेन विचारेण भवितव्यम्। जीवनस्य केनचित् प्रयोजनेन भाव्यम्। कश्चित् कार्यक्रमः भवेत्। इदं तु किमपि नास्ति यत् भवता जीवनं प्राप्तं, किमपि पठितं, लिखितं, विवाहः कृतः, सुताः समुत्पादिताः, पुनः कस्मिंश्चिद् दिवसे स्वर्गं प्रस्थितः। संसारेण तु इदमेव न ज्ञातं यद् भवान् कदा समुत्पन्नः, किं कृतवान्, क्व गतवान्, कदा च संसारमिमं परित्यज्य स्वर्गं प्राप्तवान् इति। अथ च भवतः संसारस्य कृते किं योगदानं वर्तते? इति चिन्तयतु ....." इत्यादि।

परन्तु एकदा विश्वविद्यालये मया श्रुतं यत् पद्मजा कस्यचित् पुरुषस्य प्रेमपाशे निबद्धा बभूव। एष वृत्तान्तस्तु अश्चर्यकरः आसीत्। मया तु विचारितम् आसीत् यत् पद्मजातुल्यानां बालिकानां कृते प्रेमकल्पनाः पूर्णरूपेण अवास्तविक्यः भविष्यन्ति। एतादृशीनां हृदये प्रेमावेगानां रसमयमनोभावानां वा किमपि स्थानमेव न वर्तते। एतादृश्यः बालिकास्तु भावानाविहीनाः कल्पनालोकविरहिताः दार्शनिकदृष्टिसम्पन्नाः यर्थार्थजीवनशैलीचिन्तनप्रधानाः एव भवन्ति। नाहं मन्ये स्म यद् एवंविधाः प्राणिनः एकं वास्तविकं संसारं विहाय अपरस्मिन् कस्मिंश्चिद् द्वितीये कल्पनामये संसारे अकस्मादेव प्रविष्टाः भविष्यन्ति। परन्तु अत्र तु इदमेव संवृत्तमासीत्।

यद्यपि कस्याश्चित् केनचित् समं प्रणयकृत्यम् असम्भाव्यं घटनाजातं तु न भवति, परन्तु मम मनसि अयं भावः आसीत् यत् पद्मजायाः प्रेमकृत्यं यदि केनापि समं प्रवृत्तं वर्तते तदा तत्र केनचित् तर्कविशेषेण प्रयोजनविशेषेण उद्देश्यविशेषेण वा भवितव्यमेव। परन्तु पद्मजायाः किं दर्शनमत्र कार्यशीलं वर्तते इति अस्मिन् विषये तु मम अनुभवः ज्ञानं च नकारात्मकम् एव बभूव।

मम विचारेण तु सर्वमेतत् तस्याः प्रणयकृत्यं अकस्मादेव प्रादुर्भूतं झञ्झा-वातसदृशमेव आसीत्। पूर्णतया बुद्धिहीनं, तर्कविहीनं, विचारहीनं, लैला-मजनूसदृशम्।

तस्याः प्रेमी प्रकाशचन्द्रः अस्माकं विश्वविद्यालयस्य छात्रोपि नाभूत्। सः विश्वविद्यालयस्य समीपस्थे राष्ट्रियचित्रकला-महाविद्यालये अन्तिमवर्षस्य छात्रः आसीत्। यद्यपि सः यदा तदा विश्वविद्यालयस्य परिसरे दृष्टिपथम् आगच्छति स्म परन्तु न मया ज्ञातमासीत् यत् कस्मात् स यत्र तत्र विलोक्यते स्म। अधुना मया शनैः-शनैः सर्वम् ऊहितमेव।

प्रकाशचन्द्रोऽपि विचित्रः कश्चिद् अद्भुतः एव प्राणी प्रतीयते स्म। कदाचित् तस्य मुखमण्डलं दीर्घश्मश्रुयुक्तं दृश्यते स्म, कदाचित् लघुश्मश्रुयुक्तं भवति स्म। कदाचित् 'बीडी'पाननिमग्नः कदाचित् च सिगरेटपाननिरतः। तस्य परिधानमपि विचित्रमेव बभूव। कदाचित् ऊरूकेण (पायजामा) समं 'कुरता' वस्त्र' धारयति स्म। कदाचित् 'जीन्स' वस्त्रेण समं बुश-शर्टवस्त्रं धारयति। कदाचित् 'धोतीवस्त्रेण' समं 'टीशर्ट'वस्त्रम्। कदाचित् पादरक्षां (चप्पलं) कदाचिच्च पादत्राणं (उपानहौ)

धारयति स्म। अहं तु इदं ज्ञातुं नितराम् असमर्था आसम् यत् प्रकाशचन्द्रे किं तथाविधं वैशिष्ट्यं पद्मजा परिलक्षितवती यद्वा किम् अनितरसाधारणत्वं विलोकितवती यत् तस्मिन्नेव आत्मानं समर्पितवती।

प्रकाशचन्द्रः कस्यचित् समृद्धस्य परिवारस्य सदस्योऽपि नैव प्रतीयते स्म। विश्वविद्यालये एव चर्चाप्रसंगे कश्चित् माम् अब्रवीत् यत् तस्य पिता एकः साधारणः छायाचित्राकर्षकः (फोटोग्राफर) वर्तते। जनाः सत्यमेव कथयन्ति यत् 'प्रेम पूर्णतया अन्धं भवति' इति। पद्मजा-प्रकाशचन्द्रौ विलोक्य एषा लोकोक्तिः सत्यमेव प्रतीयते स्म। अस्तु, विश्वविद्यालयस्य वार्षिकपरीक्षानन्तरं वयं सर्वे स्व-स्वगृहे एव समाविष्टा। विश्वविद्यालयः एव अस्माकं सर्वेषां सम्मेलनकेन्द्रम् आसीत् यत्र वयं सर्वे परस्परं मिलामः स्म, चर्चां प्रचर्चां व कुर्महे स्म। परन्तु परीक्षासमाप्तिसमकालमेव विश्वविद्यालये गमनागमनं तत्र मेलनादिकमपि स्वत एव समाप्तम्। एवम् अस्माकं समस्तं सम्पर्क-सूत्रमपि समाप्तिम् अगात्।

एकदा अस्माकम् एका सखी कदाचित् सहसा पथि दृष्टिपथम् आगता। तस्याः गृहं पद्मजायाः गृहस्य निकटे एव। वार्तालापप्रसंगे तया एव कथितं यत् पद्मजा-प्रकाशचन्द्रौ परस्परं वैवाहिकसूत्रे उपनिबद्धौ सञ्जातौ। यद्यपि पद्मजायाः माता, पिता, भ्राता, स्वसा इत्यादिषु बन्धुषु कश्चिदपि तेन समं विवाहस्य पक्षे नाऽभूत्, परन्तु सा सर्वेषां सहमतिं तिरस्कृत्य सर्वेषां विरोधं च अपरिगणय्य प्रकाशचन्द्रेण सह एव विवाहं कृतवती। फलतः तस्याः मातापितरौ तया समं सर्वथैव सम्बद्धविच्छेदम् उद्घोषितवन्तौ। जनकेन तु स्पष्टमेव उक्तं यत् तस्य चलाचलसम्पत्तौ कथमपि कश्चिदपि भागः पद्मजाया नैव भविष्यति, न च स तस्याः मुखमपि आजीवनं द्रष्टुं कामयते।

सखीद्वारा श्रावितं पद्मजासम्बद्धम् एतं सर्वं वृत्तान्तम् आकर्ण्य अहं बहुदिनपर्यन्तम् औदासीन्यपूर्णा बभूव। वारं वारं मम समक्षं पद्मजायाः एव मुखाकृतिः नृत्यति स्म। प्रणयकृत्यं कथं कमपि व्यावहारिकबुद्धिशून्यं करोति इति तु मादृश्याः कल्पनातः अपि परतः आसीत्। अहं मुहुर्मुहुः तदानीम् इदमेव विचारयामि स्म यत् न जाने पद्मजा-प्रकाशचन्द्रौ कस्यां परिस्थित्यां भविष्यतः!

यदि च सः प्रकाशचन्द्रः स्वकीय-अभिभावकानाम् आश्रये एव जीवति तदा न जाने तयोः का दशा भवेत्? यदि च पद्मजायाः श्वशुरौ जीवतस्तदा तयोः व्यवहारः पद्मजां प्रति कथं भवेत् .....?

एतन्मध्ये एव ममापि विवाहः संवृत्तः। विवाहानन्तरम् अहं दिल्लीनगरं विहाय मुम्बईनगरं समागतवती। तत्र च स्वकीयगार्हस्थ्यजीवने पूर्णतया व्यस्ता संजाता। अत्र च मम आर्थिकी स्थितिरपि परिवर्तिता। सुखसुविधानां प्रवाहे वर्तमानपरिस्थितिपारवश्ये

च सर्वं भूतकालं विस्मृतमिव सञ्जातम्। सर्वासां सखीनां सहाध्यायिनीनां च स्मृतिरपि विलुप्ता इव। परन्तु अद्य यदा पञ्चदशवर्षाऽनन्तरं पद्मजां दृष्टवती तदा स्मृतीनां मेघमण्डलं झञ्झावातेन समं मम मानसाकाशे सवेगं प्रादुर्भूतम्।

० ० ०

अधुना अहम् अधिकं प्रतीक्षां कर्तुम् असमर्था आसम्। अपरस्मिन्नेव दिवसे अहं स्वकीयकारयानेन सायं चतुर्वादने पद्मजाप्रदत्तं संकेतम् अनुसरन्ती तस्याः कार्यालयं गतवती। कार्यालयस्य द्वारे कश्चित् किंकरः तस्याः नामधेयं श्रुत्वा मां पद्मजायाः कक्षे प्रापयत्। मया दृष्टं यत् सा स्वकीये कार्ये गहनरूपेण निमग्ना वर्तते। तस्याः समक्षं रजिस्टर्पत्राणां समूहः विराजते स्म। मां विलोक्य सा विस्मयान्विता सञ्जाता। ईषत्स्मितिपूर्वकं मम स्वागतं कुर्वाणा आसन्दिकां निर्दिशन्ती सा प्राह–"अहो! अद्यैव समागता? अत्र तिष्ठतु भवती .....।"

"नाहम् अत्र स्थातुं समागता। अहं त्वां स्वगृहं नेतुं समागता"–अहं प्रत्युवाच "सायंकाले मम अत्र आगमनस्य इदमेव प्रयोजनं यत् कार्यालयसमयसमाप्तौ अवकाशः स्यात् तव आगमनं च मया समं सुनिश्चितं भवेत्। अहं किमपि ब्याजं न श्रोतुमिच्छामि।"

"परन्तु कार्यालयावकाशानन्तरम् अहं स्वकीयमित्रेण समं क्षेत्रकार्यार्थं गन्तुं कामये। तस्य कार्यक्रमस्य दिवसः निकटस्थः एव वर्तते यदर्थं वयं टिकटविक्रयमाध्यमेन धनसंग्रहकर्मणि व्यापृताः स्म"–पद्मजा प्राह।

"अहं किमपि न श्रोष्यामि"–अहं पद्मजायाः वचनं निशम्य मध्ये एव निर्णयात्मकेन स्वरेण प्रोक्तवती–"अहं त्वाम् अद्य इतः स्वगृहं नेतुं समागता। यदि एतदर्थं तवाऽत्र विभागस्य कस्यचिद् उच्चाधिकारिणः निदेशकस्य वा कृते सूचना दातव्या भवेत् तर्हि तत्र गत्वा वदिष्यामि।"

"नहि, तदर्थं तु त्वया कश्चिदपि न वक्तव्यः"–सा प्रोक्तवती "अत्र तु द्वारपालात् आरभ्य निदेशकपर्यन्तं सर्वे एव जनाः मम अभिलाषं सत्कुर्वन्ति। यदि क्वचिदहं यदा कदाचिदपि गन्तुं कामये यदा तत्र गन्तुं शक्नोमि। परन्तु अहं स्वयमेव स्वकीयम् अधिकतमं समयं कार्यव्यापृता भूत्वा एव यापयितुं कामये"।

"अस्तु, अद्य कश्चित् समयः मदर्थं दातव्यःएव"–इत्युक्त्वा अहं तस्याः करं संगृह्य तां समुत्थापितवती। सा सुदीर्घं निःश्वस्य स्वकीयं कार्यालयकर्मचारिणं किमपि आवश्यकं निर्दिश्य मया समं चलितुं समुद्यता बभूव।

गृहं प्राप्य च सा मम सज्जायुक्ते स्वागतकक्षे समुपविश्य मदाग्रहपरवशा शीतलं पेयं पीत्वा विनैव कामपि भूमिकां माम् अब्रवीत्–"अहं जानामि यत् त्वं मया मेलितुं कथम् एतावतीं समुत्सुकतां प्रकटयसि। त्वं मम सकलं वृतान्तम् इमां च अवस्थामेव तु ज्ञातुमिच्छसि? नाहं त्वां निराशां करिष्यामि। अहं स्वयमेव कयाचित् समं निःसंकोचं

हार्दं वार्तां कर्त्तुम् इच्छामि स्म। बहूनि दिनानि व्यतीतानि, परन्तु न कदाचित् एवंविधा सखी मिलितवती यया समं निःसंकोचम् औपचारिकताविहीनं वार्तालापं कृत्वा आत्मनः हृदयस्य भावावेगं शान्तं कुर्याम्"।

सा चक्षुषी निमील्य परिश्रान्तपूरितया मनोभावनया स्वललाटं पीडयतुं प्रारब्धवती। अहं तु पूर्णतया शान्ता तूष्णीम् अभवम्। न जाने कथं मम हृदयगतिः तीव्रा प्रतीयते स्म। कतिचित् क्षणानन्तरं यदा पद्मजा स्वचक्षुषी उन्मीलितवती तदा तस्याः दृष्टिः न ममाभिमुखं बभूव। किञ्चित् अदृश्यं वस्तुजातं घूर्णयन्तीव एव सा वक्तुम् प्रारब्धवती– "अहं त्वां सकलं घटनाक्रमं प्रारम्भतः एव वदामि। अहं सर्वेषां विरोधं तिरस्कृत्य प्रकाशचन्द्रेण समं विवाहं कृतवती। मम विचारः एषः आसीत् यत् वंशपरम्परया प्राप्तस्य वस्तुनः उपरि कथं गर्वं वहामि? विशिष्टता तु तदा स्यात् यदा स्वस्मिन् शक्तिः क्षमता च भवेताम्। केवलम् अतिसमृद्धयोः पित्रोः आत्मजात्वं तु न काचित् योग्यता। प्रकाशचन्द्रस्य चिन्तनमपि तथाविधमेव आसीत्। तस्य व्यक्तित्वमपि सामान्यं न अभवत्। तस्य विचारधारापि क्षुद्रा नाऽऽसीत्। तस्य चिन्तनं मह्यं विशिष्टं प्रतीयते स्म।"

पद्मजा दीर्घं निःश्वस्य पुनः वक्तुं प्रारभत–"प्रत्येकं प्रेमिकायै स्वकीयः प्रेमी विशिष्टगुणोपेतः असाधारणः योग्यतासम्पन्नः अनुपमेयः एव प्रतीयते। यद्यपि अन्ये जनाः प्रकाशचन्द्रस्य विषये किमपि विशिष्टं न मन्यन्ते स्म, परन्तु मम विचारे न जाने कथं छात्रजीवनकाले एव इयं भावना दृढीभूता यत् प्रकाशचन्द्रः विशिष्टप्रतिभासम्पन्नः चित्रकारः भविष्यति इति। यदा सः मम गृहे विवाहस्य सन्दर्भे स्वकीयं मन्तव्यं प्रकटितवान् तदा तु तत्र भूकम्पः एव समागतः। पितुः समक्षं विवाहस्य प्रस्तावमपि सः मत्प्रेरणया एव प्रस्तुतवान्। तत्प्रस्तावम् आकर्ण्य मम गृहे सर्वे जनाः तस्य परिहासमिव कुर्वाणाः तं मूर्खमेव अमन्यन्त। वस्तुतः यथा यथा गृहे परिहासः क्रियते स्म तथा तथा तं प्रति मम स्नेहः प्रवर्धिततमाम्। प्रकाशचन्द्रोऽपि तस्यां विषमवेलायां कदाचिदपि हीनभावनया ग्रस्तः नाभवत्। तस्य विवाहप्रस्तावस्य परिणतिं तु अहं पूर्वतः एव जानामि स्म।"

"अस्तु साम्प्रतं नात्र केवलं मम प्रेम्णः एव प्रश्नः आसीत्, परन्तु शनैः–शनैः मम स्वाभिमानस्य प्रश्नः संवृत्तः। अहं स्वगृहस्य प्रत्येकं वस्तुभिः, प्राणिभिः, सम्बन्धिभिः, भावनाभिश्च पूर्णतया वञ्चिता भूत्वा प्रकाशचन्द्रेण समं पुराकृतां सहैव जीवनमरणस्य प्रतिज्ञां पालयन्ती न्यायालयं गत्वा विवाहं कृतवती।

विवाहानन्तरं यदा अहं तस्य गृहं गतवती तदा मया दृष्टं यद् एकस्मिन् अतिसंकीर्णे क्षुद्रपथे तस्य केवलं कक्षद्वयात्मकं गृहं वर्तते। तस्य पिता सद्यः एव दिवंगतः आसीत्। ज्येष्ठभ्राता च तस्मिन्नेव गृहे कर्कशस्वभावया स्वभार्यया समं निवसति स्म। चित्राकर्षणस्य एकमात्रम् आपणम् आयस्य साधनम्। काठिन्येनैव दैनन्दिनस्य निर्वाहः

प्रवर्तते। यद्यपि प्रकाशचन्द्रोऽपि छायाचित्राकर्षणस्य कार्यं यदा कदा करोति स्म विशेषदिवसेषु च भ्रात्रा सममेव आपणे तिष्ठति स्म, परन्तु तस्य मूलप्रवृत्तिः केवलं स्वकीयतूलिकाद्वारा काल्पनिकचित्रनिर्माणे एव अभूत्। वस्तुतः सः प्रखरकल्पनाशीलः मूलतश्च प्रगतिशीलः आधुनिकचित्रनिर्माणकार्यदक्षः आसीत्। आधुनिकचित्रकलायाः समाजे प्रायः उपहासमेव कुर्वन्ति जनाः। ते तानि चित्राणि निरीक्ष्य कथमपि तस्य वास्तविकम् अभिप्रायम् अवगन्तुं न प्रभवन्ति। यद्यपि इयम् आधुनिकचित्रकला सामान्य-जनैः अज्ञेया दुरूहा च परन्तु विज्ञेषु प्रशस्या अपि भवन्ती समाद्रियते।

यदा कदा प्रकाशचन्द्रद्वारा निर्मितानाम् आधुनिकचित्राणां विविधेषु नगरेषु प्रदर्शनी अपि आयोजिता भवति स्म। परन्तु तत्र यद् धनं प्राप्यते स्म तस्य अधिकांशः प्रायः चित्रनिर्माणे, चित्राणाम् इतस्ततः परिवहनव्यये, चित्रालयानां भाटकादिप्रदाने च व्ययीक्रियते स्म। तत्र अल्पीयान् एव लाभः प्राप्यते स्म। एवं दिनानुदिनम् आवयोः जीवनं कठिनतरं जातम्। दैनन्दिनस्य उपभोगसामग्रीणां संयोजने एव समस्ता शक्तिः क्षीयते स्म। काचिद् नियता भृतिरपि अस्माभिः न प्राप्ता येन जीवनं सहजं प्रचलेत्।

एतन्मध्ये एव प्रकाशचन्द्रस्य शरीरस्य पृष्ठभागे पीडा समुद्भूता। तस्य स्वास्थ्यमपि शनैः-शनैः क्षीणत्वं भजते स्म। एकदा आवां कथञ्चिद् धनस्य व्यवस्थां विधाय यदा चिकित्सकस्य पार्श्वे गतवन्तौ तदा तेन सर्वं परीक्षणं विधाय समुद्घोषितं यत् प्रकाशचन्द्रस्य शरीरे कर्कट (कैन्सर) रोगस्य प्रारम्भिकी अवस्था प्रादुर्भवति। 'कैन्सर' नामधेयमेव समाकर्ण्य आवां हतप्रभौ सञ्जातौ। परन्तु चिकित्सकेन एष परामर्शः प्रदत्तः यत् रोगस्य अतिप्रारम्भिकी अवस्था एव वर्तते। नियमितचिकित्साद्वारा औषधसेवनेन च निश्चितमेव तस्य स्वास्थ्यं पूर्णतया समीचीनं भविष्यति।

गृहं समागत्य आवां तां व्ययसाध्यां चिकित्सां प्रारब्धुं विचारं कृतवन्तौ। यदा मनुष्यस्य समीपे साधारणतया क्रियमाणस्य भोजनवस्त्रादेः दैनन्दिनस्य व्ययस्य कृते धनं न भवति तदा त्वमेव ब्रूहि यत् कैन्सरसदृशस्य महारोगस्य उपचारार्थं कुतः महाधनं व्ययीकर्तुं शक्यते?

एतस्मिन्नेव विषमे काले एकदा प्रकाशचन्द्रेण एकस्मिन् समाचारपत्रे विज्ञापनं दृष्टं यत् 'विश्वमैत्रीसंघ' नामधेया काचित् अन्ताराष्ट्रियसंस्था एकां चित्रप्रतियोगितां समायोजयति। यस्मिन् प्रथमपुरस्कारः विंशतिलक्षरूप्यकाणां भविष्यति। अन्येऽपि च पञ्च पुरस्काराः पञ्च-पञ्चलक्षरूप्यकाणां सान्त्वनारूपेण प्रदास्यन्ते।

तद्विज्ञापनम् अधीत्य प्रकाशचन्द्रस्य चक्षुषोः चमत्कृतिरिव प्रादुर्भूता। प्रथमपुरस्कारद्वारा पुरस्कृतं चित्रं संयुक्तराष्ट्रसंघस्य विश्वमैत्रीपरिषदः महाधिवेशनावसरे तत्र स्वागतकक्षे स्थापयितव्यम् आसीत्। अतः एव प्रकाशचन्द्रः सोत्साहं तस्यां प्रतियोगितायां भागं ग्रहीतुं निश्चयं कृतवान्। तत्र महद्धनं व्ययार्थम् अपेक्ष्यते स्म।

आवयोः समीपे तावद् धनमपि नाभूत्। अन्ततः येन केन प्रकारेण इतस्ततः सखिभ्यः, विज्ञेभ्यः कलाप्रेमिभ्यश्च अधमर्णस्वरूपं किमपि धनं संगृह्य प्रकाशचन्द्रः एकं विशालं चित्रं निर्मातुं प्रारब्धवान्। तत्र च विशालकायस्य चित्रस्य कृते आधारवस्त्रस्य (कैन्वास)संयोजनवस्तुनः (फ्रेम) तथा च नानारंग-विविध-तूलिकादीनां प्रबन्धव्यवस्थायामेव दशसहस्त्ररूप्यकाणि व्ययीकृतानि। पुनरपि न शक्यते स्म विचारयितुं यत् किमपि पुरस्कारधनं लप्स्यतेऽपि वा न वा। प्रकाशचन्द्रस्य विचारः आसीत् यदि पुरस्कारः प्राप्स्यते तदैव सः रोगस्य उपचारं कर्तुं प्रारप्स्यते।

यदा पञ्चविंशतिदिवसानां घोरपरिश्रमेण सा चित्राकृतिः सम्पूर्णतां गता तदा तां विशालां चित्राकृतिं समुत्थाप्य प्रतियोगितास्थले प्रापणमपि महत् कठिनतमं कार्यं प्रतीयते स्म। अन्ततः कथञ्चित् एकस्मिन् लघुट्रकयाने समारोह्य सा चित्राकृतिः विदेशीयदूतावासकार्यालयं प्रापिता। तत्रापि सहस्त्ररूप्यकाणां व्ययः सञ्जातः। इतः आवयोः दैनन्दिनी व्ययव्यवस्था नितरां निम्नतमा जायते स्म। चिकित्सकश्च तत्क्षणं चिकित्सालयप्रवेशार्थम् उपदिष्टवान्। धनाभाववशात् वयं तत्कालं प्रवेशयितुम् असमर्थाः निराशाभावसम्पन्नाः गृहे समागतवन्तः। अग्रिमे दिवसे च चित्रप्रतियोगितायाः पुरस्कारस्य घोषणा च प्रतीक्षणीया आसीत्।"

तदनन्तरं पद्मजा शून्ये विलोकयन्ती दीर्घं श्वासं निःसार्यं सोफासनस्य पार्श्वभागे स्वशिरः स्थापितवती। तस्याः दृष्टिः न जाने कुत्र आसीत्। तस्याः तूष्णीम्भावं शान्तिं च विलोक्य अहं विचलिता व्यग्रमनस्का च सञ्जाता।

अहं तस्याः मौनं समापयितुं प्रोवाच-"मन्ये पुरस्कारस्तु प्रकाशचन्द्रेणैव प्राप्तः स्यात्?"

"एवं, तत्तु सत्यम्"-पद्मजा माम् अवलोकयन्ती अव्यवस्थितचित्ता अग्रे अवदत्- "तत्र निर्णायकमण्डले वैदेशिकाः निर्णायकाः अपि आसन्। तेषां मतं प्रकाशचन्द्रस्यैव पक्षे अभवत्। बहुमतद्वारा निर्धारितः प्रथमः पुरस्कारः प्रकाशचन्द्रस्यैव पक्षे समुद्घोषितः। साम्प्रतमपि विश्वमैत्रीकक्षस्य विशालभित्तिकायां तस्यैव चित्रं शोभां प्रवर्धयते।"

"पुनः किं त्वया तस्य उपचारः चिकित्सालये कारितः?" अहं व्यग्रभावेन अग्रे पृष्टवती।

"नहि"-इत्युच्चारणसमकालमेव तस्याः कपोले अश्रूणि आसन्। "यस्मिन् दिवसे प्रातः समाचारपत्रेषु पुरस्काराणां घोषणा मुद्रिता तस्यां निशायामेव प्रकाशचन्द्रः दिवंगतः।" पद्मजा महादुःखमिश्रितेन भावेन रुद्धस्वरेण च प्रोवाच। तस्याः वचनम् आकर्ण्य मम हृद्गतिः तदानीं रुद्धेव सञ्जाता।

बहुकालपर्यन्तं तु तत्र नाहं किमपि वक्तुं प्राभवम्। अनवरतं पद्मजामेव

विलेकयन्ती स्थिता, या खलु तदानीं मम गृहे सोफासने प्रस्तरमूर्तिरिव विराजते स्म। अश्रूणां प्रवाहः तस्याः नयनाभ्यां निरन्तरं निःसरन् कपोलयोः समागच्छन् सोफासनस्य वस्त्रेषु निलीयते स्म।

"प्रकाशचन्द्रस्य निधनानन्तरं मम पिता मां स्वगृहं नेतुं तत्र समागतवान्। परन्तु अहं सबलं तत् न स्वीकृतवती"। पद्मजा किञ्चित् स्वाभिमानमुद्राम् आध्याय आत्मानं संयम्य पुनः वक्तुं प्रारब्धवती-"अहं पितरम् उक्तवती यत् अहं केवलं स्वमनोवाञ्छितेन पुरुषेण सममेव विवाहं कृतवती। केनापि समं तु न पलायितवती? यां पद्मजा ते स्वहृदयस्य खण्डम् उद्घोषयन्ति स्म तामेव हृदयशकलं समुच्छिद्य ते प्रक्षिप्तवन्तः। एतं वृत्तान्तमपि ज्ञातुं न प्रयत्नं कृतवन्तः यद् अहं विवाहानन्तरं कस्यां परिस्थित्यां भवामि? अधुना मम स्वगृहनयनस्य का आवश्यकता? यदा अहं स्वजनकस्य छायां विना तथाविधं दारुणं समयं सोढुं समर्था अभूवम् तदा शेषं जीवनमपि यापयितुं शक्नोमि।"पद्मजा किञ्चिद् विरम्य पुनरेवं प्रोवाच-"अहं विंशतिलक्षरूप्यकाणां पुरस्कारस्य समस्तं धनराशिं कैन्सररोगसंस्थानाय अनुदानरूपेण प्रदत्तवती।"

"किऽऽऽम्?" मम मुखं महाविस्मयसमन्वितं समुद्घाटितम् इव बभूव। सा अश्रुपूर्णाभ्यां नयनाभ्यां मां विलोक्य तथैव ईषद् विहसितवती यथा कश्चिद् उदारहृदयः वृद्धः कमपि मन्दबुद्धिं बालकं विलोक्य विहसति।

"एवम्, मया तत् सम्पूर्णं धनं कैन्सरसंस्थानाय अनुदानरूपेण प्रदत्तम्" सा पुनरेवं प्रोच्य अग्रे अवादीत्-"अहं च केवलं द्विसहस्त्ररूप्यकाणां मासिकीं भृतिं स्वीकरोमि। अहं तु इमानि द्विसहस्त्ररूप्यकाणि अपि ग्रहीतुं नैव वाञ्छामि स्म, परन्तु एवं विचार्य स्वीकृतवती यत् जीवितव्यं वर्तते एव। आत्मनः शरीरेण समं सम्बन्धार्थं केचन अन्नग्रासास्तु अपेक्षिताः एव। अन्यथा तु अहं विना भृतिमपि कार्यं कर्तुं कामये स्म। साम्प्रतं तु अहम् अहोरात्रं कैन्सरग्रस्तानां रोगिणां कृते एव कार्यं करोमि। सम्प्रति मया अनेकलक्षरूप्यकाणि एकत्रीकृतानि। विगतदिवसेषु दिल्लीकार्यालयद्वारा मम कार्यक्षेत्रपरिवर्तनं कारितम्। अत एव अहं दिल्लीनगरं परित्यज्य अत्र समागतवती। सम्भवतः भाग्यम् एव आवयोः परस्परं सम्मेलनं वाञ्छति स्म। एतस्मादेव त्वया समम् अत्र समागमः सञ्जातः।

पुनः सा अश्रूणि प्रोच्छन्ती सोफासनात् उत्तिष्ठन्ती प्रोक्तवती-"अस्तु साम्प्रतम् अहं प्रस्थातुं कामये"।

अहं तु उत्थातुमपि असमर्था अभूवम्। अहं स्वस्थाने निषीदन्ती पद्मजां तथैव पश्यामि स्म यथा सा कस्यचित् पर्वतस्य विशालः उत्तुंगः शिखरः वर्तते, अहं च तत्पर्वतस्यैव काचित् निम्नतमा गहना च परिखा भवामि।

***

गुण्डा गुरुसिंहः

अस्माकमेव आवासक्षेत्रे निवासं कुर्वाणः प्रतिष्ठितनागरिकः श्रीराजकिशोरः स्वकीयसुतायाः पाणिग्रहणं यदा गुण्डोपनाम्ना कुख्यातेन गुरुसिंहेन सह कृतवान् तदा 'बमविस्फोटः' इव सञ्जातः। आवासक्षेत्रस्य प्रत्येकस्मिन् गृहे चर्चासञ्चारस्य झञ्झावातःएव प्रादुर्भूतः। यः कश्चिदपि वृत्तान्तमिमं श्रुतवान् सः राजकिशोरस्य निन्दामेव कुर्वाणः एवम् आह–"राजकिशोरस्तु बुद्धिविहीनः एव संवृत्तः यत् स्वकीयां रूपवतीं सरलस्वभावां कन्यां तथाविधस्य पुरुषस्य हस्ते प्रक्षिप्तवान् यं कश्चिदपि साधुस्वभावं समीचीनं च न मन्यते।"

प्रत्येकं गृहस्य प्राङ्गणे प्रत्येकं मनुष्यस्य जिह्वायां च एतस्य विवाहस्यैव चर्चा प्रवर्तते स्म। सर्वे राजकिशोरं प्रति दुराक्रोशमेव प्रकटयन्ति स्म। तत्र एव निवासं कुर्वती वृद्धा पितृव्या श्यामा प्रतिगृहं गत्वा चीत्कुर्वती इव कथयति स्म– "अहो! दुःखम् .....महद् दुःखम् . . मया तु कदाचिद् विचारितमेव नासीत् यत् मृत्योः पूर्वम् इदमपि द्रष्टव्यं भविष्यति? कष्टम् .....घोरं कष्टम् .....! सा खलु कन्यका या अस्माकमेव पाणिषु लालिता पालिता पल्लविता वर्धिता च राक्षसस्य हस्ते कथं प्रक्षिप्ता? अयं राजकिशोरः प्रमत्तः एव संवृत्तः यत् सः स्वकीयां कोमलाङ्गीं कन्यकां कस्यचित् अपराधस्वभावस्य प्राप्तकारादण्डस्य पुरुषस्य हस्तयोः निक्षिप्तवान्। गुण्डा–गुरुसिंहस्य अस्तित्वमेव अस्मिन् आवासक्षेत्रे जघन्यतमं वर्तते .....!"

श्यामायाः वचनानि समाकर्ण्य महिलानां हृदये तथाविधाः विचाराः एव समुद्भवन्ति स्म यत् ताः अपि राजकिशोरं निन्दन्ति धिक्कुर्वन्ति च। आवासक्षेत्रस्य अन्येऽपि बुद्धिमन्तः प्रतिष्ठिताः सज्जनाश्च राजकिशोरस्य तथाविधेन निर्णयेन दुःखिताः व्यथिताश्च बभूवुः। तस्मिन् आवासक्षेत्रे राजकिशोरः अत्यन्तं प्रतिष्ठितः नागरिकः। सः विनम्रतायाः सज्जनतायाश्च प्रतिमूर्तिः एव बभूव। तस्य विचारस्य मन्त्रणायाश्च सर्वे समादरं कुर्वन्ति स्म। ज्येष्ठैः समं बालकाः अपि तस्य समादरं कुर्वन्ति स्म। सः एकस्यां वित्तीयसंस्थायां कार्यालयाध्यक्षपदे कार्यरतः आसीत्। आवासक्षेत्रे सम्मानितसज्जनरूपेण प्रतिष्ठितः सम्पूजितश्च आसीत्। स्वकीयसौम्यव्यवहारवशात् सः तत्क्षेत्रे विशिष्टं स्थानं वहति स्म। तस्य आर्थिकी स्थितिः यद्यपि बहु सुदृढा नाभूत् तथापि सः सर्वेषां गौरवपात्रं तु आसीदेव।

सदाचरणैः सद्गुणकारणैश्च तस्य परिवारसदस्यान् सर्वे प्रतिवेशिनः आद्रियन्ते स्म। तस्य सन्तानद्वयम्। तत्र पञ्चदशवर्षदेशीयः बालकः सोमदेवः दशमकक्षायाः छात्रः, विंशतिवर्षदेशीया च तस्य ज्येष्ठा भगिनी परमसुन्दरी सुभाषिणी बी०ए०

कक्षायाः छात्रा। तस्याः सौन्दर्यचर्चापि प्रायः तस्मिन् आवासक्षेत्रे प्रवर्तते स्म। सा सदैव लज्जापरिवृता चक्षुषी नीचैः कुर्वती गृहात् निःसृत्य महाविद्यालयं गच्छति स्म। कथमपि च नेत्रयोः साम्मुख्यमपि केनापि कदाचित् तया नैव कृतम्।

गुण्डा-गुरुसिंहस्तु प्राप्तकारादण्डः कृतापराधः सुदृढशरीरः पुरुषः। सः विगतवर्षद्वयात् एतस्मिन् आवासक्षेत्रे एव निवसति स्म। तस्य व्यक्तित्वं प्रभावास्पदमेव। मदमत्तः गजः इव मन्दगतिः, अङ्गारः इव विस्तृतरक्तनयनः, गहनश्मश्रुलः, कपोलस्य एकभागे च विचित्रं व्रणचिन्हम्। एतस्य समग्रस्यैव व्यक्तित्वस्य प्रभावः आसीत् यत् कोऽपि सामान्यः पुरुषः बहुकालपर्यन्तं तस्य साम्मुख्यं कर्तुं न कामयते स्म। मन्ये तस्मादेव संभवतः कश्चित् साधारणः जनः तस्य कमपि विरोधमपि न प्रकटयति स्म।

यद्यपि तस्य नामधेयं तु 'गुरुसिंहः' इत्येव परन्तु सर्वे तं 'गुण्डा' इत्युपनामधेयेन एव सम्बोधयन्ति स्म। यथा योग्यतावशात् बहूनां नामधेयेन समं प्रोफेसर-डाक्टर-कैप्टन-प्रभृतीनि विशेषणानि प्रयुज्यन्ते तथैव तस्य नामधेयेन सममपि परिस्थितिवशात् समयचक्रवशात् वा 'गुण्डा' इति विशेषणं प्रतिबद्धम् आसीत्।

यदा सः अत्र निवासं कर्त्तुं समागतः तदा तु कोऽपि न जानाति स्म यत् कोऽयं वर्तते? कुतः आयातः? किं करोति? इति। तदानीं तु कोऽपि तेन समं कश्चिदपि विशिष्टं व्यवहारं सम्बन्धं वा न स्थापितवान्। न चैव कश्चित् तत्र अवधानमपि दत्तवान्। आवासक्षेत्रस्य अन्तिमे भागे सः एकमेव विस्तृतं कक्षं भाटकरूपेण स्वीकृत्य तत्र निवासं प्रारब्धवान्। प्रातरेव समुत्थाय स स्वगृहात् निःसरति स्म, दिनावसाने च निद्राप्रारम्भसमये निवर्तते स्म। कदाचित् समुद्घाटितस्य गवाक्षस्य भागे आसन्दिकायाम् उपविश्य तूष्णीमेव तिष्ठन् स ततः गमनागमनं कुर्वाणान् जनान् एवमेव निरीक्षते स्म।

आवासक्षेत्रस्य महिलाः बालिकाः कुमार्यश्च स्वगृहस्य उपरि भागे सोपानभागे समारुह्य तिष्ठन्ति स्म, वार्तां च कुर्वन्ति स्म। बहिरङ्गणेषु वीथिकासु वा पर्यटन्ति स्म। परन्तु सः कदाचिदपि तत्र दृष्टिक्षेपं न कुरुते स्म। सः कदाचिदपि एवंविधं व्यवहारं न कृतवान् यत् कश्चिदपि तत्र तर्जनीम् उत्थापयेत्। परन्तु सत्यपि एतस्मिन् सर्वस्मिन् सः सन्दिग्धव्यक्तित्वः पुरुषः आसीत्। यद्यपि कश्चिदपि तं प्रमत्तावस्थायां न विलोकितवान् परन्तु सर्वेषां दृष्टिप्रभावे सः सुरापः प्रतीयते स्म।

राजकिशोरः एव सर्वप्रथमः पुरुषः, यः तेन समं सामञ्जस्यं परिचयं वा स्थापयितुं प्रयत्नं कृतवान्। परिचये स्थापितेऽपि सः तस्य कालातीतं जीवनं चरितं वा ज्ञातुं न समर्थो बभूव। सः केवलम् इदमेव ज्ञातुं समर्थः अभवत् यत् तस्य कश्चिदपि निकटसम्बन्धी न वर्तते। सम्पूर्णतया एकाकी मातृ-पितृ-स्वसृ-भ्रातृविहीनः

उत्तरदायित्वविमुक्तः यथाकथञ्चित् स्वकीय-जीवनयापनाय किमपि स्थायिकार्यम् अन्वेषयन् यत् किञ्चित् सञ्चितं वित्तमासीत् तत्साहाय्येन इतस्ततः अस्थायिनियोजनवृत्ति-माध्यमेन च जीवनं यापयन् निवसति इति।

राजकिशोरानन्तरम् अहमेव तथाविधः पुरुषः यः गुरुसिंहस्य सान्निध्यं प्राप्तवान्। सत्यं तु इदमेव यत् मह्यमपि गुण्डागुरुसिंहः न रोचते, परन्तु राजकिशोरस्यैव सहजस्नेहस्वभाववशादेव तस्य निकटतां प्राप्तवान्। राजकिशोरः न केवलं मत्कृते ज्येष्ठभ्रातृसदृशः आदरणीयः, अपि तु मम घनिष्ठं मित्रमपि। अहं तु तस्य भ्रातृसदृशः एव सन् तस्य समग्रां वार्तां ध्यानपूर्वकं शृणोमि स्म।

कदाचित् गुरुसिंहेन सममपि मम वार्तालापः प्रवर्तते स्म। तस्य वार्ताभिः कश्चिद् विद्रोहस्वरः इव प्रतिभासते स्म। तस्य स्वभावेऽपि तीक्ष्णता आसीत्। तस्य कथनेन प्रतीयते स्म यत् तस्य जीवनं पर्याप्तं झञ्झावातपरिवृतम् आसीत्। सः जीवनस्य नानाविधान् मधुर-कटुपरिपूर्णान् अनुभवान् आस्वाद्य इमाम् अवस्थाम् अधिगतवान्। मन्ये तस्य विगतजीवनकालः सहृदयमनुष्यैः समं यापितः नाभवत्। अतः एव सः विगतजीवनं विस्मृतं विधाय जीवनं नवरूपेण प्रारब्धुमेव इह नगरे समायातः। परन्तु अत्रत्याः मनुष्यास्तु तथाविधाः आसन् येषां कृते कस्यापि जनस्य व्यतीतजीवनकालस्य समुद्घाटने एव रुचिरता मनोरञ्जकता च अनुभूयते। तत्रैव तेषाम् आनन्दः। अतः एव तैः गुण्डागुरुसिंहस्य भूतकालं विस्मर्तुं विस्मारयितुं च कश्चित् प्रयासः एव न कृतः, प्रत्युत तैः सदैव गुरुसिंहस्य भूतकालः बहुशः सबलं सप्रयत्नं च यथावसरं संस्मारितः एव।

आवासक्षेत्रस्य किशोराः नवयुवकाश्च गुरुसिंहेन सह व्यर्थमेव वैरं धारयन्ति स्म। ते तस्य भूतकालस्य जीवनं ज्ञातुं प्रयत्नं कृतवन्तः तत्र च काञ्चित् सफलतामपि सम्प्राप्तवन्तः अतीतस्य कालस्य पृष्ठानि यदा प्रत्यावर्तितानि तदा सः गुरुसिंहः प्राप्तकारादण्डः वर्तते इति विज्ञाय एव घृणाभावं धारयन्तः इव बभूवुः। तदानीमेव तस्य नामधेयेन समं 'गुण्डा' इति विशेषणं संश्लिष्टम् अभवत्।

गुरुसिंहस्य निकटसम्बन्धी कश्चिदपि नाभूत्। राजमार्गेषु पदातिपथेषु च पालितः संवर्धितश्च सः यथाकथञ्चित् परिश्रमं कुर्वाणः बाल्यकालादेव समुचितसंरक्षणस्य अभवात् अध्ययनपराङ्मुखः यथाप्राप्तम् आजीविकावसरं साधयमानः कदाचित् चौर्यादिप्रसङ्गे प्राप्तकारादण्डः साम्प्रतं सप्तविंशतिवर्षदेशीयः 'गुण्डागुरुसिंह' रूपेण ख्यातिं प्राप्य अत्र निवसन् प्रायशः एकाकी मौनवृत्तिसम्पन्नः बहूनां विचारेषु सन्दिग्धचरित्रश्च प्रतीयते स्म।

कतिचिद्दिवसपूर्वं राजकिशोरेण स्वकीये वित्तीयसंस्थाकार्यालये साधारणकर्मचारिरूपेण कार्यं कर्तुं तस्य भृतिरूपात्मिका व्यवस्था अपि कृता।

यद्यपि तदेतत् सर्वम् अत्रत्येभ्यः आवासक्षेत्र निवासिभ्यः न रोचते स्म, तथापि कोऽपि सज्जनं राजकिशोरम् आपत्तिरूपं न प्रोक्तवान्। परन्तु यदा गुण्डागुरुसिंहस्य भूतकालिकस्य जीवनस्य उपरि स्थितायाः जवनिकायाः अपनयनं संवृत्तं तदा सर्वे एव राजकिशोरं वक्तुं प्रारब्धवन्तः यत्–"एषः गुरुसिंहः अपराधमनोवृत्तिस्वभावः भुक्तकारादण्डः सन्दिग्धचरितश्च। स च अस्मदीये आवासक्षेत्रे अत्र निवासं कर्तुम् अर्हतां नैव वहति। अतः एव कृपया भवान् तं स्वकार्यालयोद्योगात् निष्कासयतु, येन सः अस्मदावासक्षेत्रात् निर्गतः भवेत्।"

परन्तु राजकिशोरः जनान् एवम् उत्तरयति स्म–"अरे भ्रातः! नाहमत्र भवतां विचारेण सहमतः। मन्ये गुरुसिंहस्य भूतकालः सन्दिग्धः अपराधयुक्तो वा स्यात्, परन्तु सः साम्प्रतं योग्यनागरिकरूपेण जीवति। यदा अत्र. समागतः ततः प्रभृति तेन किमपि तथाविधम् एवं नैव समाचरितं यत् निन्दनीयं वचनीयं वा स्यात्। अतः कथं भवन्तः सर्वे तं पुनरेव तस्य पुरातने निन्द्यमार्गे गमयितुं कामयन्ते? अहं तु तस्य कार्यालयात् निष्कासनस्य विचारमपि कर्तुं न प्रभवामि। मम विचारस्तु अस्ति यत् कृपया भवन्तः तद्विषये बहुचिन्तिताः न भवन्तु। प्रत्युत सहानुभूतिमिश्रेण भावेन विचारयन्तु येन तस्यापि जीवने परिवर्त्तनं भवेत्, सोऽपि उत्तरदायित्वपूर्ण–नागरिकरूपेण आत्मानं समाजे सुस्थापयेत्।"

आवासक्षेत्रनिवासिनः राजकिशोरस्य विचारान् शृण्वन्ति स्म, परन्तु गुरुसिंहस्य विषये तस्य विचारः तेषां गलात् अधस्तात् न संसरति स्म। शनैः शनैः गुरुसिंहविषये मम विचारः अपि अन्येषां विचारतुल्यः एव सम्भूतः। क्षेत्रनिवासिनः बालकाः गुरुसिंहं विलोक्य तथाविधम् अशोभनं भावं निन्दाशब्दांश्च समुच्चारयन्ति स्म येन तस्य मुखमण्डलं क्रोधात् तप्तताम्रम् इव जायते स्म। परन्तु सः तान् किमपि नैव प्रतिवदति स्म। आननं नीचैः नमयन् सः तेषां पार्श्वतः एव निर्गत्य गृहं प्रविशति स्म।

अहं बालकान् कथयामि स्म यत् "भवन्तः गुरुसिंहेन समं कृपया शान्तभावेन व्यवहरन्तु इति।" परन्तु ते मम परिहासमेव कुर्वाणाः प्रायः कथयन्ति स्म यत् "वयं गुण्डागुरुसिंहम् अस्मात् आवासस्थानात् निष्कास्य एव शान्तिं समधिगच्छामः इति।" अन्ततः एकस्मिन् दिवसे तदेव हि सम्पन्नं यस्य भयं मम मनसि समुत्पन्नम् आसीत्।

एकस्यां निशायां गुरुसिंहः यदा विलम्बेन गृहं प्रतिनिवर्तते स्म तदा एकस्य गृहस्य सोपानभागे समुपविश्य केचन बालकाः तम् उद्दिश्य सङ्केतं च विधाय किमपि वक्तुं प्रारब्धवन्तः। सः तान् विलोक्य तेषां व्यङ्ग्यबाणांश्च निशम्य अपि किमपि न प्रत्युक्तवान्! संभवतः सः तूष्णीम्भावेन तान् सर्वान् उपेक्षितान् विधाय

निर्गन्तुम् इच्छति स्म। परन्तु संयोगात् तस्य चरणम् एकेन प्रस्तरखण्डेन संघट्टितं संजातं येन तस्य गतौ विषमता सम्भूता। सः किञ्चित् स्खलितो भूत्वा अस्तव्यस्तगतिकः सन् कथञ्चित् आत्मानं संध्यातवान्।

विंशतिवर्षदेशीयः रमेशनामधेयः युवा गुरुसिंहेन समं विशिष्टं विरोधं धारयति स्म। स तं भ्रष्टगतिकं विलोक्य सव्यङ्ग्यम् उक्तवान्-"किं भोः? किम् अद्य किञ्चित् अधिकमेव पीतवान् किम्?"

गुरुसिंहः किमपि न प्रत्युक्तवान्। तदैव अन्यः कश्चित् रमेशस्य सखा ब्रूते-"परन्तु अयं साम्प्रतं कुतः आयाति?"

"कुतश्चित् वेश्यालयादेव स्यात् ....." इत्येतद् विषमिश्रितं वाक्यं यदा रमेशः प्रोक्तवान् तदा गुरुसिंहः प्रचलन्नपि मध्ये विरम्य स्वशिरः पृष्ठतः कृतवान्। तस्य चक्षुर्भ्यां तदा स्फुलिङ्गाः इव विद्योतन्ते स्म। तद् विलोक्य बालकाः अपि सोपानमार्गात् समुत्थितवन्तः। प्रतीयते यत् ते अद्य किमपि विचार्य मनसि वा निधाय पूर्वतः एव तत्र समुपविष्टाः आसन्।

"अहं पूर्वमपि उक्तवान् यदिदं भद्रजनानाम् आवासक्षेत्रम्। अत्र एवं मद्यपानं विधाय निशायां विलम्बेन गमनागमनं न समीचीनम्"-रमेशः प्रोक्तवान्।

गुरुसिंहः किमपि न प्रत्युक्तवान्। परन्तु प्रथमवारं स्पष्टतया रमेशस्य अभिमुखं शनैः शनैः प्रवर्तमानः आसीत्। पुनः किञ्चित् विरम्य विचारमग्नः सञ्जातः। एवं प्रतीयते स्म यत् सः किमपि निर्णयं कर्तुकामः वर्तते।

"किम् एवं टक-टकायमानः मां पश्यसि? मम प्रश्नस्य उतरं देहि ....."-रमेशः अग्रे प्रचलन् प्रतिद्वन्द्विितामिव प्रदर्शितवान्। वस्तुतः रमेशः स्वकीये शारीरिकबले दुरहङ्कारयुक्तः आसीत्। सः स्वस्मिन् स्वकीयमित्रेषु च तथाविधं विश्वासं करोति स्म यत् ते गुरुसिहं ताडयित्वा तादृशम् अपमानं विधास्यन्ति यत् गुरुसिंहः स्वयमेव तस्मात् आवासक्षेत्रात् निर्गन्तुं विवशो भवेत्।

परन्तु रमेशस्य चेतना तदा समुद्गता यदा तेन दृष्टं यत् तस्य वचनानि श्रुतवतः गुरुसिंहस्य मनसि किमपि भयमेव न प्रवृत्तं प्रत्युत स निर्भीकः सन् स्वयमेव तस्य पुरतः समागत्य रमेशस्य स्कन्धे स्वहस्तं निक्षिप्य तस्य चक्षुषी गहनतया घूर्णयन्निव प्रोवाच-"किमुक्तं त्वया? अहं कुतः आगच्छामि?"

गुरुसिंहः शान्तस्वरेण एवं शनैः पृष्टवान् यथा तस्य चिन्तनं तत्र रमेशद्वारा प्रोक्ते वाक्ये एव वर्तते।

"अहं यत् किमपि उक्तवान् तत्तु त्वया श्रुतमेव स्यात् ....." रमेशः स्वकीयस्कन्धात् तस्य हस्तम् उत्क्षिप्य अपनयन् उवाच-"कस्यचित् बन्धोः समीपात्

वेश्यालयात् वा आगच्छसि साम्प्रतम् इति मन्ये।"

"अस्तु, एवं किल! अहं वेश्यालयात् साम्प्रतम् आगच्छामि?" गुरुसिंहः रमेशस्य गलवस्त्रं हठात् सबलं निगृह्य समुत्क्षिपन् इव प्रोक्तवान्। तत्सर्वं निरीक्ष्य अन्ये युवकाः अपि तं पृष्ठतः निगृहीतवन्तः। रमेशस्तु गुरुसिंहम् एकतः कृत्वा आत्मानं मोचयितुं प्रयतितवान् परन्तु निष्फलः एव सञ्जातः। गुरुसिंहः तु तदानीम् अर्धविक्षिप्तः क्रोधान्धश्च प्रतीयते स्म। तदावासक्षेत्रनिवासिनस्तु तं तथाविधं कदापि न दृष्टवन्तः आसन्। ते पञ्च युवकाः अपि सम्मिलिताः भवन्तः तं नियन्त्रितं कर्तुं न समर्थाः प्रतीयन्ते स्म।

सः सर्वेषां समक्षमेव रमेशं तूलमिव धुन्वानः पशुमारमिव अमारयत्। यद्यपि पृष्ठतः तं ते युवकाः अपि मारयन्ति स्म। परन्तु तस्य वज्रमये शरीरे यथा तेषां कश्चित् प्रभाव एव नाभवत्। यः कश्चित् तस्य समीपं समायाति तम् उत्थाप्य सः तत्क्षणं पृथिव्यां निक्षिपति स्म।

एतस्मिन् एव काले सर्वे समीपनिवासिनः तत्र एकत्रीभूय रमेशं यथाकथञ्चित् गुरुसिंहस्य निग्रहात् यदा मोचितवन्तः तदा सः मृतप्रायः इव संलक्ष्यते स्म। तदानीमेव आरक्षिणः आवासक्षेत्रनिवासिनां सूचनाद्वारा समायाताः गुरुसिंहं निगृह्य उपकारागारे प्रवेशयामासुः।

दिनद्वयानन्तरं यदा स उपकारागारात् बहिर्भूय गृहं समायातः तदा तस्य भावविन्यासः किञ्चित् परिवर्तितः इव प्रतीयते स्म। तस्य दृष्टिविन्यासोऽपि विभिन्नः परिवर्तनशीलः आत्मसंयमितः स्वाभिमानमुद्राभावभरितश्च भासते स्म। तद्घटनानन्तरं तु तत्क्षेत्रनिवासिनाम् अपि तत्कृते घृणाभावे दुर्भावनायां च वृद्धिरेव परिलक्ष्यते स्म। गुरुसिंहेन समं वार्तालापकरणे विवादकरणे वा कस्यचिदपि साहसमपि समाप्तम्। यदापि ते सर्वे ततः किञ्चित् अधिकं खिन्नाः भवन्ति स्म तदा राजकिशोरस्य समीपं गत्वा कथयन्ति स्म यत् सः स्वकीयकार्यालयात् तं कथमपि निष्कासयतु। परन्तु राजकिशोरस्य दृष्टिपथे अधुनापर्यन्तं तु गुरुसिंहस्य कश्चित् तथाविधः अपराधः अपि न प्रतीयते स्म येन सः तम् उद्योगात् निष्कासयेत्। तस्य विचारे गुरुसिंहस्य कृते भद्रनागरिकताप्रापणार्थं सात्त्विकजीवनयापनार्थं च अवसरः दातव्यः एव। एवम् अनिच्छन्तः अपि जनाः तस्य स्वकीयावासक्षेत्रे विद्यमानतां स्वीकर्तुं बाधिताः एव बभूवुः।

अस्तु, तेषु दिवसेषु राजकिशोरस्य कन्यायाः विवाहावसरः समागतः। प्रायः सर्वाः विवाहपूर्वाः सामाजिकरीतयः परम्पराश्च साधिताः। केवलं विवाहदिवसः एव निर्धारयितव्यः आसीत्। परन्तु दुर्भाग्यात् तन्मध्ये एव विवाहसम्बन्धोऽयं भग्नतां गतः। एतत् सर्वम् आवासक्षेत्रनिवासिनां कृते कष्टप्रदमेव समवर्त्तत। राजकिशोरस्तु

बहुसमुद्विग्नः दुःखसंवलितश्च आसीत्। विवाहभंगस्य किं कारणम् इति कोऽपि स्पष्टतया न ज्ञातवान्। परन्तु यदेतत् संवृत्तं तेन राजकिशोरः भृशम् आधिग्रस्तः भूत्वा निष्क्रियः इव समवर्तत। विवाहनिषेधकृत्यं वरपक्षतः समभवत्। परन्तु तस्य सर्वाधिका दुःखाकुलता शोकसंवेदनता च कन्यापक्षीयैः समधिगता।

अस्तु, तन्मध्ये एव एका अन्या घटना अपि घटिता। अनया तु गुरुसिंहस्य स्वरूपमपि स्पष्टीभूतम्। यस्मिन् वित्तीयकार्यालये राजकिशोरः कार्यं कुरुते तत्कार्यालये एव गुरुसिंहः धनापनयनापराधे सप्रमाणं निगृहीतः। अन्ततश्च ज्ञातं यत् सः स्वकीयम् अपराधमपि स्वीकृतवान्।

एतत् किल राजकिशोरस्य कृते एकम् अन्यत् स्तब्धकारकं दुर्घटनावृत्तम् आसीत्। स एव स्वकीयकार्यालये गुरुसिंहस्य नियोजनम् अकारयत्। एतद्घटनानन्तरं तु स तेषां समक्षं तिरस्कृतः दुर्लज्जितश्च अभवत् येषां समक्षं गुरुसिंहस्य पक्षम् आश्रित्य स तस्य संरक्षणं करोति स्म।

जनास्तु प्रायः गुरुसिंहस्य भर्त्सनां कुर्वन्ति स्म एव, परन्तु अधुना राजकिशोरस्यापि तथाविधं व्यङ्ग्यपूर्वकं निन्दनं कुर्वन्ति स्म येन स दुःखितः भूत्वा मौनमुखरः एव सञ्जातः। सः आत्मग्लानिवशात् प्रायः एकान्तवासी भवन् क्षेत्रीयजनेभ्यः दूरत्वमेव स्वीकृतवान्। स्वगृहादपि सः अल्पतममेव बहिः भवन् दृश्यते स्म। कस्यामपि चिन्तायामेव निमग्नः प्रतीयते स्म। मेलितुम् इच्छतः जनान् परिहरति स्म। यदा च कश्चित् तत्समक्षं गुरुसिंहं निन्दति तदा राजकिशोरः इदमेव अनुभवति यथा कश्चित् तमेव किमपि कथयति निन्दति अपशब्दं वा भणति।

गरुसिंहस्तु षण्मासात्मकं कारादण्डं प्राप्य कारागृहं प्रापितः। अधुना सः अस्माकम् आवासक्षेत्रं निवासाय न सम्प्राप्तः, अपितु स्वकीयानि वस्तुजातानि संगृह्य क्वचित् अन्यत्र निवासं कर्तुं प्रस्थितः। तदावासक्षेत्रस्य नागरिकाः अपि शनैः शनैः सर्वं वृत्तान्तं गुरुसिंहं च विस्मृतवन्तः एव।

अथ यदा अकस्मादेव राजकिशोरः स्वकीयकन्यायाः विवाहं गुरुसिंहेन समम् अत्यन्तं शान्तिपूर्वकं सम्पादितवान् तदा आवासक्षत्रे भूकम्पः इव समागतः। जनाः इदं ज्ञातुम् असमर्थाः एव अभवन् यत् राजकिशोरः तथाविधं कार्यं कथं कृतवान्? तस्य कृते पुरतः समालोचनायाः व्यङ्गबाणानां च तथाविधः प्रबलः झञ्झावातः समुत्थितः यत् सः इदम् आवासक्षेत्रमेव परित्यज्य कुत्रचित् अन्यत्र निवासं कर्तुं प्रस्थितः।

अस्माकं कृते अपि राजकिशोरस्य आवासक्षेत्रपरित्यागः प्रहेलिका इव अभूत्। सः मां लघुभ्रातरमिव मन्यते स्म। अहं तत्कृते परमविश्वस्तं मित्रम्। सः मां स्वकीयं

प्रत्येकं वृत्तान्तं निर्णयं च विश्वस्ततया कथयति स्म। पुनः सः कथम् एतत्सन्दर्भे मां किमपि न सूचितवान्? इत्येवंविधा विचाराः माम् अत्यन्तं समुद्विग्नम् अकुर्वन्।

अस्तु, एतत्सर्वासां घटनानाम् एकमासानन्तरमेव संयोगात् राजकिशोरस्य मेलनं संवृत्तम्। अहम् स्वकीयेन केनचित् मित्रेण संगन्तुम् अन्यस्मिन् आवासक्षेत्रे गतवान् इति तदा प्रत्यागमनकाले सहसा पथि राजकिशोरः दृष्टः। सोऽपि मां विलोक्य प्रत्यभिवादनानन्तरम् एतद् उक्तवान् यत् सः अस्मिन् एव आवासक्षेत्रे साम्प्रतं निवसति। तस्य गृहं च अनतिदूरे वर्तते। सः मां स्वगृहं प्रति निमन्त्रितवान्। अहं तु मनसि एव निश्चितवान् यत् अद्य सर्वं रहस्यं विज्ञाय एव ततः प्रतिनिवृत्तः भविष्यामि इति। अतः एव तेन सह तस्य गृहं गतवान्।

राजकिशोरस्य गृहे प्रविशन् एव अहं तस्य समक्षं प्रश्नानां वृष्टिं कर्तुं प्रारब्धवान्। तत्र मम अयं आक्षेपः सर्वप्रथमः आसीत् यत् सः अस्मदीयम् आवासक्षेत्रं सहसा परित्यज्य इह समागतः। पूर्वं तु सः मम प्रश्नेषु उपेक्षाभावं धारयन् बभूव। परन्तु मम पर्युत्सुकतां विलोक्य किञ्चित् गाम्भीर्यम् आलम्बमानः कठोरमुखाकृति–सम्पन्नः सोफासनस्य पृष्ठतः आश्रयम् अवलम्ब्य दीर्घं निःश्वस्य एवम् वक्तुम् प्रारब्धवान्–

"पश्य, मम प्रिय सखे! अहं त्वां तत् सर्वम् अविकलं वदामि येन मम दृष्टिविन्यासे सः गुरुसिंहः प्रायः देवतासदृश एव सञ्जातः यं तव आवासक्षेत्रनिवासिनः 'गुण्डा' इति 'चरित्रहीन' इति च विशेषणेन विभूषयन्ति स्म।"

पुनः किञ्चित् विरम्य मां गहनं निरीक्ष्य राजकिशोरः उक्तवान्– "त्वं तु जानास्येव यत् यदा मम कन्यायाः विवाहसम्बन्धः भग्नः तदा अहं कियदुद्विग्नः दुःखितश्च अभवम्। विवाहभङ्गस्य च प्रमुखं कारणं धनाभावः एव। अह वरपक्षाय यौतकरूपेण धनं प्रदातुं नितराम् असमर्थः आसम्। एकदा दुःखावस्थायां यदा स्वकार्यालयं गतवान् तदा मम अधिकारी मम पुरतः सहसा सायङ्कालीनकार्यालयावकाशात् पूर्वं समागत्य अवदत्–"अयि! मम गणनायां कार्यालयस्य पञ्चाशत्सहस्रं रूप्यकाणि अल्पानि वर्तन्ते। कुत्र सन्ति तानि?"

"यदाहं तद्विषये अनभिज्ञतां प्रकटितवान् तदा सः प्राह यत् तेन सर्वेषां कर्मचारिणां वस्तुजातानां स्यूतानां च निरीक्षणं करिष्यते। यदा केनापि तदा तत्र कापि आपत्तिः न प्रकटिता तदा सः कक्षं पिधाय सर्वेषां निरीक्षणं प्रारब्धवान्। फलतः सर्वं धनं मम स्यूते प्राप्तवान्।

मम मुखसौन्दर्यं विकृतम् अभवत्! चक्षुषोः पुरस्तात् अन्धकारः प्रकटीभूतः। मया चिन्तितं यत् अधुना मम सेवाकार्यं ततः समाप्स्यते, मया च कारागारे एव गन्तव्यं भविष्यति। मम सर्वा प्रतिष्ठा धूलिसात् भवति। तदानीमहं स्वकीये

एतस्मिन् कुकर्मणि घोरं पश्चात्तापम् अनुभवितुं प्रारब्धवान्।

समीपस्थः गुरुसिंहस्तु मम मुखाकृतिं विलोक्य तत्रत्यां सर्वां समुद्विग्नतां व्यग्रतां च अधीत्य समग्रम् आन्तरिकं विषयवस्तु सम्यक्तया ज्ञातवान्। सः क्षणपर्यन्तं किञ्चित् विचार्य ततश्च सहसैव प्रोक्तवान्–"कृपया राजकिशोरमहोदयस्योपरि कथमपि सन्देहं न कुर्वन्तु। तस्य आचरणम् अत्र न कथमपि सन्दिग्धं वर्तते। असौ महानुभावः पवित्रः वर्तते। रूप्यकाणि तु मया चोरितानि, एतस्य स्यूते च रक्षितानि। अहमेव अत्र अपराधी, न खलु राजकिशोरमहोदयः।"

गुरुसिंहस्य तद्वचनं निशम्य सर्वे तत्रत्याः तस्य वचने कार्ये च विश्वासं कृतवन्तः एव। यतः तस्य भूतकालस्य जीवनवृत्तान्तं सर्वे जानन्ति स्म।

क्षणान्तरम् अहं गुरुसिंहं विलोक्य स्वशिरः नीचैः कृतवान्। अन्तर्मनसि तु अहं तस्य तथाविधे बलिदानकार्ये श्रद्धापारवश्यात् अनुगृहीतम् आत्मानं मन्यमानः आदरं वहामि स्म, परन्तु मुखेन किमपि वक्तुं न पारये स्म। ततः आरक्षिणः समाहूताः। गुरुसिंहश्च उपकारागारं प्रापितः।

गुरुसिंहो न्यायालयेन दण्डितः षण्मासात्मकं कारादण्डं प्राप्तवान्। मादृशस्य एकस्य नागरिकस्य सम्मानरक्षणार्थं सः न्यायालये स्वकीयापराधं निस्सङ्कोचम् अङ्गीकृतवान्। इतस्तु सः कारादण्डम् उपभुङ्क्ते स्म। परं ततस्तु मम अन्तरात्मा मां निरन्तरं धिक्कुरुते स्म। कथं च न धिक्कुर्यादपि? यतो हि अपराधस्तु मया कृतः, दण्डं च सः भुनक्ति। स्वकन्यायाः विवाहार्थं सम्भावितस्य वरपक्षस्य कृते मया यौतकं देयम् आसीत्। तस्य आवश्यकतापूरणार्थमेव मया तद् धनं चोरितमासीत्। समाजे च स्वमिथ्यासम्मानशवस्य उपरि वस्त्रम् आच्छादयितुं मया स्वकीया जिह्वा तूष्णीं कृता"–इति कथयन् राजकिशोरः सबाष्पनेत्रः सन् निःशब्दः सञ्जातः।

अहं तस्य तद्रहस्योद्घाटनेन स्तब्धः समभवम्। यः गुण्डागुरुसिंहः मम दृष्टिपथे आसुरप्रवृत्तिकः आसीत् सः साम्प्रतं मम मानसपटले देवत्वम् आसाद्य प्रतिष्ठितः। मम हृदयेऽपि तं प्रति श्रद्धा समुद्भूता। सहसा अहं राजकिशोरम् अवोचम्–"भवान् तूष्णीं कथं सञ्जातः? कथाम् अपूर्णां कथं करोति? कृपया पूर्णां करोतु।"

राजकिशोरः क्षणम् आध्याय अग्रे उक्तवान्–"अहं मम परिवारजनाश्च गुरुसिंहस्य तथाविधेन त्यागेन बलिदानेन वा नितरां प्रभाविताः आस्म। सर्वेषां विचारे सः देवतुल्यः आसीत्। कोऽपि तं स्वकीयस्नेहसम्बन्धनात् पृथक् कर्तुं न कामयते स्म। अतः एव यदा सः कारागारात् समागतः तदा अहं समग्रं पूर्वापरं विचार्य तं जामातृरूपेण स्वीकृतवान्।"

किञ्चित् विरम्य राजकिशोरः पुनरेव भावुकतापूर्णः भवन् कृतज्ञतामिश्रितेन स्वरेण

वक्तुम् आरब्धवान्–"गुण्डा–गुरुसिंहः" मत्कृते केवलं गुरुसिंहः वर्तते । साम्प्रतं स मम पुत्रकल्पः संवृत्तः। मम सुता अपि परमं प्रसन्ना। मन्ये त्वमपि एतत् ज्ञातवानेव यदहं स्वकीयां सुतां तस्मै समर्प्य स्वकीयस्य पापस्य प्रायश्चित्तमेव कृतवान्। अहं तु विचारयामि स्म यत् यः पुरुषः कश्चिदपि न भवन् मम जीवनाधारभूताया भृतेः प्रतिष्ठायाश्च रक्षां कृतवान् सः एव मम स्वकीयः भूत्वा मम सम्मानं वैभवं च कथं न सुस्थापयिष्यति? .....यदि मया तत्कृते किमपि कृतं तत्तु केवलम् इदमेव यत् तस्मै 'गुण्डा गुरुसिंह' इति नामधेयात् गुण्डा शब्दं पृथक्कृत्य केवलं गुरुसिंहं विधातुम् अवसरः प्रदत्तः। मन्ये जनाः ममोपरि अङ्गुलिम् उत्पाथयेयुः, परन्तु अहं कमपि लोकापवादं न ध्यायामि, न च अन्येषां विचारान् गणयामि।

राजकिशोरस्य कथनं यदा समाप्तं तदा मया इदमनुभूतं यत् सः भावावेगेन रुद्धकण्ठो वर्तते। तस्य आनने च सन्तोषस्य भावः सबलं परिलक्ष्यते स्म।

***

अनभीप्सितम्

अद्य मध्याह्न एव यदा डाकद्वारा अमेरिकादेशे स्थितस्य मातुलस्य श्रीशिव-कुमारमहोदयस्य पत्रं समागतं तदा मम मातृमहोदया अत्यन्तं प्रसन्नतां प्रकटितवती। दूरत एव मया विलोकितं यत् तत्पत्रं पर्याप्तं लम्बायमानम् अनेकपृष्ठात्मकं च वर्त्तते तथा च मम जननी प्रायः दशमिनटपर्यन्तं सावधानेन सर्वं पत्रं पठितवती। पत्रं पठित्वा सा पुनः कस्याञ्चिद् विचारधारायां निमग्ना परिलक्ष्यते स्म। न जाने मातुलमहोदयेन तस्मिन् पत्रे तथाविधं किं लिखितं यत् मम जनन्याः प्रशान्ते ललाटे गहनतमाश्चिन्तारेखाः प्रकटीभूय तस्या आनने साक्षादेव समारूढ़ाः। मुखमण्डले औदासीन्यमिव प्रकटीभूतम्। एवंविधायाम् अवस्थायां तत्पत्रं स्वत एव तस्याः कराभ्यां स्खलितं सत् अधस्तात् क्रोडे निपतितम्। मातृमहोदया तु बहुकालपर्यन्तम् अन्यमनस्का सती चिन्तापरायणा बभूव। इयम् औदासीन्ययुक्ता अवस्था च पर्याप्तकालपर्यन्तं तस्या मानसं मथ्नाति स्म।

पुनः सा अकस्मादेव स्तब्धतां विहाय माम् अभितो भूत्वा मम मुखमण्डलस्य च पर्याप्तं सबलं निरीक्षणं कृत्वा तत्पत्रं क्रोडाद् उत्थापयन्ती स्वयमपि साफोसनाद् उत्तिष्ठन्ती तत्पत्रम् आवरके (लिफाफा) सुस्थापितवती। तदनतरं सा मां सम्बोध्य प्रोक्तवती।

"पुत्रि! सुभद्रे! मातुलेन तव कृते शुभकामनाः प्रेमभावाश्च प्रकटिताः" इति। पुनः सा तत्पत्रं नीत्वा यदा तस्मात् कक्षात् अन्यस्मिन् कक्षे प्रस्थितवती तदा अहम् आश्चर्यचकिता अभवम्। वस्तुतः अहं तु प्रायः हतप्रभेव संजाता। इतः पूर्वम् एवं कदाऽपि नाभूद् यद् मातुलमहोदयस्य पत्रम् आयातं स्यात् तदा चाऽहं तत् पत्रं पठनार्थमपि न प्राप्नुयाम्। न जाने पत्रे तथाविधं किं लिखितं वर्त्तते यत् मातृमहोदया तत्सर्वं मत्तः गुह्यं कर्त्तुं कामयते स्म। अहं तु तत्सर्वं विचार्य स्वयमेव समुद्विग्ना सञ्जाता। मातुलमहोदयो न जाने पत्रे तथाविधं किं वृत्तान्तं लिखितवान् यत् मम जननी महोदया पत्रपठनानन्तरमेव चिन्तायुक्ता नैराश्ययुक्ता उद्विग्नतायुक्ता च प्रतीयते स्म।

किंचित् कालानन्तरमेव मम हृदये एष विचारः समायातो यत् जननीमहोदया स्वकीये कक्षे प्रविश्य यथा रोदिति। पुनः सा स्वकीयकक्षात् निःसरन्ती दृष्टिपथमायाता। क्षणानन्तरं च सा स्वकीयकक्षे एव इतस्ततः पर्यटन्तीव प्रतीयते स्म। पुनः सा मम पादप्रक्षेपध्वनिमाकर्ण्य द्वाराभिमुखमेव मां दृष्टवती। आवयोः चक्षुषोः यदा साम्मुख्यमभवत् तदा मातरमहं पृष्टवती-"अम्ब! कुशलं तु वर्त्तते? कथं भवती समुद्विग्ना विचारमग्ना च वर्त्तते?"

"सर्वं कुशलमेव वर्त्तते सुभद्रे!" मम जननी गहनतया दीर्घं निःश्वस्य पुनरब्रवीत्-"त्वं भोजनं कुरुष्व मम तु साम्प्रतं कथमपि बुभुक्षा न प्रतिभाति।"

तस्य वचनं निशम्य मयाऽपि उत्तरितम्-"ममापि साम्प्रतं बुभुक्षा नास्ति। अहमपि त्वया सहैव विलम्बेन भोजनं विधास्ये"।

पुनःतस्यामेव निशि भोजनमञ्चे (डाइनिंग टेबल) जननी माम् इदं सूचितवती यत् मातुलस्य श्रीशिवकुमारस्य कश्चिद् घनिष्ठः सखा अमेरिकादेशवास्तव्यः श्रीसूर्यकान्तो वर्त्तते, तस्यैव लघुभ्राता चन्द्रकान्तः शीघ्रमेव भारते समायाति। स च प्रायः सप्ताहपर्यन्तम् अस्माकमेव गृहे स्थास्यति।

"तर्हि भवती कथं तदर्थं समुद्विग्ना चिन्तिता च वर्त्तते? अहं किञ्चिद् विहस्य पृष्टवती-"किं स स्वभार्यया बालकैश्च समम् आगच्छति?"

न हि भो! स तु अविवाहित एव वर्त्तते। स स्वकीय-व्यक्तिगत-कार्येण समायाति तव मातुलेन चाहं निर्दिष्टा यत् तस्य निवासादेः सुखसुविधायाः आरामस्य च विशिष्टः प्रबन्धः कर्तव्यः ध्यानं च दातव्यम्! इति"। मातृमहोदया प्रत्युक्तवती।

"एकस्य पुरुषस्य भोजनादिव्यवस्थायां क्व खलु काठिन्यम्? मोहनस्तु (गृहभृत्यः पाचनसहायकश्च) पाश्चात्त्यभोजनपि पक्तुं शक्नोति" अहम् अवोचम्।

"त्वं सत्यं कथयसि" जननी मां गहनतया निरीक्ष्य प्रत्युक्तवती-"त्वं श्वस्तने दिवसे एव मोहनं निर्दिश्य उपरिस्थितम् अतिथिकक्षं स्वच्छं विधाय शोभायुक्तं कारयस्व"।

अथ अन्येद्युरहं प्रातःकाले विश्वविद्यालयं न गतवती जननी तु स्वमहाविद्यालये अध्यापनकार्यार्थं प्रस्थितवती। अहम् प्रातःकालीनम् उपाहारादिकं समाप्य जनन्याः कक्षं सुव्यवस्थितं कर्त्तुं गतवती। यदाप्यहं कदाचित् पठितुं विश्वविद्यालयं न गच्छामि स्म, तदा मातृमहोदयायाः कक्षं सुव्यवस्थितं करोमि स्म। यतो हि मोहनद्वारासम्पादिता कक्षस्य सुव्यवस्था तस्यै न रोचते।

तत्र यदा लेखनमञ्चे (टेबल) विद्यमानानि पत्रकाणि पुस्तकानि च व्यवस्थितानि करोमि स्म, तदाऽहम् आश्चर्यमिश्रिताम् प्रसन्नताम् अन्वभवम्। यतो हि पुस्तकानां समीपत एव मातुल-महोदयेन प्रेषितं तत् पत्रमपि विद्यमानम् आसीत्। एवं प्रतीयते स्म यत् तत्पत्रं मातृमहोदया माम् पठितुमेव तत्र परित्यक्तवती। यद्यपि क्षणपर्यन्तं तु मम हस्तः स्तब्ध आसीत्। यतो हि अनुमतिं विना अन्यस्य कस्यचित् पत्रस्य पठनम् अनुचितं भवति, पुनरपि एतद् विचार्य तत्र पठनस्य साहसमभूत् यत् पत्रपठनेन न काचिद् हानिः। अन्ततः मम मातुलमहोदयस्यैव तु पत्रं वर्तते। पुनः किञ्चेद् ऊहापोहानन्तरम् उत्सुकतावशात् तत्पत्रस्य पठने विवशा एव अभूवम्। तत्पत्रं च अनावृतं कृत्वा विष्टरे समासीना एव पठितुम् प्रारब्धवती-

प्रिय भगिनि! मालिनि!

सस्नेहं नमस्काराः!

अहं तव पत्रस्य यथासमयम् उत्तरं प्रदातुं न प्राभवम्। यतो हि यस्मिन् दिवसे तव पत्रं मया प्राप्तं तस्मिन्नेव दिवसे मम कनाडागमनस्य कार्यक्रमः आसीत्।

अधुना दशदिनान्तरम् अत्र गृहे अमेरिकादेशे प्रत्यागतोऽस्मि। अत एव पत्रोत्तरप्रदाने यो विलम्बः सञ्जातस्तत्र त्वया विशिष्टं न ध्यातव्यम्।

अत्रत्यं सर्व वृत्तं समीचीनमेव वर्तते। पत्रेण समं त्वद्द्वारा प्रेषितं सुभद्रायाः छायाचित्रं मया प्राप्तम्। त्वया सुभद्राया विवाहस्य चर्चा पत्रे कृता। सुभद्रायाः स्नातकोत्तरपरीक्षाया अयमन्तिमो वर्षो विद्यत इति विज्ञाय मम मानसे प्रसन्नता जाता यत् कथमियं लघ्वी बालिका साम्प्रतं द्वाविंशतिवर्षदेशीया सञ्जाता।

अस्तु, उचितावसरे त्वया विवाहचर्चा प्रारब्धा। अस्माकमेकः घनिष्टः सखा श्रीसूर्यकान्त उपाध्यायनामधेयः अत्र अमेरिकायामेव निवसति। आवां विगत-सप्तवर्षेभ्यः परिचितौ स्वः, तथा च आवयोर्गृहेषु परस्परम् आवागमनमपि प्रायशः प्रवर्त्तत एव। तस्यैव कनिष्ठः सहोदरः श्रीचन्द्रकान्त उपाध्यायः प्रायः सप्तविंशति-वर्षदेशीयः अत्यन्तं सुन्दरो युवको विद्यते। यद्यपि स केवलं स्नातकपरीक्षोत्तीर्णः पुनरपि स्वकीये व्यापारकार्ये व्यस्तः सन् पर्याप्तं वित्तम् उपार्जितं करोति। सोऽपि शाकाहारी भारतीय-संस्कृति-सभ्यता परम्परा-प्रेमी सद्गुणसम्पन्नश्च प्रतिभाति। तस्य आर्थिकी स्थितिरत्यन्तं सुदृढा वर्त्तते। तस्य नैजम् आवासभवनम् (फ्लैट) अपि वर्त्तते। मम विचारे स सुभद्रायाः कृते सर्वविधःसुयोग्यः उपयुक्तश्च वरो भविष्यति।

मया सुभद्रायाश्चित्राणि तस्मै द्रष्टुम्प्रदत्तानि। स केवलं चित्रं विलोक्य अथवा एकवारमेव कामपि कन्यकां निरीक्ष्य अकस्मादेव तत्क्षणं विवाहस्य निर्णयं कर्त्तुं न कामयते। स साम्प्रतम् एकमासार्थं सपद्येव भारतं प्रतिगच्छति। अहं पूर्णतया आशान्वितोऽस्मि यत् तस्मै सुभद्रा रोचिष्यते। यदि सा सुभद्रां मनसा स्वीकरिष्यति तदा मन्ये सुभद्राया भाग्योदय एव भवेत्। साम्प्रतम् एतादृशाः संस्कारसम्पन्ना वराः क्व प्राप्यन्ते? उभयोर्युगलता मम विचारे प्रशंसनीया दर्शनीया च भविष्यति।

यदा स तव गृहे समागत्य सप्ताहपर्यन्तं निवासं कुर्यात् तदा त्वया तेन समं तथा व्यवहारः कर्तव्यः यथा त्वया महाविद्यालये केनचित् शिष्येण सह व्यवहारः क्रियते। तेन सह निश्छलं मित्रवत् व्यवहर्त्तव्यम्। अत्रेदं विशेषतः ध्यातव्यं यत् स अमेरिकायाः उन्मुक्ते वातावरणे पालितः वर्धितश्च। भारतवर्षस्य वातावरणं पर्याप्तं संकीर्णम् आवरणप्रधानं च भवति। यदि स सुभद्रायाःसमं क्वचित् पर्यटितुं मानसं विनोदयितुं वा गच्छेत् तदा स न प्रतिषेद्धव्यः। सुभद्राऽपि

वक्तव्या यत् सा तेन समं मित्रवत् आचरेत् तथा च काचित् छात्रावत् स्पष्टव्यवहारयुक्ता संकोचरहिता च भवेत्। केवलम् अध्ययनप्रिया बालिका अथवा विवाहार्थं साक्षात्कारं प्रदातुकामा कन्यकावत् न समाचरेत्।

परिधानविषये शृंगारविषये चाऽपि ध्यानं दातव्यम्। साम्प्रतिकाः युवकाः कन्यकानां विचारस्य चिन्तनस्यापि विषये विशिष्टं ध्यानमवधारयन्ति। एष युवकोऽपि विशिष्टश्चिन्तनशीलः सन् आत्मनः साफल्यस्य भाग्यस्य च स्वयमेव निर्माता वर्त्तते। यदा स सुभद्रया समं क्वचिद् बहिर्गच्छेत् एकान्ते वा वार्त्तालापं कुर्यात् तदा तत्रापि त्वया विश्वासो विधेयः।

अत्रेदम् अपरं ध्यातव्यं यत् स भारते अन्यत्राऽपि द्वयोः स्थानयोः स्वकीय दूरस्थ सम्बन्धिनोर्गृहे गमिष्यति। तयोः कन्यके अपि विवाहयोग्ये वर्त्तेते। तत्राऽपि स कतिचिद् दिवसान् निवत्स्यति।

अस्तु, यदि आवयोः परिवारे एतस्य सम्बन्धो निश्चितो भवेत् तदा त्वया वैवाहिकस्य व्ययस्य कथमपि चिन्ता न कर्त्तव्या। अहं सर्वमेतत् सम्बन्धे साधयिष्यामि।

अपरञ्च अहं दिनद्वयाऽनन्तरं डाकद्वारा श्रीचन्द्रकान्तस्य छायाचित्रं प्रेषयामि येन त्वं वायुपत्तने गत्वा परिचेतुं समर्था भवेः। सुभद्राऽपि वायुपत्तने सहैव नेतव्या। शेषं भगवत्कृपया कुशलमेव वर्त्तते।

तवैव सहोदरः-

शिवकुमार उपाध्यायः।

अमेरिकातः यूरोपतः वा कस्यचित् विवाहस्य प्रस्ताव इह भारते मन्ये गौरवास्पदमेव भवति। कन्याया अभिभावकास्तु एतादृशानां सम्बन्धानां कृते प्रायशः स्वकीयामुत्सुकतां प्रकटयन्त्येव। परन्तु मम जननी सम्भवतः एतादृशाय सम्बन्धाय विशेषतया उत्सुका नाभूत्। तस्मादेव सा पत्रमधीत्यैव उदासीना समुद्विग्ना च प्रावर्त्तत, अथवा मन्ये सा मम वियोगजन्यं दुःखमाध्यायैव सा चिन्तिता स्यात्। अथवा एतद्विचिन्त्य समुद्विग्ना भवेत् यत् अहं श्रीचन्द्रकान्तेन वरणीया भूत्वा दूरदेशे अमेरिकायां प्रोषिता भविष्यामि। यद् वा मन्ये सा स्वार्थचिन्तनपरायणा भवेत् यत् मयि गते सति तस्याः किं भविष्यति? अत्रापि आश्चर्यमेतद् यत् तस्या एषा चिन्ता समुद्विग्नता च समयात् पूर्वमेव जायते स्म। यतो हि अधुना तु मया सा परीक्षैव समुत्तरणीया वर्त्तते, यस्याः समुत्तीर्णतायाः सम्भावना मम विचारे दशप्रतिशतमपि न वर्त्तते। यतो हि स चन्द्रकान्तः पाश्चात्त्यवातावरणे संवर्धितः पुरुष अस्ति न खलु भारतीयवातावरणे पालितः संवर्धितश्च। अत एव मम विचारेण तु तत्र सफलतायाः संभावना अल्पीयसी एव वर्त्तते।

परन्तु मम जननी संभवतः एतत् सुनिश्चितं मन्यते यत् श्रीचन्द्रकान्तो मां स्वीकरिष्यत्येव, तत्राऽरुचेः अस्वीकारस्य वा किमपि कारणमेव नाऽभूत्। यतो हि अहम् अत्यन्तमभिरूपतमा सुदर्शना आकर्षकगात्रयष्टिः शिक्षिता गौरवर्णा च कन्यका अस्मि। मम सौन्दर्यकारणादेव मत्कृते केषांचिद् दूरस्थसम्बन्धिनां युवकानां प्रस्तावा अपि संकेतमाध्यमेन प्राप्ताः आसन् परन्तु तेषाम् अनुपयुक्ततया मम जननीद्वारा ते प्रस्तावाः तिरस्कृता अभूवन्। अहपि च पूर्वं स्नातकोत्तरपरीक्षां सम्पाद्यैव विवाहम्प्रति विचारयामि स्म।

वस्तुतः मम जनन्याः वैवाहिकं वैयक्तिकं च जीवनं किञ्चित् रहस्यात्मकम् आसीत्। तस्या जीवनरंगमञ्चे तथाविधा अनेकाः जवनिकाः आसन् यासाम् अपसारणं विना अहं किमपि विशिष्टं विज्ञातुम् असमर्था। मम जनन्याः विवाहः केवलम् अष्टादशे वर्षे एव सम्पन्नो बभूव। मया तु ज्ञाति-सम्बन्धिभिरेव श्रुतमासीद् यत् तस्याः गार्हस्थ्यं कष्टपूर्णमासीत्।

यदाऽहं पञ्चवर्षदेशीया आसम् तदैव तस्याः विवाहविच्छेदः प्रावर्त्तत। य़द्यपि उभयपक्षस्थैर्जनैः तयोर्मध्ये सामञ्जस्यस्थापनाय भूरिशः प्रयासाः कृताः परन्तु मम जननी कथमपि तदर्थं नैव समुद्यता बभूव। मम पितरं प्रति तस्या मानसे कथमेतादृशी घृणाभावना समुत्पन्ना इत्येतत् तु मया पूर्णतया कथमपि न ज्ञातं परन्तु जनप्रवादैरवगतं यत् मम जनकः संभवतः कस्याश्चिद् अन्यस्या विवाहितायाः स्त्रियाः साहचर्ये निपतित आसीद् अत एव मम जननी रुष्टा सती तेन समं पार्थक्यमेव उररीकृतवती।

विवाहविच्छेदाऽनन्तरम् मम जननी पुनरध्ययनं प्रारब्धवती। विवाहसमये सा केवलं इण्टर-परीक्षोत्तीर्णा आसीत्। अधुना सा राजनीतिविज्ञानविषये परास्नातकपरीक्षामुत्तीर्य तदनन्तरं च अनुसन्धानकार्यं परिश्रमपूर्वकं सम्पाद्य पी-एच०डी० उपधिमपि लब्धवती।योग्यताकारणात् प्रयासवशाच्च सा स्वावलम्बितां साधयमाना एकस्मिन् महाविद्यालये पूर्वं प्रवक्तृपदे नियोजनमासाद्य ततः दशवर्षानन्तरमेव प्रोन्नतिमधिगम्य साम्प्रतम् उपाचार्यपदं प्राप्तवती।

अध्ययनकालेऽपि स्वाभिमानिनी स्वावलम्बिनी च बभूव। सा स्वकीयं समस्तं व्ययभारं गृहाध्यापनकार्यैः (ट्यूशनमाध्यमेन) साधयति स्म। कदाचिदपि सा कस्यचित् साहाय्यं न स्वीकृतवती।केवलम् अमेरिकादेशीयोऽयं शिवकुमारनामा मातुल एव यदा कदाचित् तदर्थं धनं प्रेषयति स्म तदपि च सा आग्रहवशादेव कथञ्चित् खेदपूर्वकं स्वीकरोति स्म।

साम्प्रतं तु मम जनन्याः जीवने समग्रं समीचीनमेव प्रवर्त्तते। कालेन तस्याः संघर्षस्य व्रणाः स्वस्थीकृताः परिपूरिताश्च। तस्याः जीवनशैली रोचकमयी सम्मानप्रदायिनी गभीरा च प्रावर्तत। सा सर्वेषां ज्ञाति-सम्बधिनां पारिवारिककार्येषु निमन्त्रणेषु च

उपस्थिता भवति परन्तु कस्यचिदपि वैयक्तिके जीवने कदापि हस्तक्षेपं न करोति, न चैव स्वकीये वैयक्तिके पारिवारिके वा जीवने कस्यचिदपि हस्तक्षेपं मर्यादाऽतिक्रमणं वा कामयते। मम जनन्या व्यक्तित्वमपि अत्यन्तम् उदात्ततरं रुचिकरं सौम्यतापूर्णं चाऽस्ति। यदि कश्चित् काचिद् वा तया समम् एकवारमपि मिलति तदा तस्य व्यक्तित्वेन नितरामेव प्रभावितो भवति। वस्तुतः पारिवारिक-ज्ञाति-सम्बन्धिमध्ये सा अपरिहार्या इव प्रतीयते।

यथा खलु विवाहात् पूर्वं प्रत्येक-कन्यका सुस्वप्नान् पश्यति, तथैवाहमपि सुखदान् स्वप्नान् पश्यामि स्म। वस्तुतः क्वचित् मदीयाऽपि कल्पना इयमेव बभूव यत् मम विवाहः केनचित् तथाविधेन पुरुषेण सह भवेत् यो हि यूरोपीयदेशेषु अमेरिकादेशे वा वसति। अहं विदेशदर्शनम् अत्युत्कटतया कर्त्तुमिच्छामि स्म, स्वयमपि च विदेशेष्वेव निवसितुमिच्छामि स्म। एष च मे मनोरथः साम्प्रतं विवाहानन्तरं स्वत एव पूर्णं भवितुं प्रवर्त्तते। परन्तु तदर्थमिह परमावश्यकमस्ति यत् श्रीचन्द्रकान्तस्याभिरुचिरपि मयि समुत्पद्येत। स च मयि समुत्सुकोऽपि भवितुं शक्नोति परन्तु तदर्थम् इदमावश्यकम् अस्ति यत् अहं तदभिरुचिनिकषे तद्विचारनिकषे च समुत्तीर्णतां भजेयम्।

पुनरहं मानसिकरूपेण आत्मानं तदनुकूलं विधातुं प्रयासरताऽभूवम्। यद्यपि अहं स्वभावत एव चञ्चलप्रकृतिका संकोचविहीना च कन्यकाऽभूवम्। पुनरपि कृत्रिमं गाम्भीर्यं परित्यज्य स्पष्टतया वेशविन्यासेषु वस्त्रपरिधानेषु विचारकल्पनेषु च काचित् आधुनिकावत् भासितुं प्रयत्नं कृतवती।

अथ अन्येद्युः श्रीचन्द्रकान्तस्य छायाचित्रद्वयं डाकद्वारा गृहे सम्प्राप्तम्। छायाचित्रदर्शनेन स्पष्टमेव प्रतीयते स्म यत् स अत्यन्त-सुन्दरः कर्मठः गम्भीरश्च पुरुषः वर्त्तते। वस्तुतः तस्य चित्रं मम हृदये समाविष्टमिव बभूव। मम हृदयं माम् उक्तवत्-अयि! प्रमत्ते! कथमेवम् आकाशे उड्डयसे? यदि स कामप्यन्याम् अभिलषेत् अथवा तस्मै काचिन्दन्या अभिरोचेत तदा.....?

अस्तु, अधुना श्रीचन्द्रकान्तः प्रातः दशवादने वायुयानद्वारा समायाति। प्रातःकालादेव मम मनःस्थितिः व्याकुलतायुक्ता मुग्धमृगीव बभूव।अहं न्यूनतो न्यूनं पञ्चवारं गत्वा तत्कक्षं पुनः सज्जायुक्तं कृतवती यस्मिन् तस्य निवासव्यवस्था कृता आसीत्। दशवारं च स्वकीय-परिधान-मञ्जूषाम् अवलोकितवती यत् किं मया परिधातव्यम्। विंशतिवारं च दर्पणाभिमुखं भूत्वा अधररञ्जिनीं (लिप्-स्टिक) आस्वादितवती। मत्कृते परिधानचयनमपि कष्टकारकमासीत्। हृदयं तु तथा उत्ताम्यति स्म यथा तस्य नियन्त्रणमपि कठिनं प्रतीयते स्म। वस्तुतः एवंविधा परीक्षा तु

मम जीवने कदापि न समागता। अथ बहुतर्कवितर्कानन्तरं मया एकस्य नीलाभयुक्तस्य परिधानस्य चयनं कृतमेव।

यद्यपि दशवादने वायुपत्तने गन्तव्यमासीत् परन्तु अहं सप्तवादनाद् एव तत्कृते सज्जां प्रारब्धवती। यदाऽहं स्वकीयसौन्दर्यसज्जां (मेक-अप) विधाय दर्पणे आत्मानं निरूपितवती तदा नववादनसमयः सञ्जातः। अभिनवपरिधाने मम सौन्दर्यम् अद्वितीयम् अतुलनीयं च संवृत्तम्। अहं सज्जीभूय स्वजनन्याः कक्षे यदा प्रविष्टवती तदा साऽपि रूपसज्जां विधाय पुरुषाकृतिप्रमाणे दर्पणे स्थित्वा आत्मानं निरूपयति स्म। सा तदानीं स्वकीयां वेणीं परिष्कुर्वाणा आसीत्। मम जनन्यै धवलवर्णाः शाटिकाः अतिशयं रोचन्ते स्म। साम्प्रतमपि सा कौशेय-श्वेत-शाटिकामेव परिधत्तवती। तस्याः कण्ठे स्फटिकमणिमाला विराजते स्म।

अहं तस्याः समीपे गत्वा यदा तस्याः पृष्ठभागे स्थित्वा दर्पणे विलोकितवती तदा एवं प्रतीयते स्म यत् यथा आवां जननी-दुहितरौ न वर्त्तेते, प्रत्युत स्वसारौ इव प्रतीयेते। प्रथमदर्शने तु कश्चिदपि आवां निरीक्ष्य सामानाकृतियुक्ते समानगौरवर्णे समानलम्बायमाने चाऽनुभूय सहसा स्वसृरूपेणैव कल्पयिष्यते स्म। सा सम्प्रति द्वाचत्वारिंशद्-वर्षदेशीया बभूव परन्तु तस्या आनने युवतीव अभिनव्यता भव्यता स्पृहणीयता आकर्षकता च विराजते। तस्याः कश्चिदपि शिरोरुहः धवलतां न सम्प्राप्तः। मम जनन्यै श्वेतपरिधानं बहु रोचते। तस्याः परिधान-मञ्जूषायां (वार्ड-रोब) पर्याप्तसंख्यायाम् अभिनवानां श्वेत परिधानानां सञ्चय आसीत्। सा सदैव रुचिरां वेणीं सन्दधाति। यदि कदाचित् कस्मिंश्चित् आमन्त्रणादिषु विशिष्टभोजन-निमन्त्रणावसरेषु च गच्छति तदा भव्यताप्रदं गरिमामयं च परिधानं धारयति।

स्वावलम्बिताकारणाद् भौतिक-सुख-सौविध्य सम्प्राप्तिकारणात् स्वास्थ्यं प्रति दत्तावधानात् गरिष्ठ-स्निग्ध-भोजन-परिहारात् विशुद्ध-शाक-फलादि-भोजन प्राधान्यात् योगासन-प्राणायामादि-नित्यसम्पादनात् तस्याः शरीरमपि किशोरवयःप्राधान्यमिव परिलक्ष्यते स्म। जनास्तु सहसा एतत् स्वीकर्त्तुमेव न पारयिष्यन्ते यदहं तस्याः सुता एव भवामि। परन्तु मम जननीमहोदया सदैव सर्वत्र आत्मनो गम्भीरतामेव प्रकटयति स्म। सा कदाचिदपि काचित् किशोरी इव चञ्चलताम् अविवाहितमहिलेव वा अगम्भीरतां न अद्योतयत। सा सदैव प्राध्यापिकाया गौरवमेव गृह्णाति। पुनरपि सा अद्य मह्यमपि बहु रोचते स्म। सात्त्विकतायुक्ते श्वेतपरिधानेऽपि तस्याः सौन्दर्यम् अनिर्वचनीयम् आसीत्। विशिष्टां रूपसज्जां (मेकअप) विनाऽपि तस्याः कपोलेषु लालिमा अधरेषु च रक्ताभता स्पष्टतया परिलक्ष्यते। वस्तुतः तस्याः सात्त्विकवृत्तिप्रधाना सा सामान्यता सहजता च तदानीं किमप्यसाामान्यं सौन्दर्यमेव द्योतयति स्म। इदमेव च तस्याः परमं वैशिष्ट्यं बभूव।

अस्तु, वायुपत्तने यदा वायुयानं समागतं तदा अहं कुतूहलदृष्ट्या चन्द्रकान्तं परिचेतुं सावधाना जाता। मातुलमहोदयेन तु तस्य छायाचित्रं पूर्वमेव प्रेषितमासीत्। सोऽपि संभवतः दूरत एव आवां विलोक्य अनुमानबलेन आवयोः समीपे समागत्य जनन्याः समक्षं स्थितो भूत्वा अब्रवीत्-

"किं भवती सुभद्रायाः माता एव वर्त्तते?"

मम जनन्याः कृते एवंविधः प्रश्नः विस्मयकारको नवीनश्च नाऽभवत्। सा सहजभावेन स्मितिं धारयित्वा प्रत्यब्रवीत्-"एवम्, सत्यमेव त्वया अभिहितम्"।

चन्द्रकान्तेन समं टैक्सीद्वारा यदा वयं गृहमागच्छामः स्म तदानीम् एवं प्रतीयते स्म यत् मरुस्थले शाद्वलस्थलं समागतम्। स गृहं प्रति गच्छन् मार्गे एव अस्माभिः समं निःसंकोचमानसः सन् वार्त्तालापं विधत्ते स्म। पुनरपि तद्व्यवहारे शिष्टता आसीत् वार्त्तालापे च गाम्भीर्यं प्रतीयते स्म। स अमेरिकासंस्कृति-संवलितस्तु कथमपि न प्रतीयते स्म।

गृहे प्रत्यागते सति मम जननी तम् पृष्टवती-"अयि! चन्द्रकान्त! किं ग्रहीष्यसि? चायं वा किमप्यन्यत् शीतलं पेयं वा?"

"पूर्वं त्वहं भोजनं ग्रहीष्यामि। ह्यस्तने निशि न किमपि मया भुक्तम्" चन्द्रकान्तः प्रत्यूचे।

"किं वायुयाने यात्रिभ्यः रात्रिकालीनं भोजनं न प्रस्तुतम्?" अहं वार्त्तां कर्त्तुकामा आश्चर्येण पृष्टवती।

"भोजनं तु प्रस्तुतमासीत् परन्तु मया जानताऽपि तत् सर्वं न स्वीकृतम्" चन्द्रकान्तः प्रत्यब्रवीत्।

"तत् कथम्? किं भवदीयं स्वास्थ्यं समीचीनं नाऽभूत्?" अहं पुनः पृष्टवती।

"न हि एवं नास्ति। मया विचारितं यत् पञ्चवर्षानन्तरं मातृभूमिं भारतम् आगच्छामि अत एव स्वदेशे गत्वा एव तत्रत्यं भोजनं ग्रहीष्यामि"-चन्द्रकान्तः स्मितवदनः प्रत्युवाच।

"भवान् स्नानादिकं विधाय प्रसन्नमानसः विश्रान्तश्च भवतु तावदहं सत्वरमेव भोजनं साधयामि"-मम जननी तम् अब्रवीत्।

ततः स यावत् कालपर्यन्तं मुखं प्रक्षाल्य श्मश्रुपरिमार्जनं विधाय स्नानं च सम्पाद्य भोजनार्थम् उद्यतः सञ्जातः तन्मध्य एव मदीया जननी सकलां भोजनसामग्रीं भोजनमञ्चे व्यवस्थापयत्। तत्सर्वं भोजनं निरीक्ष्य चन्द्रकान्तस्तु अतीव प्रसन्नः संजातः। तस्याग्रहं विलोक्य वयं सर्वेऽपि सहैव भोजनार्थम् समुपविष्टाः। स

भोजनकालेऽपि अतिशयां प्रशंसां कुर्वाण आसीत्। एवं बहुवारं प्रशंसां प्रकुर्वन् स पृष्टवान् एव-"एतत् सर्वं केन निर्मितम्?"

मम जननी एव सर्वां भोजनसामग्रीं रचयामास। तद्द्वारा निर्मितस्य सकलस्य भोजनस्य प्रशंसा अस्माकं परिवारे प्रायः सर्वत्रैव प्रवर्त्तते"-अहं सहजतया प्रोक्तवती।

"अहो! सुन्दरम् ..... अतिसुन्दरम्" इति कथयन् स मम चक्षुषोर्मध्ये साभिप्रायं विलोकयन् अब्रवीत्-"किं भवती अपि एतादृशं सुन्दरं स्वादिष्टं सुरुचिपूर्णं च भोजनं निर्मातुं शक्नोति?"

"न हि भो! नैवम्" इति कथयन्ती अहं तदभिमुखं जलपरिपूर्णं चषकपात्रं स्थापयन्ती ईषद् विहस्य च प्रोक्तवती-"भोजननिर्माणे कथमहं स्वजनन्या समं प्रतिद्वन्द्वितां कर्त्तुं समर्था भविष्यामि? एवमपि न मम भोजननिर्माणे काचिदपि विशिष्टा प्रवृत्तिर्वर्त्तते न च तत्र मम काचिदपि अभिरुचिरेव।"

"अस्तु, कस्मिन् विषये भवदीया विशिष्टा कार्यप्रवृत्तिः स्वभावाभिरुचिर्वा?" चन्द्रकान्तः किञ्चिद् विहस्य प्रसन्नवदनः पृष्टवान्।

"अध्ययनादिषु मम सहजा प्रवृत्तिः ..... पाकशालायां तु प्रवेशमात्रेणैव अहं भीतियुक्ता भवामि"-अनायासमेव वाक्यमेतत् मम मुखात् निःसृतम् अभवत्।

वस्तुतः अहं मदीया माता च, उभावप्यावां श्रीचन्द्रकान्तं स्वीयव्यूहरचनानुसारेण मनोनुकूलं विधातुं सचेष्टे बभूविव, येन स विवाहनिर्णयावसरे अस्मत्पक्षमपि गम्भीरतया विचारयेत्, अहं च तस्य हृदये स्थानं प्राप्तुं समर्था भवेयम्। मदीया जननी तदर्थं प्रातः प्रत्यहमेव भिन्नं भिन्नं स्वादिष्टं स्वास्थ्यप्रदं च जलपानं संसाधयति। तत्रैव मध्याह्नकालीने रात्रिकालीने च भोजनेष्वपि वैभिन्न्यं विराजते स्म। मन्ये सा स्वकीयपाककलायाः कौशलमेव एतेषु दिनेषु प्रकटयति स्म। चन्द्रकान्तस्तु भारतीय-भोज्य-सामग्रीः प्रति विशिष्टामभिरुचिं धारयति स्म। स प्रायः कथयति यत् एवंविधानि स्वादिष्ठानि भोजनानि तु अमेरिकायां न कोऽपि संसाधयति नैव च सरलतया तत्र प्राप्तुं शक्यन्ते"।

वयं सर्वेऽपि कदाचिद् गृहाद् बहिर्यदा भ्रमणार्थं गच्छामः मनोरञ्जनाय स्वादपरिवर्त्तनाय च नगरस्य विशिष्टेषु भोजनालयेष्वपि भोजनं कुर्महे तत्रापि स जननीद्वारा निर्मितस्य भोजनस्यैव महतीं प्रशंसां प्रकटयति स्म। मम जननी अपि न केवलं तस्य आवासकक्षस्यैव सुव्यवस्थां साधयति स्म परन्तु तस्य सर्वविधं सौविध्यमपि ध्यायति स्म। मन्ये श्रीचन्द्रकान्तेनाऽपि कदाचित् नाऽनुभूतं स्याद् यत् स कस्यचित् परकीयस्य गृहे संस्थितो वर्त्तते।

एवं ततस्तु मम जननी तं साधयितुं तथाविधान् अन्यान् प्रयत्नान् अपि

करोति स्म इतस्तु अहमपि तं स्वसौन्दर्यराशिभिः परिधानविशेषैः वार्त्तालाप-परम्पराभिः स्मितपूर्वाभिभाषणैश्च प्रभावयितुम् आत्मानुकूलं वा विधातुं सदैव प्रशंसारता अभूवम्। अहम् अनेकधा तेन समं सायंकाले भ्रमणार्थमपि गृहात् निःसृतवती, नानविधाश्च वार्त्ताः कृतवती। आवयोः वार्त्ताविषयः प्रायः अमेरीकादेशः एव अभूत्। चन्द्रकान्तस्तु अमेरिकादेशस्य तदीय-सामाजिक-व्यवस्थायाश्च विषये नानाविधान् वृत्तान्तान् निवेदयति स्म। अहं तेन समं सायंकालीन-भ्रमणकार्ये तस्य समक्षम् आत्मानं पर्याप्तं निःसंकोचयुक्तम् आधुनिकबालामिव प्रस्तौमि स्म। मम जननी अपि एतादृशेषु व्यवहारेषु कदाचिदपि हस्तक्षेपं न कृतवती।

रात्रौ वी०सी०आर० यन्त्रे आवां चलचित्रमपि पश्यावः स्म। मम जनन्या अभिरुचिस्तु वी०सी०आर० यन्त्रे दूरदर्शने च काचिद् विशिष्टा नाऽभूद् अत एव यावत्पर्यन्तं चलचित्रं न समाप्तं भवेत् तावत्पर्यन्तं सा स्वकीयकक्षे एव पुस्तकपठने उत्तरपुस्तिकानिरीक्षणे वा समयं यापयति स्म। एवम् आवां मित्रवत् परस्परं संकोचरहितौ सहजस्वभावौ च बभूविव। चन्द्रकान्तोऽपि अस्मद्गृहे पूर्वनिर्धारित-कार्यक्रमानुसारं न केवलं सप्ताहपर्यन्तम् अपितु नवदिनपर्यन्तं स्थितिमकरोत्।

इतः प्रस्थानात् एकदिवसपूर्वमेव आवां समुद्रे निमज्जतः सूर्यस्य सौन्दर्यम् अवलोकितुं सागरतटे गतवन्तौ। क्षितिजान्ते समुद्रे शनैः-शनै निमज्जन्तं दिवाकरं विलोक्य सहसा मम मुखात् अनायासमेव निःसृतम्-

"अहो! कियती सौन्दर्य-सम्पन्ना इयं सन्ध्या?"

"परन्तु भवत्या अधिका सौन्दर्ययुक्ता नास्ति" चन्द्रकान्तः स्मयन्निव विशष्टभावपूर्वकम् प्रोवाच।

"ओह! ..... एवम्? किमहं वस्तुतः सौन्दर्यसम्पन्ना?" अहमपि ससम्भ्रमम् उक्तवती।

"भवती तथाविधा सौन्दर्यसम्पन्ना वर्त्तते यत् यदि अहं कविरभविष्यम् तदा एकं महाकाव्यं भवतीम् उपलक्ष्य अलेखिष्यम्" चन्द्रकान्तः चाञ्चल्ययुक्तः सन् प्रोवाच। पुनः स किंचित् गम्भीरतायुक्तो भवन् अब्रवीत्-"एवं प्रतीयते यद् ब्रह्मा भवतीम् अवकाशक्षणेषु सृष्टवान् .....।"

अहं तस्य वचनं निशम्य लज्जया रक्ताभकपोला संजाता। मम विचारः आसीद् यद् इतः परं स स्वकीयप्रेम्णः प्रस्तावं शनैः शनैः मदभिमुखम् उपस्थापयिष्यति। मम पाणिं वा स्नेहपूर्वकं निपीडयन् स्वहृदयस्थितं प्रेमभावं प्रकटयिष्यति। परन्तु तेन तथाविधं किमपि नाचरितम् न वा किमप्येवम् वाक्यं प्रोक्तं येन तस्य हृदयस्य प्रेमाभिप्रायाः प्रकटिताः भवेयुः। मन्ये मम सौन्दर्यविशेषस्य प्रभावेण तस्य मानसे

स्वप्रेम्णो भावं प्रकटयितुं साहसमेव न समुत्पन्नं स्यात्। पुनरपि मम विचारेण तु स मम सौन्दर्यप्रशंसां प्रकुर्वाणः स्वकीयाभिरुचेः प्रेम्णो व प्रमाणं प्रस्तुतवान् एव। मत्कृते तु एतावदेव पर्याप्तम् आसीत्। अहं तु प्रसन्नताधिक्येन मोदाधिक्येन वा प्रफुल्लितेव संजाता। मन्ये मया परीक्षायां समुत्तीर्णता समधिगता स्यात्। मम विचारेण चन्द्रकान्तः केवलं मदीय एव भविष्यति।

अन्येद्युः स कस्यचिद् अन्यस्य स्वकीयसम्बन्धिनः पार्श्वे प्रस्थितः। मदीया माता अहं च प्रायः आश्वस्ते एव आस्तां यत् स इतः स्वमानसे विशिष्टं प्रभावं नीत्वा प्रस्थित अस्ति। सप्ताहादप्यधिकं मम गृहे तस्य निवासः एतत् प्रमाणयति स्म यत् तस्य हृदये मत्कृते विशिष्टं स्थानम् अधिगतं वर्त्तते। यदि अहं तस्मै न अरोचिष्ये तर्हि मन्ये स सप्ताहात् पूर्वमेव इतः प्रस्थितोऽभविष्यत्।

अस्तु, तस्य प्रतीक्षां कुर्वाणानाम् अस्माकं द्वादश दिवसाः व्यतीताः परन्तु तस्य कश्चिदपि समाचारः अस्माभिः न समधिगतः, न वा तेन दूरभाषद्वारा काचित् सूचनैव प्रदत्ता यत् स क्व वर्त्तते, तथा कदा पुनः समागमिष्यति। स एवंविधः हृदयहीनः स्वार्थी वा भविष्यति इति तु मया कदापि न विचारितमासीत्। मम जननी अपि चिन्तापरवशा संवृत्ता तथा चाहमपि औदासीन्यान्धकारे निमग्नेव सञ्जाता।

आवयोरियं चिन्ताऽपि निष्कारणं नाऽभवत्। यतो हि अन्यत्र स्थानद्वयेपि विवाहार्थं कन्या-निरीक्षणार्थमेव स प्रस्थित आसीत्। येषां गृहे स गत आसीत् तेषां परिवाराणां विषये अस्माकमपि कश्चित् साधारणः परिचयः सामान्यज्ञानं च बभूव एव। तेषाम् आर्थिकी स्थितिः सामाजिकी प्रतिष्ठा च अस्मदपेक्षया पर्याप्तं सुदृढ़ा आसीत्। अथ तेषां परिवाराणां कन्यका अपि सुदर्शनीयाः निःसंकोचस्वभावाः तत्परताप्रियाश्च (स्मार्ट) अभूवन्। ताः अमेरिका-लन्दनादि-देशेष्वपि स्वीयसम्बन्धिनां समीपे प्रतिवर्षं तथैव गच्छन्ति स्म यथा वयं मुम्बयी-बेंगलोरनगरं हैदराबादनगरं वा प्रतिगच्छामः। मन्ये स तासामेव संजाले निबद्धः स्यात्। एवंविधाः कन्यकाः कमपि पुरुषम् आत्मनोऽधीनं कर्त्तुं मनोनुकूलं वा विधातुं नितरां समर्था भवन्ति।

अस्तु, पञ्चदशदिवसाऽनन्तरं श्रीचन्द्रकान्तः अमेरिकाप्रस्थानात् दिनद्वयपूर्वम् अस्माकं गृहे यदा समायातस्तदा अस्माकं प्रसन्नतायाः पारावार एव नासीत्। यदा मम जननी किञ्चिदुपालम्भस्वरेण तम् उक्तवती तदा तेन ज्ञापितं यत् तस्य ते सम्बन्धिनस्तं क्षणपर्यन्तमपि स्वकीयचक्षुर्भ्यः पृथक् न कामयन्ते स्म। अहं तु महता प्रयत्नेन कथं कथमपि तान् परित्यज्य इह समागतोऽस्मि। यदि तेषां वशः स्यात् तदा तु ते माम् अमेरिकादेशमपि गन्तुं नाऽनुमन्येरन्।

चन्द्रकान्तस्य इहागमनेन मम हृदयतन्तवः पुनरेव तेन सह सुसम्बद्धा इव भवितुं प्रारब्धाः। आशादीपा पुनरेव सन् दीप्ता अभवन्। एकदा तु स माम्

उक्तवान्-"अयि! सुभद्रे! भवत्परिवारमध्ये या प्रसन्नता मया इहागत्य प्राप्यते सा प्रसन्नता तु मया क्वचिदपि स्वाज्ञातिसम्बन्धिमध्येऽपि नैव प्राप्ता। भवतीभिः समं यापितम् एकैकं क्षणमपि मत्कृते सुखप्रदायकं स्मरणीयं च प्रावर्त्तत। भवती सहृदया स्निग्धस्वभावा च वर्त्तते। अहम् अमेरिकादेशं गत्वा भवत्यै पत्रं प्रेषयिष्यामि"।

तस्य वाक्यमेतत् मत्कृते नभःस्पर्श इव आसीत्। अहम् आकाशे उड्डयितुम् प्रारब्धवती। यदाऽहं तस्य चक्षुषी निरूपितवती तदा तत्र मह्यं स्वप्नसागरः तरंगायमाणः प्रतीयते स्म। तस्य अधरेषु स्मितिभाव अत्यन्तं मनोहरः अनिर्वचनीयश्च प्रतीयते स्म। मम हृदयस्य स्पन्दनमपि तदानीम् अनियन्त्रितमिव समभवत्।

अथ अन्येद्युः वयं वायुपत्तने सौप्रास्थानिकं कर्त्तुं गतवन्तः। स स्वकीयं कमपि सम्बन्धिनं स्वीयप्रस्थानयात्राविषये नेव विज्ञापितवान्। अत एव कोऽपि वायुपत्तने न समागत आसीत्। प्रस्थानात् पूर्वं स मम जननीम् एवम् अवादीत्- "पितृव्ये! मम विशिष्टसुखसुविधानां भवत्या चिन्ता कृता सदातिथ्यं च सम्पादितं तदर्थमहं सर्वदैव अनुगृहीतो भविष्यामि। भवत्करसम्पादितानि रुचिकराणि सुस्वादयुक्तानि भोजनानि तु मया कदाचिदपि विस्मर्त्तुं न शक्यानि। तत्र गत्वा शीघ्रमेव कुशलतासूचकं पत्रं प्रदास्यामि" इति।

अहन्तु विवाहसम्बन्धे स्वसफलताविषये प्रायः निश्चिन्ता आसम्। अत्र मम विजयस्य पूर्णो विश्वास आसीत्। यतो हि अस्माभिः श्रीचन्द्रकान्तस्य हृदयं स्वव्य-वहारैर्मोहितमेव इति मे मतम्। स अस्मत्तः प्रभावितो भूत्वा प्रस्थित आसीत्। यदि अहं तत्कृते रुचिरा न अभविष्यं तदा स पुनः नैवाऽत्र आगमिष्यत्, नैव च दिनद्वयम् अत्र अस्थास्यत्। अहं तु स्वत एव तं सर्वविधं प्रसादयितुं प्रयत्नं कृतवती। अहम् आत्मानं सर्वतोभावेन नवयुगानुरूपाम् आधुनिकां कन्यां प्रमाणयितुं प्रयत्नं कृतवती। इदानीन्तनाः युवकाः तथाविधामेव कन्यकामभिलषन्ति पत्नीरूपेण च स्वीकर्त्तुं समीहन्ते। अत एवाऽहम् आत्मानं सबलरूपेण तदनुकूलामेव मन्ये स्म। पुनरपि अहं परिणामस्य प्रतीक्षां सोत्सुका कामये स्म।

अथ कतिपयदिवसस्यानन्तरं यस्मिन् दिवसे तस्य पत्रं समागतमसीत् तस्मिन् दिवसे किञ्चिदस्वस्थतावशात् अहं विश्वविद्यालयं न गता अभूवम्। मम जननी च स्वकीये महाविद्यालये प्रस्थिता अभूत्। पत्रं च मम नामधेयेनैव प्रेषितमासीत् अत एव तदहं समुदघाट्य पठितुं प्रारब्धवती-

मम प्रिय-मित्रास्पदे! सुभद्रे!

सप्रेम नमस्काराः।

अहं स्वदेशे भारते कथमागतोऽभूवम् इति तु सर्वं गोपनीयं रहस्यात्मकं

वा नासीत्। भवत्यां सुनिश्चितमेव बहूनि वैशिष्ट्यानि वर्त्तन्ते,परन्तु यस्य वस्तुनः आवश्यकतामहं मार्गयामि स्म, मया क्वचिदपि यात्रायाम् अस्यां न सम्प्राप्ता। अहं स्वज्ञाति-सम्बन्धिनां गृहेऽपि एतदुद्देश्येनैव गतवान् यत् तत्रापि काचित् मनोनुकूला कन्यका प्राप्नुयात्। नवयुगानुरूपाः तत्परताप्रियाः चञ्चलस्वभावाः अभिरूपतमाः आधुनिकाः कन्यकास्तु इह अमेरिकादेशेऽपि बह्व्यः समुपलभ्यन्ते। यदि तथाविधया कन्यकया समं मया विवाहः करणीयः स्यात् तर्हि कथमहं भारते समागमिष्यम्? वस्तुतः अहं तथाविधां सुन्दरीं शिक्षितां कन्यकां वाञ्छामि स्म यस्यां सभ्यता सुशीलता स्यात्। या च गृहकार्यव्यसनिनी भवेत्। भोजनं सुन्दरं रुचिकरं पाचयितुं समर्था स्यात्। गृहस्थस्य समग्रमुत्तरदायित्वं च मनोयोगेन निर्वहेत्।

अहं तु एतदवलोक्य नितराम् आश्चर्यचकितो भवामि यत् भवदीया जननी तथाविधा गृहकार्यसम्पादन-तत्परा सुव्यवस्थिता गम्भीरप्रकृतियुक्ता भोजननिर्माणे च सर्वथा प्रवीणा वर्त्तते परन्तु ते सर्वे गुणाः भवत्यां कथं न समाविष्टाः? अहो! कष्टम्! यदि भवती अपि स्वजननीसदृशा अभविष्यत् तर्हि मम भारते समागमनस्य सर्वं प्रयोजनं सिद्धमभविष्यत्। पुनरपि भवतीनां सर्वासां साहचर्यम् आतिथ्यवृत्तिं च सर्वदैव स्मरणीया भविष्यति।

अहम् अनुगृहीतोऽस्मि सर्वदा भवतीनाम्। भवती अपि मां कृपया मित्रमिव जानातु स्वीकरोतु च। सदैव शुभं कामयमानः-

भवदीय एव

चन्द्रकान्त उपाध्यायः

तस्य चैतत्पत्रं पठनसमाप्तिसमकालमेव मदीयहस्तात् प्रच्युतं भवत् नीचैः पतितम्।।

***

विवशता

यथा यथा पुत्रस्य अनुजप्रतापस्य विदेशे प्रस्थानस्य दिवसाः समीपम् आयान्ति स्म, तथा तथा पितुः श्रीरामप्रतापस्य चक्षुषोः उदासीनता-उद्विग्नता-दीनताभावाश्च वर्धन्ते स्म। एक एव पुत्रः, यदि सोऽपि विदेशे भृतिं प्राप्य तत्रैव स्थायिरूपेण प्रवसेत् तदा तस्य अवशिष्टस्य जीवनस्य का व्यवस्था भविष्यति? गीता (श्रीरामप्रतापस्य पत्नी) तु पञ्चवर्षपूर्वमेव चतुःस्कन्धेषु समारुह्य सर्वथा उऋणीभूता। तदनन्तरं तु जीवनस्य समग्रं रागजातं वैराग्युक्तमेव बभूव। एकमात्रम् आशासूत्रधारः सुतः एव वर्त्तते अनुजप्रतापः, परन्तु सोऽपि साम्प्रतं परित्यज्य विदेशं प्रतिष्ठते।

यदि स एकाकी एव विदेशं गच्छेत् तदापि किंचित् समीचीनं भवेत् परन्तु स तु पत्नीं पार्वतीं सप्तवर्षीयं सुतं राहुलमपि स्वकीयेन समं नीत्वा प्रतिष्ठते। आत्मनः पृष्ठे च एकं गहनम् औदासीन्यम्, विविधानि संस्मरणानि,असत्यप्रायाणि आश्वासनानि च प्रदाय स प्रतिष्ठते। कः खलु प्रत्यागमिष्यति इह? प्रतिवेशिनः श्री शिवप्रसादस्य सुतोऽपि एवमेव एकवर्षार्थं विदेशे प्रस्थित आसीत् परन्तु अद्य पर्यन्तं स पुनः न प्रतिनिवृत्तः।

जीवनस्य अवशिष्टा दिवसा एवमेव एकाकिरूपेण यापनीया भविष्यन्तीति श्री रामप्रतापमहोदयैः कदापि विचारितमेव नासीत्। अन्तरात्मनि स्थिताम् उद्विग्नतां व्याकुलतां च ते कं श्रावयिष्यन्ति? तत्र कश्चित् श्रोतुकाम अस्ति एव नहि। पक्षी स्वकीयं नीडमेव विहाय उड्डयितुं प्रयतते। पुत्रस्य अनुजप्रतापस्य जर्मनीदेशे गमनस्य प्रसन्नतायां ते सर्वमिदं विस्मृतवन्त आसन्। परन्तु साम्प्रतम् आनने समुत्पन्नाः स्वेदकणास्तेषां समुद्विग्नतां सुस्पष्टमेव प्रकटयन्ति। मनसि वेदनानां सागरः संक्षुब्धः सन् सोर्मिमालस्तरंगायते। पुनरपि ते उपरिष्टात् आत्मानं सामन्यमिव सुस्थाप्य तथैव दर्शयितुं प्रकटयितुं वा उपक्रामन्ति।

अतिथिकक्षे सर्वाणि वस्तुजातानि एकत्रीक्रियन्ते स्म। वस्तुकक्षात् (स्टोर रूम) लम्बायमानम् ओवरकोटवस्त्रमानीय श्रीरामप्रतापमहोदयाः अन्येषु वस्तुजातेषु मध्ये संस्थापयन्तः वधूम् पार्वतीम् अब्रुवन्-"अयि वधु! एतदपि सहैव नेतव्यम्। श्रूयते यत् तत्र बहु शीतं प्रवर्तते। ह्यस्तने एव दूरदर्शने श्रुतं यत् तत्र तापमानं शून्यादपि निम्नतरं अस्ति"।

"जानामि, अनुः (अनुजप्रतापस्य संक्षिप्तं नामधेयमेतत्) एव वस्तुकक्षे एतत् सुरक्षितं कृतवान् आसीत्।" वधू पार्वती अन्यमनस्केन उत्तरितवती।

"सर्वा ओषधयस्तु सुरक्षिताः? होम्योपैथिकौषधयस्तु सहैव नेतव्याः।

अनुजप्रतापस्य रोगाः होम्योपैथिक-औषधिभिरेव शाम्यन्ति''। श्रीरामप्रतापमहोदयाः पुनरुक्तवन्तः।

अनुजप्रतापः समीपस्थे एव कक्षे पितृमहोदयानां सर्वाणि वचनानि शृणोति स्म। सोऽब्रवीत्-"पितृमहोदयाः! कृपया भवन्तः आरामपूर्वकं तिष्ठन्तु। वयं सर्वे यथासम्भवं शनैः-शनैः सर्वं सम्पादयिष्यामः। तत्र भवन्तः किमपि चिन्तां व्याकुलतां वा न धारयन्तु''।

अस्तु, श्रीरामप्रतापमहोदयानाम् अस्वाभाविकैः व्यवहारैःचिन्तायाः रेखाः तदीयानने स्पष्टमेव विद्योतन्ते स्म। ते समुद्विग्नताग्रस्ता भूत्वा संभवतः सहजां स्थितिं न धारयन्ति स्म। निर्निमेष-नेत्राभ्यां ते पुत्रम् अनुजप्रतापं सर्वं वस्तुजातं यथास्थानं विधाय यात्रासज्जां विदधानं दर्शं दर्शम् अन्यमनस्का इव भवन्ति स्म।

अनुजप्रतापस्य मानसं तु स्वकीयं चमत्कृतिपूर्णं भविष्यं विचार्य चञ्चलायमानम् आसीत्। परन्तु श्रीरामप्रतापमहोदयानां मानसम् आगामिनि काले सम्भावितां रिक्ततां शून्यताम् एकान्ततां च ध्यायं ध्यायं गहनविषादे निमज्जितं भवत् बहुव्यथितं बभूव। अनुजप्रतापस्य मानसेऽपि पितृमहोदयम् आत्मना सममेव विदेशं नेतुमसमर्थ इति विचिन्त्य दुःखमेव बभूव। परन्तु जर्मनीदेशगमनस्य तस्य मनसि या लालसा प्रवर्तते स्म सैव लालसा तदन्तर्मानसे तथाविधान् भावान् दुर्दमयाञ्चकार। श्रीरामप्रतापमहोदयाः अपि बहुकालपर्यन्तं तत्र स्थातुमसमर्था इति विचिन्त्य बहिर्द्वारमागत्य समुपविष्टवन्तः।

सप्तवर्षीयः राजीवः (श्रीरामप्रतापस्य पौत्रः) शयनं समाप्य यदा प्रतिबुद्धस्तदा बहिरागत्य पितामहमहोदयानां क्रोडे निलीन इव सञ्जातः। तस्य शिरसि स्नेहाधिक्येन हस्तं सञ्चालयन्तः श्रीरामप्रतापमहोदया अब्रुवन् "साम्प्रतं तु त्वं जर्मनीदेशे प्रतिष्ठसे, तत्र गत्वा दूरभाषं तु करिष्यसि? मां विस्मरिष्यसि तु न?" परन्तु राजीवः स्वीयवायुयान-यात्रायाम् उत्सुकतां दधानः पितामहम्प्रोक्तवान्-"अहं तु आकाशाद् भवन्तं टा .....टा .....कुर्वन् द्रक्ष्यामि उपरिष्टात् .....''।

राजीवद्वारा प्रोक्तं बालसुलभम् उत्तरमाकर्ण्य अश्रुपूर्णाभ्यां नयनाभ्यां ते चिन्तितुमारब्धवन्तः। केन समं ते मध्याह्ने रात्रौ वा विविधाः बालोचिताः वार्त्ताः विधास्यन्ति? कं रामायणीयाः पौराणक्यः महाभारतीयाः वा कथाः श्रावयिष्यन्ति? केन सह टॉफी-प्रदानस्याग्रहं निशम्य आपणे गमिष्यन्ति? कं वा तर्जयिष्यन्ति? केन सह क्रीडासक्ताः भविष्यन्ति? एवम् आगामिदिवसेषु प्रवर्तिष्यमाणा एकान्तताऽनुभतिः तेषां मानसे गहनतया औदासीन्यम् उत्पादयामास। हृदि तथाविधा तीव्रवेदनानुभूतिः समुत्पन्ना येन ते पौत्रं राजीवं भुजयोर्मध्ये विधाय गाढम् आश्लिष्टवन्तः।

"पापा कथयति-यत् तत्र बहूनि क्रीडनकानि मिलन्ति। अहं भवतेऽपि तत आनेष्यामि"-राजीवः बालसुलभां सरलतामाधाय पितामहं श्रीरामप्रतापमहोदयमब्रवीत्।

श्रीरामप्रतापमहोदयाः कस्यचिदपि प्रश्नस्य समीचीनम् उत्तरं न प्राप्नुवन्ति स्म। सर्वे स्वकीये कर्मणि एव व्यापृता आसन्। मध्याह्नकाले तेषां ज्येष्ठतनया यशोदा यदा समागता तदा तेषां मनसि समुत्थिता समुद्विग्नता कथंचित् शान्ता संजाता। आगमन-समकालमेव सा अनुजप्रतापं पृष्टवती-"भ्रातः! किं विदेशगमनस्य सकलं कार्यजातं यात्रासज्जा च पूर्णतामगात्? किम् अहमपि किञ्चिद् साहाय्यं कुर्याम्?"

"न हि भगिनि! सर्वं प्रायः सुसम्पन्नम्। यत् किञ्चिद् अवशिष्टं वर्त्तते। तदपि शनैः पूर्णं भविष्यति।" अनुजप्रतापः प्रत्यूचे।

"तव वायुयानस्य उड्डयनकालः (फ्लाइट) कदा वर्त्तते?"

"सायं पञ्चवादने वर्त्तते। परन्तु द्विवादनपर्यन्तं वायुपत्तने गन्तव्यं भविष्यति।अस्माभिः समं पर्याप्तानि वस्तुजातान्यापि वर्त्तन्ते। तेषाम् अन्वीक्षणं तत्र कारयितव्यं भवति"। अनुजप्रतापः यात्रामञ्जूषाः (अटैची) सुस्थापयन् ज्येष्ठभगिनीं यशोदाम् अग्रे प्राह-"त्वं पितृमहोदयानां समीपे गच्छ। साम्प्रतं ते आत्मानम् एकाकिनमसहायं चाऽनुभूय अत्यन्तम् अन्यमनस्काः दुःखिताश्च प्रतीयन्ते"।

भ्रातुः अनुजप्रतापस्य वचनं समाकर्ण्य यशोदा किमपि न प्रत्युक्तवती। पितृमहोदयानां मुखमण्डलं विलोक्य तस्या स्वकीयमाननमपि नैराश्ये निपत्य आभाविहीनमिव संजातम्, यतो हि तेषां वाणी अपि हिम इव शीतला आसीत्।

यशोदा पितृमहोदयानां साम्मुख्यं कर्त्तुम् असमर्था बभूव। पुनरपि आत्मानं संयम्य उक्तवती-"त्वमेव कथयस्व, किं ते अत्र एकाकिन एव निवासं विधास्यन्ति? कथम् एतेषां तथाविधो दुराग्रहः? मया सह कथं न निवसितुं वाञ्छन्ति.....?"

"यदि सर्वं मम वशे अभविष्यत् तर्हि अहं तु पितृमहोदयान् आत्मना सहैव विदेशं नीत्वा प्रास्थास्यम् .....परन्तु तत्र मम नवीनमेव नियोजनं वर्त्तते अत एव साम्प्रतं तु" .....। अनुज प्रतापः शनैः शनैः स्वसारं यशोदाम् अकथयत्।

उपरिष्टं सर्वं वार्त्ताजातं निशम्य श्रीरामप्रतापमहोदयाः कक्षस्याऽभ्यन्तरे एव समागतवन्तः। ते प्रोचुः-"न हि पुत्र मम चिन्ता न कर्तव्या। मम जीवनं तु यथा तथा समाप्तमेव। तव चाऽत्र गमनाऽऽगमनमपि विदेशात् प्रायः प्रवर्त्स्यत एव"। पुनः ते किञ्चिद् विरम्य स्वकीयहृदयवेदनां दृढ़तापूर्वकं नियम्य आत्मानं सबलं दर्शयितुकामाः सन्तः-"त्वं निश्चिन्ततापूर्वकम् इतः प्रतिष्ठस्व ..... मम चिन्तां न कुरुष्व सर्वं समीचीनमेव सम्पत्स्यते अत्र"-इति प्रोच्य साश्रुनयनाः सन्तः स्वकीयं मुखमण्डलम् अन्यतः कृत्वा तूष्णीमभवन्।

सायंकाले टैक्सीयानं समागतम्। रामप्रतापमहोदया अपि वायुपत्तनस्थानपर्यन्तं गन्तुं कामयन्ते स्म परन्तु तस्य पुत्रः अनुजप्रताप एव तान् तथा कर्त्तुं प्रतिषिद्धवान्।

सर्वाणि वस्तुजातानि टैक्सीयाने संस्थाप्य यदा स पितृमहोदयानां चरणस्पर्शं कर्त्तुं नतोऽभवत् तदा श्रीरामप्रतापमहोदयानां नयनाभ्याम् अश्रूणां निरन्तरः प्रवाहः समुद्भवन् कपोलेषु समागतः। अन्ततस्ते कठिनतया आत्मनि नियन्त्रणं विधाय रुद्धकण्ठेन एतदेव वक्तुं समर्थाः अभूवन्–"पुत्र! निजस्वास्थ्यं प्रति ध्यानं विधातव्यम् तत्र च गत्वा शीघ्रमेव दूरभाषद्वारा कुशलक्षेमं वक्तव्यम्"।

"एवम् पितृमहोदयाः" इत्युक्त्वा अनुजप्रतापोऽपि अतिभावुकः सन् शिथिलचरणाभ्यां प्रचलन् टैक्सीयाने सपरिवारः समारुह्य प्रस्थितः। तद्गमनाऽनन्तरं च गृहे अवसादस्य नैराश्यस्य च नदः एव प्रवाहितो बभूव। टैक्सीयानस्य प्रस्थानाऽनन्तरमपि तेषां चक्षूंषि तद्दिशायामेव स्थिरीभूय बहुकालपर्यन्तं किमपि शून्ये विलोकयन्ति स्म।

अन्ततः तेषां पुत्री यशोदा तान् सुस्थितान् विधाय कथं कथमपि गृहे प्रावेशयत् पर्यंके च स्वस्थापयत्। पर्यंके च निषण्णाऽनन्तरं श्रीरामप्रतापमहोदयानां मनसि पुत्रस्य अनुजप्रतापस्य बाल्यकालं संस्मृत्य संस्मृत्य नानाविधाः विचाराः समुत्पन्ना भवितुं प्रारब्धाः।

° ° °

ते साम्प्रतमपि स्मरन्ति यत् अध्ययनवृत्तौ तेषां पुत्रः अनुप्रतापः यद्यपि सामान्य एव आसीत् परन्तु तस्य आकांक्षाः कल्पनालोकाश्च आकाशमेव चुम्बन्ति स्म। स्नातक–परीक्षा–समुत्तीर्णाऽनन्तरमेव तस्य मानसं स्नातकोत्तराध्ययने न बभूव, न च कस्मिंश्चिद् विश्वविद्यालये स्तरीयमहाविद्यालये वा तस्य प्रवेशावसरोऽपि सम्प्राप्तः। कथं कथमपि गृहनगरे एव स्थितायाम् एकस्याम् आयात–निर्यात संस्थायाम् अंशकालिक–कर्मचारिरूपेण तेन कार्यम्प्रारब्धमासीत्। रामप्रतापमहोदयास्तदानीं तम् उक्तवन्त आसन्–"किम् इदमपि किमपि कार्यं वर्त्तते? तदेपक्षया तु कश्चित् व्यावसायिकः पाठ्यक्रम एव त्वया ग्रहीतव्यः। एवं तु त्वं किम् आजीवनं मादृश एव साधारणो लिपिको (क्लर्क) भवन् जीवनं समापयितुमिच्छसि?"

परन्तु तत्सर्वं कथनं व्यर्थमेव बभूव। अनुजप्रतापेन पितृमहोदयानां वचनस्योपरि ध्यानमेव न दत्तम्। तस्य चिन्तनपरिधिरपि सीमिता एव बभूव। स स्वेन सामान्यनियोजनकर्मणा एव सन्तुष्टः प्रसन्नश्चाऽभवत्। स तत्र व्यावसायिकसंस्थायां कर्मणि नितान्तं मनोयोगेन अनुरक्तः सन् कार्याणि सम्पादयति स्म। फलतः शीघ्रमेव स स्थायिरूपेण नियुक्तिं प्राप्तवान्। तदनन्तरं स तत्संस्थायामेव वस्तुसंवेष्टन–कर्मणि (पैकिंगविभागे) कार्यं लब्धवान्।

कार्यनिष्पादनार्थम् अनुजप्रतापः अत्यन्त–मनोयोगेन उत्साहेन च जापानी–जर्मन डच–भाषाणां च सामान्यं ज्ञानमपि प्राप्य तत्तद्भाषासु विभिन्नवस्तूनां रंगादीनां

च नामधेयानि सम्यक्तया अवगतवान्। बहुधा तु तद्व्यावसायिकसंस्थायाः स्वामिनोऽपि कार्यनिष्पादनार्थं तस्याऽनुभवस्यैव आश्रयं गृह्णन्ति स्म। शनैः-शनैः अनुजप्रतापः वैदेशिकभाषाणां तथाविधं महत्त्वमधिगम्य चमत्कृत एवाऽभवत्। पुनः स भारतीयविद्याभवने गत्वा जर्मनभाषायाः विशेषं पाठ्यक्रमम् अंगीकृत्य तत्र विशेषयोग्यतामधिगतवान्।

अस्तु, एतन्मध्य एव तस्य विवाहः सम्पन्नः। विवाहाऽनन्तरमेव सौभाग्यात् स एकस्मिन् जर्मनव्यावसायिकप्रतिष्ठाने पूर्वापेक्षया अधिकमुत्तमं सेवायोजनं प्राप्तवान्। तत्र च तस्य कर्त्तव्यनिष्ठया परिश्रमेण च प्रभावितो भवत् तद्व्यावसायिक-प्रतिष्ठानं जर्मनदेशस्थिते स्वप्रधानकार्यालयेऽपि तं वारद्वयं प्रैषयत्। अन्ततः एकस्मिन् दिवसे स विशेषोत्साहसम्पन्नः चमत्कृताननः सन् यदा सायंकाले गृहे समागतस्तदा तस्य मुखमण्डलं निरीक्ष्य श्रीरामप्रतापमहोदयाः तं पृष्टवन्त एव-"किं भो मन्ये कश्चित् विशिष्टो वृत्तान्तो वर्त्तते? किं मत्तोऽपि निगूहयिष्यसि?"

"न हि पितृचरणाः! कथमहं भवद्भ्योऽपि किमपि निगूढं विधास्यामि!" पुनः स आरामपूर्वकं आसन्दिकाम् आकृष्य तत्रैव पितुः समक्षम् उपविश्य किंचित् कालं च विरम्य एवं वक्तुम् आरब्धवान्-

"अद्य कार्यालये जर्मनीदेशात् अस्माकं प्रधानप्रबन्धकमहोदय आगत आसीत्। स मां तत्रैव जर्मनीदेशे समागत्य कार्यार्थं न्यमन्त्रत्। तत्रैव स एकस्य नवीनस्य व्यावसायिक-कार्यालयस्य समुद्घाटनं करोति। स तत्र पूर्वम् माम् एव तत्र कार्यं कर्त्तुम् अवसरं प्रदातुं प्रस्तावमकरोत्। अहमपि विचारयामि यत् यदि अस्मिन्नेव प्रतिष्ठाने कार्यं करणीयमस्ति तदा मत्कृते जीवने समुन्नत्यर्थम् इतोऽधिकः कश्चित् सुन्दरावसरः न शक्यते प्राप्तुम्। अहं च मन्ये यद् एतत् भवत्कारणादेव सम्भवमभूत्।"

"मम कारणात्? कथं खलु?"-श्रीरामप्रतापमहोदयाः चमत्कृतः सन्तः साश्चर्यं प्रोक्तवन्तः।

"एव किल! यतोहि भवन्त एव मां बाल्यकालादेव परिश्रमस्य पाठं पाठितवन्तः ..... सत्यनिष्ठायाः शिक्षां प्रदत्तवन्तः .....पाप-पुण्ययोर्भेदं परिभाषितवन्तः ..... सदाचरणस्य मार्गे च प्रचलनाय प्रेरितवन्तः। यद्यपि पूर्वं त्वहमपि भवत्प्रदत्तोपदेशेषु विरक्त इव आसम्, उपदेशश्रवणे च समुद्विग्नतां धारयामि स्म परन्तु साम्प्रतं त्विदमेव प्रतीयते यद् भवन्त एव समीचीना आसन्। भवदुपदेशा एव च चिरन्तनसत्यतां धारयन्ति स्म"। पुनः किञ्चिद् विरम्य अनुजप्रतापः स्वपितृमहोदयान् स्निग्धभावेन श्रद्धासहितं निरूपयन् पुनरेवम् अब्रवीत्-

"मम मस्तिष्के परिश्रमस्य सत्यनिष्ठायाः सदाचरणस्य च ये संस्काराः समाहिता वर्तन्ते ते संस्कारा एव साम्प्रतं मम हितं साधयन्ति। यद्यहम् एतैः

संस्कारैः संयुक्तो न अभविष्यं तर्हि संसारस्य जनसम्मर्दे क्वचिदपि विलीनो भूत्वा अन्तर्हितोऽभविष्यम्। साम्प्रतं मयाऽनुभूयते यत् धनोपार्जनस्य कृते स्वसत्यनिष्ठायाः विक्रयणम् उपेक्षणं वा कथमपि नैव आवश्यकम् प्रत्युत कथंचित् सत्यनिष्ठा साधिका एव प्रतिभाति", इति कथयन् अनुजप्रतापः पितॄणां समक्षम् अश्रुपूर्णनयनः समवर्तत।

अनुजप्रतापस्य पत्नी पार्वती अपि समीपस्था एव सर्वम् एतद् दाशनिकं वार्त्तालापं कुतूहलेन शृणोति स्म। पुत्रस्यैतत् सर्वं वचनं निशम्य श्रीरामप्रतापमहोदयानां नयनेष्वपि तेजःसंयुक्तम् आभाकदम्बकं तदानीं समुत्पन्नम्।

ते प्रोक्तवन्तः–"एतद् वृत्तान्तमाकर्ण्य तु महतीं प्रसन्नतामनुभवाम्यहम्। विदेशे गत्वा धनार्जनाय एवंविधान् अवसरांस्तु बहवो मनुष्याः कामयन्ते परन्तु भाग्यशालिन एव तथाविधम् अवसरं प्राप्नुवन्ति। अस्तु, प्रस्थानस्य कदा विचारो वर्त्तते?"

"केवलम् एकमासस्य समयावधौ एव प्रस्थानं भविष्यति। अनुमतिपत्र-(पासपोर्ट)-पारपत्र-(वीजा) प्रभृतीनां सर्वासाम् औपचारिकतानां प्रबन्धम् अस्माकं कार्यालय एव साधयिष्यति। पार्वती-राजीवयोरपि सहैव प्रस्थानस्य व्यवस्थां कार्यालय एव करिष्यति। यद्यपि साम्प्रतं केवलम् एकवर्षात्मकस्यैव तत्र कार्यानुबन्धो वर्त्तते परन्तु .....।"

श्रीरामप्रतापमहोदयास्तु सर्वम् अकथितमपि सुविज्ञाय अनुमन्य च स्वभावत एव प्रोक्तवन्तः–"पुत्र! त्वं मम कामपि चिन्तां न कुरु। सर्वमत्र सहजतया सम्पत्स्यते। एकवर्षात्मको कालावधिस्तु एवमेव व्यत्येष्यति।"

एवमेतत् सर्वं प्राक्तनं वार्त्तावृत्तान्तं स्मारं स्मारं श्रीरामप्रतापमहोदयाः पर्यंके निषण्णा एव वारं वारं पौत्रं राजीवं, तस्य च मनोरमं बालसुलभं कथनोपकथनम् आचरणं च चिन्तयन्तः, पुत्रस्य अनुजप्रतापस्य सपत्नीकस्य कुशलतापूर्वकं जर्मनीदेशस्य प्रस्थानं कामयमानास्तदानीं निद्रानिरताः संजाताः।

० ० ०

जर्मनीदेशे समागमनाऽनन्तरं तु अनुजप्रतापस्य तत्पत्न्याः पार्वतीदेव्याः तयोः पुत्रस्य राजीवस्य च हर्षस्य पारावार एव न परिसमाप्तः। तत्रत्यं चाकचिक्यपूर्वं वातावरणम्, नानाविधानि विचित्रतापूर्णानि परिधानानि धारयतो नागरिकान्, व्यवस्थितां यातायातप्रणालीम्, सरलां सुस्पष्टां सुव्यवस्थितां च सकलां कार्यप्रणालीं निरीक्ष्य चक्षूंषि विस्फारितानीव जातानि। वायुपत्तनात् एव टैक्सीयानेन गच्छन्तस्ते सर्वे स्वाऽनुभवैः रोमाञ्चिता आसन्। अद्यपर्यन्तं तु पार्वती अनुजप्रतापप्रोक्तां विदेशचर्चाम् आकर्ण्य केवलं स्वकल्पनाबलेन किमपि समवगन्तुं प्रयतते स्म परन्तु अद्य तु सर्वं साक्षादेव अनुभूयते। तस्या उत्सुकता चरमसीमानं स्पृशति स्म।

जर्मनीदेशे गमनाऽनन्तरं प्रायः सप्ताहपर्यन्तम् एकस्मिन् अतिथिकक्षे निवासं कृत्वा ते सर्वे तद्व्यावसायिकप्रतिष्ठानद्वारा प्रापिते आवास-भवने निवासं कर्त्तुं प्रस्थितवन्तः। तत्रस्थे वातावरणे च आत्मानं मनोनुकूलं विधातुं तत्र च संरन्तुमेव पर्याप्तः समयः परिसमाप्तः। एकस्तु भिन्नो देशः द्वितीयश्च तत्रस्थाः परम्पराः रीतयश्च नवाः, अपरिचिताश्च। पुनरपि तस्मिन्नावासक्षेत्रे प्रायः दश-द्वादशसंख्याकाः भारतीयाः परिवारा अपि निवसन्ति स्म। यद्यपि ते भारतीयाः विभिन्न-प्रान्त निवासिनो बभूवुः, तेषां मातृभाषासु भोजनेषु व्यवहारेषु च स्पष्टमेव पार्थक्यं प्राप्यते स्म, पुनरपि तत्र विदेशे एवं प्रतीयते स्म यथा समग्रं भारतं वर्षम् एकत्रीभूय तत्रैव पुञ्जीभूतं वर्त्तते। सत्यामपि विभिन्नतायां तत्र विशिष्टम् अनुभवजन्यम् ऐक्यमपि प्रतीयते स्म। तदेकत्वं च "भारतीयमूलकत्वम्" एव बभूव।

तत्र चत्वारो मासास्तु केवलं मातृभूमिं ध्यायमानानाम् पारिवारिकजनानां संस्मरणं कुर्वाणानामेव तेषां यथा तथा व्यतीताः। अनुजप्रतापस्तु स्वकार्यालयं गत्वा कार्येषु व्यस्तो भवति स्म परन्तु पार्वती प्रायः एकान्ततामनुभवन्ती विषादयुक्ता जायते स्म। राजीवस्तु तत्र एकस्मिन् विद्यालये पठनार्थं गन्तुं प्रारब्धवान्।

एवं साम्प्रतं तत्र जर्मनीदेशे निवासं कुर्वतां तेषां वर्षद्वयं सहसा व्यतीतमेव।

एकदा मनसि महदौदासीन्यं धारयन्ती पार्वती अनुजप्रतापमब्रवीत्-"अस्मिन् वर्षे होलिकावसरे वयं भारतवर्षे प्रस्थास्यामः। तत्र गमनाय मनो बहु कामयते। तत्र गत्वा पूज्यान् श्वशुरमहोदयान् स्वकीयां मातरं पितरं च द्रष्टुम् अतीव उत्कण्ठा वर्त्तते। अत्र तु वासं कुर्वन्त्या मम तथा प्रतीयते यथा किमपि जीवनं स्खलितमिव भवति रिक्तता वा विराजते। तत्र तु होलिकावसरे समूहगानम्, वस्त्रेषु रंगप्रक्षेपणम्, इतस्ततः भ्रमणम्, आपणेभ्यः कृते नववस्त्राणां क्रयणम्, इत्यादि बहुकार्यजातं स्मृतिपथम् आयाति। अत्र तु किमपि न वर्त्तते। इह तु वयं विदेशे सुखसौविध्यपूर्णे कारागारे इव निवसामः। क्व खलु स्वदेशस्य मृत्तिकायाः सुगन्धः? क्व चेह विदेशे होलिकाऽवसरेऽपि विषादपरिपूर्णं मानसम्?.... इत्यादि।"

अनुजप्रतापः शान्तेन मनसा पत्न्याः पार्वत्याः विचारं स्वदेशस्मृतिकारकं वचनं च श्रुतवान्। तस्य मनस्यपि स्वदेशगमनस्याऽभिलाष आसीत्। परन्तु तत्राऽपि तस्य विवशता एव बभूव। एकस्मिन् वर्षे केवलम् एकवारमेव गमनाय तत्र अनुज्ञा भवति। अत एव तस्य मानसं विषण्णायमानम् अभूत्। भारतवर्षात् प्रस्थानात् पूर्वम् अत्रत्यम् एकाकिजीवनम् उद्विग्नता-जन्यान् मनःस्थितिभावान् च पुरा कोऽपि विचारिवान् एव न हि। यदा तस्य पत्नी पार्वती केवलं स्वयमेव एकाकिनी तत्र गमनस्य संकल्पं प्रस्तुतवती तदा तेन एकलक्षरूप्याणां व्ययीभावम् एकया अंगुल्या निर्दिश्य संकेतितवान्। अथ च भारते एकाकिगमनम् अपि सुकरं नासीत्।

अत एव हृदये समुज्जृम्भन्तीः समस्तभावनाः व्याकुलताश्च सा कथमपि शमयितुं विवशा बभूव।

अस्तु, यथा यथा समयो व्यतीतः संजातस्तेषां भारते गमनागमनमपि अल्पात् अल्पतरं प्रावर्त्तत। पुत्रो राजीवोऽपि तत्रैव जर्मनीदेशे समीपस्थे विद्यालये एव अध्ययनार्थं गच्छति स्म। पत्नी पार्वती अपि एकस्मिन् आपणकार्यालये (जनरल स्टोरे) कार्यं प्रारब्धवती। एवं सर्वेषां दिनचर्या अतीव व्यस्ता प्रावर्त्तत, सर्वे च कार्यव्यापृता अभूवन्। शनैः-शनैः तथा समभवत् यत् नैव अत्रत्यां कार्यव्याप्ततातां सुखं च कोऽपि परित्यक्तुं प्राभवत् न च स्वदेशस्य मोहमपि परित्यक्तुं समर्थ आसीत्।

परन्तु कालवशात् सर्वेषां सम्बन्धिनां मित्राणां च मोहः शनैः शनैः शिथिलायमानः प्रावर्त्तत। केवलं ते सर्वे यदा कदा द्वि-त्रिवर्षेषु केवलम् एकवारं दीपावल्या अवसरे होलिकोत्सवे वा यथा कथंचित् समयं प्राप्य गन्तुं प्रभवन्ति स्म।

पश्चात् तु प्रायः केवलम् एकाकी अनुजप्रताप एव भारतं समायाति स्म, सोऽपि प्रायशः स्वकीयकार्यालयीयकार्यवशात्। पत्न्याः पार्वत्याः पुत्रस्य राजीवस्य च गमनागमने पर्याप्तं व्ययं समालक्ष्य तयोर्गमनागमनमपि प्रायः निरुद्धमेव बभूव। यदा स भारते समायाति स्म तदा पितृमहोदयानां कृते नानाविधानि शीतकाले उष्णताप्रदायकानि वस्त्राणि, विशिष्टानि बिस्कुटपैकटानि च उपहाररूपेण समर्पयति स्म। परन्तु तेभ्य इदं सर्वं कथमपि न रोचते स्म। प्रायशः ते कथयन्ति स्म- "त्वम् एकाकी एव कथमत्र समागच्छसि? वधूः पार्वती कथं न आगतवती? राजीवोऽपि न मां मिलितुं समागच्छति? स तु मा विस्मृतवान् एव। त्वमपि अत्र केवलं सप्तदिनेभ्य एव अवकाशं नीत्वा समागच्छसि। तत्र चाऽपि सर्वः समयः केवलं सम्बन्धिनां प्रतिवेशिनां मित्राणां वा गृहेषु गत्वा तत्र सम्मेलनेन परस्परालपनेन एव समाप्तो भवति। अहं तु त्वां पूर्णरूपेण द्रष्टुमपि न पारयामि। न च पारस्परिकस्य वार्त्तालापस्य कृते अवसरोऽपि समुपलभ्यते" इत्यादि।

अनुजप्रतापेनाऽनुभूतं यत् तस्य पितृचरणाः भारतवर्षे पूर्णतया एकाकिनः निवासं कुर्वाणाः एकान्तभावपरिपूर्णेन नीरस-जीवनेन संभवतः घोराम् उद्विग्नतां प्राप्तवन्तः। परिवारसान्निध्यजन्यं सुखमपि शनैः-शनैः तेषां मुष्टिबन्धनात् तथैव क्षीयते स्म यथा शुष्काः सिकताकणाः शनैः शनैः निपत्य मुष्टिं रिक्तां विदधति। एकदा अन्ततः श्रीरामप्रतापमहोदयाः कथं कथमपि आत्मनो मनोवेगं निरुध्य प्रोक्तवन्तः आसन्-"अस्तु, पुत्र! वध्वाः पार्वत्याः राजीवस्य च कृते ध्यानं दातव्यम्। स्वयमपि तत्र सुखेन त्वया भवितव्यम्। अत्र धनप्रेषणस्य काचिदपि आवश्यकता नास्ति। अस्माकम् आवश्यकता अपि क्षीणा एव वर्त्तन्ते। अग्रिमे वर्षे किमपि अधिकं समयं संधाय परिवारेण समम् आगन्तव्यम्।"

एवं पितृचरणान् मिलित्वा अनुजप्रतापः विदेशे प्रतिष्ठते स्म। रामप्रतापमहोदयास्तु तद्गमनाऽनन्तरमेव स्वकीयं शून्यं गृहं विहाय प्रतिवेशिनां गृहसमक्षम् उपविश्य स्वकीयपुत्रस्य वध्वाश्च प्रशंसामेव कुर्वाणाः कथयन्ति स्म-"ते सर्वे तु गन्तुकामा एव नाऽभूवन् परन्तु तत्र विवशता वर्त्तते। नियोजनवृत्तिरपि सम्पादनीया भवति"। एवं कथयन्तः पुनः स्वगृहे समाविश्य छद्मसान्त्वनां संधाय रोदनं कुर्वाणाः समयं यापयन्ति स्म। असुरक्षा-भावनाग्रस्ताः सन्तः ते वार्धक्यजन्यपीडामपि शरीरे समनुभूय पर्यंके निपत्य कक्षस्योपरिभागे शून्यं निरूपयन्तः न जाने किं किं विचारयन्ति चिन्तयन्ति कल्पयन्ति च स्म। कदाचित् तेषां मस्तिष्के स्वपत्न्याः गीतादेव्याः स्मृतिरपि समागच्छति स्म। पुत्र्याः यशोदायाः अपि बाल्यकालीना स्मृतयः चक्षुषोः पुरतः नृत्यन्ति स्म। यशोदा तु निकटस्थे एव नगरे स्वपत्या समं गार्हस्थ्यशकटिकां संचालयन्ती स्वकीय-जीवनं यापयति स्म।

यशोदा कदाचित् मध्ये-मध्ये द्वित्रिमासानन्तरं यदा कदा पितृमहोदयानां समीपमागत्य सर्वाः व्यवस्थाः समीक्ष्य पुनः प्रतिनिवर्त्तते स्म।

साम्प्रतं पुत्रस्य भारते आगमनस्य प्रतीक्षां कुर्वाणानां श्रीरामप्रतापमहोदयानां त्रयः संवत्सरा व्यतीताः। एतेषु त्रिवर्षेषु अनुजप्रतापः तत्र जर्मनीदेशे स्वव्यावसायिकस्य आपणस्य प्रमुखः प्रबन्धकः समवर्त्तत। निरन्तर-व्यस्ततावशात् तस्य भारते प्रायः आगमनमेव समाप्तम्। एतेषु त्रिषु वर्षेषु केवलं पत्रद्वारा अथवा ग्रामे स्थितस्य एकस्य सार्वजनिक-दूरभाषस्य माध्यमेन च यदा कदा सम्पर्कः प्रवर्त्तते स्म।

तत्र अनुजप्रतापस्य पत्नी पार्वती अपि व्यापारकेन्द्रे गहनतया कार्यनिमग्ना बभूव। राजीवस्य साम्प्रतं माध्यमिकपरीक्षायाः अन्तिमो वर्षो बभूव। कस्यचिदपि भारते गमनागमनं विगतपञ्चवर्षेषु न संजातम्। केवलं पञ्चवर्षपूर्वमेव यदा अनुजप्रतापः स्वकीयव्यावसायिक-कार्यवशात् कार्यालयद्वारा दिल्लीनगरं प्रेषितस्तदा कथं कथमपि समयं निःसार्य केवलं घण्टाद्वयस्य कृते पितृचरणानां दर्शनं विधातुं ग्रामे समागत आसीत्। तदनन्तरं तु पितृचरणाः पञ्चवर्षपर्यन्तं समयं केवलं तस्य प्रतीक्षायामेव यापितवन्तः।

अथ अद्य प्रातः त्रिवादने जर्मनीदेशस्थः अनुजप्रतापसिंहः दूरभाषघटिका-ध्वनिमाकर्ण्य अन्यमनस्कः क्षुब्धचित्तः सन् यदा दूरभाषयन्त्रमुत्थापितवान् तदा द्वितीय-पक्षतः तस्याः भगिन्याः यशोदायाः स्वरः कर्णविवरे हताशासूचकः प्राविशत्। सा प्रोक्तवती यत् पितृचरणाः अत्यधिकं रुग्णाः वर्त्तन्ते। वयं सर्वे तम् आतुरालयं प्रापयामः। ते केवलं त्वदीयमेव नामधेयं मुखात् उच्चारयन्तः अर्धचेतनायुक्ताः वर्त्तन्ते।

अनुजप्रतापः सर्वमेतत् निशम्य स्तब्धो भूत्वा स्वचक्षूषी शून्ये स्थापितवान्। पुनः किञ्चित् स्वस्थतामाधाय अश्रुजलसिञ्चितनयनः पार्वतीमुपसर्प्य प्रोक्तवान्-"पितृचरणाः अत्यन्तम् अस्वस्था वर्त्तन्ते। अस्माभिस्तत्र गत्वा ते द्रष्टव्याः"।

"अहं किं करिष्यामि तत्र गत्वा? राजीवस्यापि परीक्षाकालः सन्निकट एव..... अस्यायं माध्यमिकपरीक्षाया अन्तिमो वर्षः ..... तस्य भविष्यनिर्माणे एषा परीक्षा अतिमहत्त्वपूर्णा ..... गमनागमनेऽपि प्रतिव्यक्तिः एकलक्षरूप्याणां व्ययः... विशिष्टं प्रयोजनं विना तत्र सर्वेषां गमनं मह्यं समीचीनं न प्रतिभाति .....त्वमेव तत्र एकाकी प्रयाहि ....." तस्य पत्नी पार्वती प्रत्युवाच।

"एतद् वाक्यं त्वं ब्रवीषि?" अनुजप्रतापः संक्षुब्धमानसः कष्टानुभूति-सम्पन्नः पत्नीं प्रोवाच।

"कथम्? त्वमेव तु एतत् सर्वम् एतादृशमेव मां बहुवारं प्रायः कथयसि स्म। तस्मादेव च त्वं विगतवर्षेषु एकाकी एव गच्छसि स्म। अत्र एकदिवसस्याऽपि अवकाशग्रहणे कियती धनहानिः? जानासि न वा? एतत्सर्वं तवैव विचार आसीत्" पार्वती पुनः प्रत्युवाच।

पत्न्याः पार्वत्यास्तथाविधम् उत्तरं स्पष्टतया निशम्य स स्वयमेव किञ्चिद् अपराधबोधयुक्तः संजातः। तस्य मानसे किमपि त्रुटितमिव संजातम्। स तु स्वीयसंवर्धिते कानने एव मार्गविस्मृतः सञ्जातः। किञ्चित् क्षोभ-संत्रास-कुण्ठा-किं-कर्त्तव्यविमूढतादिभावेन ग्रस्तः सन् अन्ततः एकाकी एव भारतं प्रस्थितवान्।

दिल्लीस्थ-वायुपत्तने अवतीर्य तत्क्षणमेव टैक्सीद्वारा ग्रामं समागतः। गृहस्य प्रवेशद्वारि एव तस्य भगिनी यशोदा तस्य प्रतीक्षायां निरता समदृश्यत। तं निरीक्ष्य सा निजगाद-"तवैव प्रतीक्षायां पितृचरणा आसन्। अस्मिन् वर्षेऽपि यदा दीपावलिपर्वणि त्वं न समागतस्तदा तेषां जीवनस्य समुत्साह एव अस्तंगतः। वारं वारं ते कथयन्ति स्म यत् अधुना तु तस्य गमनाऽऽगमनमपि पूर्णतया रुद्धं संजातम्। मन्ये तेषां हृदि इयमेव पीड़ा गहनतया शूलरूपेण प्रविष्टा"।

"यदि अहं सर्वमेतद् अज्ञास्यं तदा ....." अनुजप्रतापस्य मुखात् कष्टपूर्णं वचनमेतत् अस्फुटरूपेण प्रकटितम्।

यशोदा तं पितृचरणानां समीपे प्रापितवती। तेषां नयने तदा निमीलिते बभूवतुः। सा कर्णयोः पार्श्वे मुखं कृत्वा उच्चैः प्रोक्तवती-"पितृमहोदयाः! कृपया पश्यन्तु भवन्तः। भ्राता अनुजः समागतो वर्तते । उतिष्ठन्तु .....पश्यन्तु कृपया .....।"

अस्तु, पर्यंके लम्बायमानाः पितृचरणाः पुत्रम् अनुजप्रतापं यथा कथंचित् महता प्रयासेन निरीक्ष्य सुदीर्घं निःश्वस्य पुनरेव, स्वचक्षूंषि सनातनकालाय निमीलयाञ्चक्रुः। एवं प्रतीयते स्म यत् यथा अनुजप्रतापं द्रष्टुमेव तेषां जीवनतन्तुः विलम्बायते स्म, तेषां प्राणाः श्वासाश्च प्रचलन्ति स्म।

अन्तिमसंस्कारस्य सर्वा व्यवस्था ग्रामस्य पार्श्वे वाटिकायामेव कृता। बहवः

परिचिता अपरिचिताश्चाऽपि बन्धुबान्धवैः सहिताः ग्रामवासिनः तत्र अन्त्येष्टिकृत्यसम्पादनार्थं समुपस्थिताः अभूवन्। तत्सर्वं निरीक्ष्य अनुजप्रतापस्य मानसं चीत्कारमिव चकार। एवंविधा आत्मीयता तु विदेशेषु कल्पितुमपि न शक्या। साम्प्रतं तस्य मनसि पितृचरणानां वियोगापेक्षया भारतीयसंस्कारैः परम्पराभिः रीतिभिश्च वियुक्तातायाः दुखम् अत्यधिकं प्रतीयते स्म। एतैः कारणैरेव तु विदेशेषु निवासं कुर्वाणा अपि भारतीयाः स्वजन्मधरित्रीं प्रायः स्मरन्ति ध्यायन्ति चिन्तयन्ति च।

अथाऽन्येद्युः प्रभातवेलायां जागृति-समकालमेव ज्येष्ठभगिनी यशोदा करुणया गिरा अतिस्नेहेन पाणिं संस्पृशन्ती भ्रातरमनुजप्रतापम् एवम् अब्रवीत्-"भ्रातः! अत्रैव आयाहि ..... भ्रातृजायामपि इहैव समानय ..... अत्र का न्यूनता? ..... साम्प्रतम् आवामेव द्वौ पितृमहोदयस्य छायातुल्यौ अवशिष्टौ ..... तत्राऽपि एकः अत्र ...... द्वितीयश्च अन्यत्र ..... कृपया विचारयस्व त्वम्।"

भगिन्याः यशेदायाः वचनं गले एव सम्प्रविष्टम्। एतस्य अप्रत्याशितस्य प्रश्नस्य प्रस्तावस्य वा उत्तरप्रदाने दोलायितमानसस्य तस्य मनःस्थितिः तदानीं नासीत्। स जानाति स्म यत् एतत् सर्वं तथा सहजं नास्ति यथा भगिनी चिन्तयति कथयति वा। परन्तु कमपि पन्थानम् अदृष्ट्वा स प्रत्युवाच-

".न हि स्वसः! अधुना एव ततः पुनः प्रत्यावर्त्तनं कथं सम्भवं स्यात्। सर्वाऽपि जीवनव्यवस्था तत्रैव सुस्थिरतां गताऽस्ति। अधुना तु राजीवोऽपि इहागमनं न कामयिष्यते, यतो हि तस्य तत्र माध्यमिक-परीक्षायाः अन्तिमो वर्षः। अत एव हि तस्य माता पार्वती अपि आगन्तुं नैव इच्छेत्।

"अथ त्वम् .....?" यशोदा पुनः पृष्टवती।

"अथ अहं तान् तत्र एकाकिनः परित्यज्य कथमागन्तुं शक्नोमि? संभवतः अभिलषन्नपि न तत् कर्त्तुं प्रभवामि .....". इति कथयतः अनुजप्रतापस्य नयनेषु अश्रुबिन्दवः निःसर्त्तुं प्रारब्धाः।

ततः परम् अनुजप्रतापः अन्यमनस्कः. विदेशे प्रस्थितः। तेनाऽनुभूतं यत् कश्चिदपि कस्यचिदपि दुःखं भाजयितुं समर्थो न वर्त्तते,न च तथा कर्त्तुं शक्नोति। स्वभागधेयस्य पीडा स्वयमेव निर्वहणीया भवति। पितृचरणानाम् एक सुन्दरम् अधुनातनं नवीनं च चित्रं स स्वीये गृहे संस्थाप्य तत् पुष्पहारेण समलंकृतं चकार। पार्वती च पूर्वकृतस्वदेशगमननिषेधस्य प्रायश्चित्तमिव कुर्वती स्वाश्रुबिन्दुभिः सह तस्य चित्रस्यैव आराधनायां स्वमानसं व्यापृतं कृतवती।

***

अनपेक्षितम्

"क्षमस्व माम्, किं भवती सङ्गीता एव तु न वर्तते?"

पृष्ठतः स्वकीयं नामधेयम् आकर्ण्य सङ्गीता मुखं किञ्चित् परिवर्त्य दृष्टवती। सा किञ्चित् विरम्य तां महिलां परिचेतुं प्रयासं कृतवती। पुनरकस्मादेव तस्याः मुखात् शब्दाः स्वतः एव निस्सृताः-"अहो! किं त्वम्। प्रमोदिनी? कथं साम्प्रतम्? कीदृशी त्वम्?"

"अहो! धन्यवादाः परमेश्वराय। अहं सम्यगेव परिचेतुं समर्था सञ्जाता। पूर्वं तु अहं किञ्चित् भीतियुक्ता आसं यत् काचित् अन्या न भवेत्। परन्तु विंशतिवर्षानन्तरमपि त्वां विलोक्य अहम् आत्मानं निरोद्धुं न समर्था अभवम्। बहुकालानन्तरं वयं मिलामः। त्वम् अत्र कदा समागता?" प्रमोदिनी सङ्गीताम् अवादीत्।

"कतिचिदेव दिवसाः अत्र व्यतीताः मम आगमनस्य। साम्प्रतं बालकानां विद्यालयस्य अवकाशकालः प्रवर्तते। अत एव मया विचारितं यत् केचन दिवसाः पितृभ्यां समं यापनीयाः"-सङ्गीता प्रत्युक्तवती।

"अस्तु, अद्य तु अहं क्वचिदन्यत्र गन्तुं क्षिप्रतां धारयामि। परन्तु यदाऽपि अवसरः लभ्येत तदा त्वया मम गृहं ध्रुवम् आगन्तव्यम्, तत्रैव विस्तरेण वार्ताः करिष्यावहे। एतत् मम सङ्केतपत्रकं गृहाण" इत्युक्त्वा प्रमोदिनी स्वकीयं मुद्रितं सङ्केतपत्रं प्रदाय गृहगमनस्य वचनं पुनः संस्मार्य ततः प्रस्थितवती।

सङ्गीता साम्प्रतं ग्रीष्मावकाशे स्वकीयं मुम्बयीस्थितं मातृगेहं बालकाभ्यां समम् आगता आसीत्। तस्याः श्वशुरालयस्तु बेङ्गलूरूनगरे वर्तते। सा बालकयोः कृते कानिचित् वस्तुजातानि क्रेतुम् आपणे समागता आसीत्। तत्रैव प्रमोदिनी मिलितवती। सङ्गीता किशोरावस्थायां तस्याः सहाध्यायिनी बभूव।

गृहं प्रत्यागतायाः अपि सङ्गीतायाः मस्तिष्के प्रमोदिनी एव नरीनृत्यते स्म।

सङ्गीतायाः आवासक्षेत्रस्य नातिदूरे प्रमोदिन्याः पितृष्वसा प्रतिवसति स्म। प्रमोदिन्याः पिता सेनायाम् उच्चाधिकारी बभूव। अत एव अध्ययनादिकार्ये सौकर्यवशात् सा स्वकीयपितृष्वसुः गृहे मुम्बयीनगरे निवसति स्म।

सङ्गीता स्मरति स्म, तस्याः स्मृतिपथे विंशतिवर्षपूर्वस्याः व्यक्तित्वं चक्षुषोः पुरतः नृत्यति स्म। गौरवर्णा ..... चञ्चलस्वभावा ..... उच्छृङ्खलमनोवृत्तिः ..... विलाससम्पन्ना ..... परिहासपेशला ..... मृगनयना प्रमोदिनी यं कमपि हठात् स्वाभिमुखं समाकृष्टं कर्तुं सुतरां सक्षमा बभूव। सदैव मन्दस्मितियुक्तायाः

प्रमोदिन्याः सौन्दर्यं हाससमये तस्याः कपोलयोः प्रकटीभूतेन ईषदावर्तगर्तेन स्वत एव समृद्धं प्रवर्तते स्म। स्वसौन्दर्यातिशयकारणेन समुपयुक्तेन विलाससम्पन्नेन परिधानेन च सा आवासक्षेत्रस्थितासु बालासु किञ्चित् पार्थक्यमेव धारयति स्म। प्रमोदिनी यदा सज्जीभूय महाविद्यालयं प्रयाति स्म तदा एवं प्रतीयते स्म यत् सा कस्याञ्चित् सौन्दर्यप्रतियोगितायां यथा भागं ग्रहीतुं प्रतिष्ठते स्म। मार्गेषु गच्छतां युवकानां ध्यानं स्वत एव तदभिमुखं प्रवर्तते स्म। यदा कश्चित् प्रेमी युवकः तां निरीक्ष्य कामपि अगम्भीरां टिप्पणीम् अथवा विलासबोधकं वाक्यं समुच्चारयति स्म तदापि सा केवलं मन्दं विहस्य तथैव अग्रे गच्छति स्म यथा तस्याः कृते किमपि प्रशंसावाक्यमेव तेन समुच्चारितं भवेत्।

तस्मिन् आवासक्षेत्रे प्रमोदिन्याः प्रसिद्धिः अतिचञ्चलस्वभावायाः उच्छृङ्खल-कन्यायाः रूपेण वर्धते स्म। तत्रस्थाः पारिवारिकाः जनाः स्वकन्यकानां प्रमोदिन्या समं सम्मेलनं परिवर्जयन्ति स्म। यतो हि तेषां विचारे प्रमोदिन्या समं सम्मेलनेन, तेषां कन्यकाः दूषिताः भ्रष्टाः वा भवेयुः। सङ्गीतायाः पारिवारिकाजनाः अपि तस्याः प्रमोदिन्या समं सखित्वं न कामयन्ते स्म, न च ते वाञ्छन्ति स्म यत् तया सह वार्तालापपरिस्थितिः संवादस्थितिः वा प्रभवेत्। परन्तु तयोः महाविद्यालयस्य गमनागमनमार्गः समानः आसीत्। अत एव प्रायशः तयोः सम्मेलनं वार्तालापश्च प्रवर्तते एव स्म।

एकदा प्रमोदिन्याः स्वस्थस्वान्तम् अगाम्भयीर्ययुक्तां मनःस्थितिं समीक्ष्य सङ्गीता ताम् एवम् अवादीत्–"जानासि त्वं यत् तव विषये जनाः किं कथयन्ति? कीदृशी चर्चा च तव पृष्ठतः प्रवर्तते?"

"जानामि अहं, सर्वं जानामि। अस्य आवासक्षेत्रस्य निवासिनः मह्यम् ईर्ष्यन्ति महाऽसूयाभावं च धारयन्ति। अत एव अनर्गलं हीनां चर्चां च कुर्वन्ति। परन्तु नाहं किञ्चिदपि अवध्यायामि तान्। न च तत्र किञ्चित् विचारयामि। 'बट् आई डॉन्ट् केयर!"–सा आंग्लभाषया उक्तवती।

"परन्तु प्रमोदिनी ....."

"त्यज सङ्गीते! व्यर्थवार्ताः इमाः" प्रमोदिनी किञ्चित् उद्विग्नमनसा प्रोक्तवती "जनानाम् अवधानं चिन्तनं विचारं वा गणयित्वा अहम् अस्मिन्नेव वयसि आत्मानं वृद्धावत् प्रत्येतुं नेच्छामि, न वा प्रौढावत् प्रतिभासितुम् इच्छामि। त्वमपि एतद् न चिन्तयस्व यत् तव विषये जनाः किं कथयन्ति, किं वा विचारयन्ति। अत्र कदापि ध्यानं न कुरुष्व। जनानां चिन्तनं परिहरस्व। अन्यथा अभिरूपतमायाः नायिकायाः स्थाने त्वमपि वृद्धानायिकायाः स्थानम् अवाप्स्यसि।" एवम् उक्त्वा प्रमोदिनी साट्टहासं हसितवती।

आवासक्षेत्रनिवासिनीनां कन्यकानां कृते प्रमोदिनी अस्पृश्या इव बभूव। परन्तु सा तत्क्षेत्रनिवासिनां तेषां नवयुवकानां कृते आकर्षणकेन्द्रम् इव आसीत् ये अध्ययनपराङ्मुखाः वृत्तिरहिताः रिक्तसमयाः इतस्ततः केवलं निरुद्देश्यं भ्रमणं कुर्वाणाः स्वीयं कालं यापयन्ति स्म।

प्रमोदिन्याः नवाः नवाः प्रेमकथाप्रसङ्गाः आवासाक्षेत्रस्य वायुमण्डले गुञ्जायमानाः श्रूयन्ते स्म। तेषु प्रायशः अधिकांशतया कपोलकल्पिताः यथास्थितिविरुद्धाश्च एव भवन्ति स्म। एवंविधानां प्रेमकथाप्रसङ्गानां प्रसारकाः ते एव नवयुवकाः भवन्ति स्म येषाम् आभिमुख्यमपि संभवतः प्रमोदिनी न कृतवती, न च येषाम् आननस्यापि सा निपुणं निरीक्षणं कृतवती।

अस्तु, स्नातकपरीक्षानन्तरं महाविद्यालये ग्रीष्मावकाशः संवृत्तः। अत एव स्वभावतः सङ्गीतायाः प्रमोदिन्या समं साक्षात्कारः मेलनं वार्तालापश्च स्थगितो बभूव। पुनरेकदा श्रुतिपथम् आगतं यत् प्रमोदिनी केनचित् धनाढ्येन युवकेन समं गृहं परित्यज्य पलायितवती।

एतन्मध्ये एव सङ्गीतायाः पिताऽपि तस्याः विवाहार्थम् अत्यन्तं प्रयासरतः आसीत्। परिणामतः पर्याप्तप्रयासकारणात् सङ्गीतायाः विवाहः केनचित् तथाविधेन युवकेन समं सोत्साहं सम्पन्नः यस्य नामधेयं मनोजकुमारः आसीत्। मनोजकुमारः बेङ्गलूरूनगरे एकस्मिन् बहुराष्ट्रियव्यावसायिककार्यालये कार्यरतः आसीत्। तथाविधेषु कार्यालयेषु कार्यरतानां कृते अवकाशानाम् अत्यन्तम् अभावः भवति स्म। परिणामतः विवाहस्य कतिचिद् दिवसानन्तरमेव सङ्गीता पत्या समं मुख्यकार्यालयद्वारा प्रदत्ते आवासक्षेत्रे निवासं कर्तुं बेङ्गलूरूनगरं प्रस्थितवती। सा स्वकीयं मुम्बयीनगरस्थितं मातृगृहं द्वित्रिवर्षानन्तरमेव समागच्छति स्म। साम्प्रतं सा द्वयोः बालकयोः जननी अपि। बालाकानां विद्यालये प्रवेशानन्तरं तस्याः मुम्बयीनगरगमनमपि यदा कदाचिदेव प्रवर्तते स्म।

अस्तु, एतावतां संवत्सराणां (प्रायः विंशतिवर्षाणाम्) अनन्तरं प्रमोदिनीम् अकस्मादेव मुम्बयीनगरे विलोक्य सङ्गीतायाः मनस्यपि तस्याः वर्तमानजीवनविषये परिज्ञातुं समुत्सुकता समुद्भूता। एतावत्सु संवत्सरेषु व्यतीतेष्वपि प्रमोदिन्याः जीवनव्यवहारे व्यक्तित्वे सौन्दर्ये च किञ्चिदपि परिवर्तनं न प्रतिभासते स्म। तदेव नयनेषु चाञ्चल्यम् ..... सैव मादकतापूर्णा मन्दस्मितिः ..... सैव सुदर्शनीया गात्रयष्टिः ..... सैव आननस्य आभा ..... तथैव सुरुचिपूर्णं परिधानचयनम् .....! सङ्गीता तत्सर्वं निरीक्ष्यैव ज्ञातवती यत् प्रमोदिनी सम्भवतः विवाहं न कृतवती।

अकस्मादेव सा न जाने कथं स्वकीयां तुलनां प्रमोदिन्या समं कर्तुं प्रारब्धवती।

साधारणरूपरङ्गसमन्विता सा आत्मानं प्रमोदिन्या: अपेक्षया श्रेष्ठामेव कल्पयते स्म। सा सौख्यपूर्वकं सामाजिकप्रतिष्ठापरिवृतं वैवाहिकं जीवनं यापयति स्म। तस्याः पतिः मनोजकुमारः तस्याम् अत्यन्तं स्निह्यति, तां सम्मानयति च। मनोजकुमारद्वारा प्रदर्शितं प्रगाढं प्रेम तत्कृते एकं विशालं सदृढं दुर्गमिव प्रतीयते स्म। तस्य परिसरे सा स्वकीयपुत्राभ्यां समम् आत्मानम् अतिसुरक्षिताम् अनुभवति स्म। एवं तस्याः समीपे एकतः स्वकीयपक्षे यत्र मनोजकुमारसदृशः स्नेहसिक्तः पतिः आसीत्, कुसमसदृशौ च द्वौ तनयौ तस्याः गार्हस्थ्यजीवनवाटिकां सुरभितां कुरुतः स्म, तद्विपरीतं द्वितीयपक्षस्थितायाः प्रमोदिन्याः जीवने विद्यमाना रिक्तता असुरक्षा च स्पष्टतया परिलक्ष्यते स्म। ततस्तु सङ्गीतायाः मानसपटले प्रमोदिनीं प्रति सहसैव महती सहानुभूतिः कारुण्यं च प्रादुर्भूतम् अभवत्।

अस्तु, एकदा सायङ्काले सखीसम्मेलनं व्याजं मातरम् उक्त्वा सा प्रमोदिन्याः गृहं गन्तुं स्वगृहात् प्रस्थितवती। महानगरस्य जनसम्मर्दात् पृथक् सागरस्य मनोरमतटे विद्यमाने एकस्मिन् सुप्रतिष्ठिते आवासक्षेत्रे प्रमोदिन्याः निवासकक्षः आसीत्। सङ्गीतां सखीं समागतां विलोक्य प्रमोदिनी अत्यन्तं प्रमोदयुक्ता सञ्जाता। सा सहर्षं प्रोक्तवती "आयाहि सङ्गीते! आयाहि, अहं तु विचारितवती यत् त्वं मम गृहम् आगमिष्यसि एव न।"

"कथं न आगमिष्यम्? त्वया सम्मेलितुं वार्तां च कर्तुं मम मानसम् अत्यन्तम् उत्कण्ठितम् आसीत्। अथ त्वं कीदृशी वर्तसे?" सङ्गीता प्रत्युक्तवती।

"त्वमेव वद, कथम् अहं सन्दृश्ये?"–इति कथयन्ती प्रमोदिनी मन्दस्मितियुक्ता जाता।

बहुसमयानन्तरम् उभे अपि सख्यौ सुखेन निश्चिन्ततापूर्वकं समुपविश्य वार्तायाः अवसरं लब्धवत्यौ। अत एव पर्याप्तं समयं यावत् तयोर्मध्ये विविधविषयसमाश्रिताः छात्रजीवनसमकालीनाः तदुत्तरकालीनाश्च यत्र-तत्रस्थविषयाः वार्तायां प्रवर्तन्ते स्म। अन्ततः प्रमोदिन्याः सहजभावम् उत्फुल्लमानसं च समालक्ष्य सङ्गीता एवं सङ्कोचतया पृष्टवती–"एकां वार्तां प्रष्टुम् इच्छामि प्रमोदिनि! अन्यथाभावेन तु न ग्रहीष्यसि?"

"अरे! एवम्! पृच्छतु नाम"–प्रमोदिनी सङ्गीताम् अतिसहजतया प्रत्युक्तवती।

"अहं स्मरामि यत् त्वं तु स्वपरिवारं कुलं च कस्मैचित् एकस्मै पुरुषमित्रार्थं त्यक्तवती। किं सः कृतघ्नतापूर्णः अस्थिरचित्तयुक्तः अविश्वस्तो बभूव, येन त्वं तं विना एकाकिनी निवससि अद्य? किं स त्वया सह विवाहं न कृतवान्? अथवा विवाहं कृत्वापि त्वां परित्यक्तवान्? अथवा त्वमेव तं परित्यज्य पुनरेकाकिनी भूत्वा जीवनं स्वच्छन्दं यापयितुं समीहसे?"–सङ्गीता सर्वमेतत् कथयन्ती यथा

प्रमोदिन्याः मर्मस्थलमेव स्पृष्टवती।

सङ्गीतायाः तत्सर्वं वचनं समाकर्णितवत्याः प्रमोदिन्याः मुखमण्डलेऽपि एका भावहीना निर्जीवा स्मितिः प्रत्युद्भूता। सा किञ्चित् विरम्य प्रोक्तवती–"न हि भोः! न हि। सः कृतघ्नः अविश्वस्तो वा न बभूव। यतो हि स तु मयैव समं विवाहं कामयते स्म। परन्तु तस्य पितरौ पर्याप्तम् अधिकं यौतकधनं प्राप्तुं अन्यां बालिकां तस्य गले प्रतिबद्धवन्तौ।"

"परन्तु, त्वं किं लब्धवती? केवलम् अपख्यातिमेव नु? मन्ये स तु विवाहितो भूत्वा स्वपत्न्या समं सानन्दं वैवाहिकं जीवनं निर्वहन् सुखी वर्त्तते। परन्तु त्वम् अत्र नितान्तम् एकाकिनी भवन्ती स्वकीयं जीवनं शून्यभावेन यापयन्ती वर्तसे" सङ्गीता अब्रवीत्।

"सर्वेषां भाग्यरेखायां सर्वं लिखितं न भवति। सर्वैश्च सर्वं प्राप्तुं न शक्यते" प्रमोदिनी किञ्चित् नैराश्यं प्रदर्श्य पुनः अब्रवीत्–"मनुः (प्रमोदिन्याः प्रेमिणः संक्षिप्तं नाम तत्) क्वचित् विवाहं तु कृतवान्, परन्तु तस्य प्रगाढम् उत्कटं च प्रेम केवलं मत्कृते एव सुरक्षितं वर्तते। वस्तुतः सः स्वभार्यया समं भवन् अपि तत्र न भवति। केवलं मम सामीप्यमेव अन्तस्तलतया सततं कामयते। मम प्रिय-सखि! सङ्गीते! सम्भवतः त्वं प्रेम्णः भावावेगं गहनतां तीव्रतां च परिज्ञातुं न समर्था।"

"किं त्वम् इदानीमपि तस्य प्रगाढप्रेम्णः सरोवरे एव निमग्ना वर्तसे? तस्यैव वा प्रेम्णः एतावान् दम्भः कथं तव? यदि सः त्वया समं वस्तुतः महत् प्रेम करोति तदा कथं न सः सर्वं परिवारं तिरस्कृत्य त्वां स्पष्टतया स्वीकुर्यात् एव?" सङ्गीता स्वकीयाम् आशङ्कां प्रकटितवती।

"मनुः स्वकीयमातुः पितुश्च अद्वितीयः पुत्रः। मत्तः पर्याप्तं दूरे भवन् अपि सः मत्सम्बद्धानां सर्वासाम् आवश्यकतानां दैनिकोपयोगिसामग्रीणां वा पूर्तिं साधयति। मदर्थं च सर्वविधं सावहितः भवन् विशेषध्यानं निर्वहति। एतद् बहुमूल्यम् आवासभवनमपि तेनैव मह्यं प्रदत्तम्। सः प्रतिमासम् एकवारं वारद्वयं वा सुनिश्चितमेव इह आयाति। शेषाः दिवसाः तु मम तस्यागमनप्रतीक्षायामेव सोत्सुकाः व्यतीताः जायन्ते।"

प्रमोदिन्याः स्वरे प्रेम्णः प्रगाढता प्रत्युत्कण्ठता मादकता च गहनतया प्रतीयते स्म।

"त्वं किमपि कथय प्रमोदिनि! परं तव किमिदं न प्रतीयते यत् त्वं यदि प्रेमप्रसङ्गे न निपतिता अभविष्यः तर्हिं तव जीवनम् इतोऽप्यधिकं रुचिकरं सम्मानप्रदं सन्तोषकरं च अभविष्यत्?" सङ्गीता पृष्टवती।

"अरे सङ्गीते! त्यज सर्वमेतं व्यर्थं वाग्विलासम्" प्रमोदिनी श्रान्तेन स्वरेण दीर्घं निःश्वस्य काव्यमय्या भाषया अग्रे अवदत्-

"कण्टका एव कुर्वन्ति कुसुमानां सुरक्षणम्।
सर्वे एव यदा श्रेष्ठाः दुष्कृतं कुत्र संभवेत्?"

किञ्चित् विचार्य सा पुनः-"सङ्गीते! किं त्वं 'तं' द्रष्टुम् इच्छसि?" इति कथयन्ती तस्याः उत्तरस्य प्रतीक्षाम् अकुर्वाणा तीव्रतरैः चरणैः द्वितीयकक्षे प्रविशन्ती अवादीत्-"त्वम् अत्रैव उपविश, अहम् अधुनैव समागच्छामि।"

अथ किञ्चित्कालानन्तरम् अकस्मादेव कस्यचित् 'छन्-छन' इति स्वरपूर्वकं भग्नतां गतस्य वस्तुनः ध्वनिः कर्णविवरे समायातः। सङ्गीता समुद्विग्ना भूत्वा प्रायः प्रधावन्तीव तस्मिन् कक्षे प्रविष्टवती। सा दृष्टवती यत् प्रमोदिनी स्वकीयं चरणं निगृह्य कुट्टिमे समुपविष्टा वर्तते। तस्याः समीपमेव एकं पीठं पतितं दृश्यते। तत्रैव च बहवः काचखण्डाः इतस्ततः विकीर्णाः दृश्यन्ते। तया दृष्टं यत् तत्रैव एकं छायाचित्रमपि परिवेष्टनयुक्तं पतितं दृश्यते। संभवतः सा पीठिकाम् आरुह्य तदेव फ्रेमयुक्तं छायाचित्रं भित्तिकातः अवतारयितुकामा बभूव इति। तन्मध्ये एव अनवधानतया स्खलनवशात् तच्चित्रं कुट्टिमधरायां पतितं बभूव, येन तस्य काचखण्डाः ध्वस्ताः भूत्वा सर्वत्र प्रकीर्णाः अभवन्।

"प्रमोदिनि! त्वं स्वस्था तु वर्तसे? क्वचित् गम्भीरः व्रणः तु न जातः?" सङ्गीता पृष्टवती।

"एवम्, अहं तु स्वस्था अस्मि। परन्तु पश्य इदम्। चित्रस्य समाच्छादकः काचः पूर्णतया खण्डितः सञ्जातः। चित्रं तु सुरक्षितं वर्तते नु?" प्रमोदिनी प्रत्युवाच।

सङ्गीता शनैः शनैः नीचैः आनम्य तत् छायाचित्रम् उत्थापितवती। परन्तु चित्रं निरीक्ष्य तु तस्याः नयनयोः यथा निमेषः एव निरुद्धः सञ्जातः। सा एवम् अनुभूतवती यत् यथा तस्याः श्रवणस्य समीपे एव बमविस्फोटः इव संवर्तते। तदानीं प्रमोदिनी तां किमपि कथयति स्म, परन्तु सा तत् तदानीं किमपि श्रोतुम् अवगन्तुं वा समर्था न बभूव।

"एतत् ..... एतत् ..... किम्?" सङ्गीतायाः मुखात् केवलम् इदमेव निःसृतं भवति स्म।

"एवम्, अयमेव मम जीवनम् .....। मम प्रेम .....। मम सर्वम् .....मम सर्वस्वम् .....मम सर्वाधारः .....मम मनुः ....." प्रमोदिनी ब्रवीति।

सङ्गीता पुनरेकवारं गहनतया निर्वर्ण्य तत् चित्रं सावधानतया दृष्टवती। यस्मिन् सुदृढे दुर्गे सा आत्मानं सुगोप्य निश्चिन्ततां सुरक्षिततां च अनुभवति

स्म तस्य दुर्गस्य प्राचीरा: यथा एकैकं कृत्वा भग्ना: प्रतीयन्ते स्म। एतत् चित्रं तु निस्सन्दिग्धमेव तस्याः 'पतिं' पदे प्रतिष्ठापितस्य मनोजकुमारस्यैव छायाचित्रं बभूव। तदेतत् सर्वं वस्तुजातं पूर्वापरं भूतं भविष्यं च विचिन्त्य सङ्गीतायाः तथा प्रतीयते स्म यथा कुट्टिमे विकीर्णाः समस्ताः क़ाचखण्डाः तस्याः हृदये गहनतया सम्प्रविष्टाः भवन्ति।

सङ्गीता आहतनयना भूत्वा प्रमोदिन्यां दृष्टिक्षेपं कृतवती या भित्तिकायाः समाश्रयं गृहीत्वा उत्थातुं प्रयतमाना बभूव। सा पुनः गवाक्षाद् बहिः स्वकीयं दृष्टिक्षेपं कृतवती। तत्र सन्ध्याकालीनः रक्ताभासम्पन्नः सूर्यः समुद्रे निमज्जितुकामः प्रवर्तते स्म। तस्य रक्तिमा आभा समुद्रमपि रक्तवर्णं विदधाति स्म। सङ्गीता विचारयति स्म यत् यथा केचन काचखण्डाः सागरस्य वक्षःस्थलमपि विदीर्णं विधाय तत्र सम्प्रविष्टाः भवन्ति।

***

अद्वितीयं प्रेम

तदेकं दुर्भाग्यपूर्णं दिनमासीत्। मया सह इतः पूर्वं कदापि एवंविधा घटना न घटिताऽभूत्। यद्यपि दिल्लीसदृशे सुरक्षिते चाकचिक्यपूर्णे च नगरे एवंविधा घटना विस्मयकारिणी एव। परन्तु यतो हि एवंविधानां घटनानां विवरणं समाचारपत्रेषु प्रायशो वयं पठामः स्म, अत एव अहम् अधिकं भीता नाऽऽसम्। पुनश्च राममनोहरोऽपि मया सार्धमेव तदानीम् आसीत्। स एकः उन्नतकायः सबलः स्वस्थः स्फूर्तिमान् नवयुवकः, यो हि मया समम् अत्यन्तं प्रेम कुरुते स्म, तथा च तेन सममेव मम विवाहस्य वार्त्ताऽपि प्रायः सुनिश्चिता एव आसीत्।

अत एव तस्मिन् काले अहम् अत्यन्तं सुदृढमनस्का सञ्जाता। अन्यथा तु यथा ते चत्वारः मार्गलुण्टाकाः क्रूराननाः पुरुषाः आवां परितः एकत्रीभूय स्थिताः तदानीं तु एतदपि सम्भवमासीत् यत् अहं चीत्कारध्वनिपुरःसरं मूर्च्छिता एव समभविष्यम्। परन्तु एवं नाभवत्। अथ चाहं तेषां 'गुण्डा' पुरुषाणां समक्षं सुदृढचरणैः सुस्थिरं स्थिता।

० ० ०

तस्मिन् दिवसे सायं महाविद्यालये वार्षिकः समारोहः प्रवर्तते स्म। मम विचारः आसीत् यत् तथा विलम्बो न भविष्यति इति। अत एवाहं स्वकीयं जनकम् उक्तवती यत् 'भवान् मां नेतुं महाविद्यालयं न समागच्छेत्। अहं स्वयमेव गृहं प्राप्स्यामि।' परन्तु समारोहस्य समापने पर्याप्तः विलम्बः सञ्जातः। रात्रिकालश्च प्रारब्धः। राममनोहरस्य समीपेऽपि तस्मिन् दिने स्वकीयं यानं नासीत्।

आवां परस्परं वार्तां कुर्वाणौ शनैः शनैः निर्जनमार्गस्य एकतः गच्छावः स्म। सहसैव एकं जीपयानम् आवयोः अत्यन्तं समीपम् आगत्य स्थितम्। ततः केचन पुरुषाः विद्युद्गतिरिव उत्प्लुत्य आवां परितः सम्प्रस्थिताः। तेषां मुखं तदानीं वस्त्राञ्चलैः परिवृतमासीत्। हस्तेषु रिवाल्वरं स्पष्टतया परिलक्ष्यते स्म।

अहं सहसा समागतेन तेन आकस्मिकघटनाक्रमेण नितरां समुद्विग्ना सम्भ्रान्ता च सञ्जाता। किञ्चित् भयमपि मनसि प्रादुर्भूतम्। परन्तु अहम् आत्मानं नियन्त्रितां विधाय निर्भयां प्रकटयितुम् आरब्धवती। राममनोहरस्य साहचर्यस्य प्रत्ययोऽपि तदानीं मम सबलं सान्त्वनमेव प्रददाति स्म। मया विचारितं यत् स्वकीयं धनस्यूतं (पर्स) रिक्तं कुर्याम्, अथ च स्वकीयानि आभूषणानि शरीरात् उत्तार्य यदि तेभ्यः प्रयच्छेयं तदा ते आवयोः कामपि हानिम् अकृत्वा इतः प्रस्थास्यन्ति एव। वस्तुतः नाहम् अभिलषामि स्म यत् एकाकी राममनोहरः तेषां प्रतिरोधं कृत्वा कामपि हानिं प्राप्नुयात्।

एकः मार्गलुण्टाकः राममनोहरं प्रति स्वकीयं रिवाल्वरं समुत्थापयन् साक्रोशम् आह–"स्वकीयं मुखं विपरीतं कृत्वा स्थिरो भव ....।"

द्वितीयस्तु माम् अतितीक्ष्णतया निर्वर्णयन् कर्कशेन स्वरेण प्राह–"स्वीयं धनस्यूतं रिक्तं कुरु। आभूषणानि च सर्वाणि शीघ्रं शरीरात् अवतारयस्व .....।"

अहं विद्युदिव तीव्रगत्या स्वकीयधनस्यूतं तेषाम् अभिमुखं निक्षिप्य स्वकीयाङ्गेभ्यः घटीयन्त्रं, गलस्थितं सुवर्णहारं, सुवर्णाङ्गुलीयकं, कर्णाभूषणादिकं च निष्कासयितुम् आरब्धवती।मम मनसि एषः सन्देहः आसीत् यत् क्वचित् राममनोहरः तैः समं सङ्घर्षं न प्रारभेत। सः भविष्यत्कालीनः चिकित्सकः सुबुद्धियुक्तश्च युवकः आसीत्। यद्यपि मम विचारे सः एतादृशः मूर्खस्तु न आसीत् यत् निश्शस्त्रः एकाकी च चतुर्भिः रिवाल्वरधारिभिः लुण्टाकैः सह प्रतिकारं सङ्घर्षं वा कर्तुं समुद्यतो भवेत्। परन्तु कदाचित् स्वाभिमानवशात् एतत्सर्वमपि घटितुम् असम्भवं नासीत्।

परन्तु एतद्व्यतिरिक्तं तत्र यत् किमपि घटितं तत्सर्वं तु मम कल्पनालोके कदापि नैव स्थितमासीत्। तस्मादेव न केवलं मम चेतना जडवत् सञ्जाता, प्रत्युत अनेकवर्षैः समुपार्जितस्य विश्वासस्य प्रेम्णश्च उपरि वज्राघातः इव समजायत। राममनोहरः लुण्टाकस्य आदेशं पालयन् स्वीयं मुखमण्डलं विपरीतायां दिशि प्रकुर्वन् अकस्मादेव सहसा समुत्प्लुत्य तत्र तेषां दुष्टलुण्ठाकानां मध्ये माम् एकाकिनीमेव विहाय अतिशयेन वेगेन पलायाञ्चकार। ततः परं तु राममनोहरस्य साहचर्याभावात् तत्राहम् आत्मानं सहसा अतिदुर्बलाम् अतिभीतां च मन्यमाना अत्यन्तम् असहायाम् अनुभूतवती। मम चरणौ कम्पमानौ इव बभूवतुः।

मम हृदयं वेदनाधिक्येन विदीर्णमिव सञ्जातम् मनसि च अयं भावः प्रादुर्भूतः यत् तत्रैव पृथिव्यां निपत्य सहाहाकारं रोदनं कुर्याम्। परन्तु तत्र यथा कथञ्चित् तस्मिन् विषमे काले अश्रूणाम् आवेगं स्थिरीकृत्य कण्ठं बाष्पहीनं विधाय महता प्रयासेन आत्मानं संयमितां कृतवती।

एकः दुष्टलुण्टाकस्तु साट्टहासं माम् आह–"किं भोः! बालिके! तव सहचरस्तु पलायितः सञ्जातः .....।"

अहम् अनुभूतवती यत् यथा सः कथयति स्म "अथ च सः त्वाम् अत्र अस्मत्कृते परित्यक्तवान्!"

तस्य वचनं निशम्य एकः शीततरङ्गः यथा मम स्नायुमण्डले प्रवाहितोऽभवत्। परन्तु अग्रिमे एव क्षणे अहं पुनरात्मानं संयम्य सुदृढ़ताभावं धारयन्ती करुणया गिरा प्रोक्तवती–"भवत्कृते अत्र तस्य उपस्थित्या पलायनेन वा किम् अन्तरम्? भवन्तः स्वकार्यं सम्पादयन्तु।"

सर्वाणि सुवर्णाभूषणानि मया तेषां समक्षमेव प्रक्षिप्तानि। अहं मनसि वस्तुतः भीता अभूवं यत् ते मामपि समुत्थाप्य क्वचित् तस्मिन् जीपयाने प्रक्षिपेयुः। मया च सुदृढं सङ्कल्पितं यत् ते यदि तथाविधम् आचरितुं माम् अभियास्यन्ति तदा अहं तैः समं यशाशक्यं प्रतिरोधं कुर्वती द्वन्द्वं विधास्यामि, यद्यपि नाम मम जीवनं समाप्तं भवेत्।

परन्तु तेषां मार्गलुण्टाकानां केवलं धनेन आभूषणेनैव च मन्ये प्रयोजनम् आसीत्। ते मम धनस्यूततः सर्वाणि रूप्यकाणि निःसार्य भूमौ विकीर्णानि आभूषणानि च एकत्रीकृत्य सत्वरमेव जीपयानम् आरुह्य ततः प्रस्थिताः।

बहुकालपर्यन्तं त्वहं तत्रैव मार्गस्य एकतः जडवत् निश्चलभावेन संस्थितवती। पुनः ईषत् अवनम्य भूमितः स्वीयं रिक्तं धनस्यूतम् (पर्स) उत्थाप्य स्कन्धे च समारोप्य मार्गस्य तीरे चलितुम् आरब्धवती।

मनोयातनाभावेन दुःखाधिक्येन च मम विचित्रतमैव स्थितिः सञ्जाता। अहं तु इदं विचारयितुमपि असमर्था यत् येन युवकेन समं मम सप्तवर्षाणां स्नेहसम्बन्धः आसीत्, यश्च मयैव सह विवाहं कर्तुं स्वीयपितृभ्यां सह विवादम् अकार्षीत्, सः एव माम् एतस्यां विषमवेलायाम् असहायां परित्यज्य पलायितो भविष्यति।

एवं न जाने कियत्कालपर्यन्तम् एवमेव अन्यमनस्का मार्गस्य एकतः तीरे चलन्ती गृहं प्राप्तवती।

० ० ०

अहं राममनोहरश्च एकस्मिन्नेव महाविद्यालये पठावः स्म। प्रारम्भिकदिनेषु तु आवयोः मित्रता केवलं कक्षायामेव सीमिता आसीत्। परन्तु यदा आवयोः प्रवेशः एकस्मिन्नेव चिकित्सामहाविद्यालये सहैव अभवत्, ततःप्रभृत्येव आवयोः मैत्री मन्दं मन्दं सुदृढ़ीभूता। साम्प्रतम् आवां चिकित्सामहाविद्यालयस्य अन्तिमे वर्षे अध्ययनरतौ आस्व। वार्षिकपरीक्षानन्तरं केवलं कतिपयमासपर्यन्तमेव क्रियात्मकचिकित्साकार्य-(House job) विधानेन सममेव आवयोः अध्ययनं समाप्तं भविष्यति।

आवयोः ऐकमत्यं समानव्यवसायबुद्धिं च निरूप्य अस्माकम् अभिभावकाः आवयोः पारस्परिक-वैवाहिक-चर्चाप्रसङ्गे बाधकाः न बभूवुः। किञ्चित् विचारविमर्शानन्तरं सहमतिपूर्वकमेव अस्माकं वाग्दानविधिरपि सोल्लासः सडिण्डिमघोषश्च सहजतया सम्पन्नः आसीत्।

यद्यपि आर्थिकस्थितिस्तु आवयोः प्रायः समाना एव आसीत्। परन्तु कन्यापक्षस्य स्थितिः वरपक्षस्य तुलनायां स्वभावतः एव काचित् न्यूना भवतीति मत्वा अहं

राममनोहरं प्रायः उच्चस्थितियुक्तमेव विज्ञाय तस्मै समादरं प्रदत्तवती। आत्मानं च तदपेक्षया किञ्चित् न्यूनतामेव दृष्टवती। अन्ततः सः पुरुषः आसीत् ..... मम संरक्षकः ..... मम रक्षकः ..... मम जीवनसखा .....। तस्य साहचर्यं मह्यं दृढतां निर्भयतां च प्रददाति स्म। परं तद्दुर्घटनानन्तरं सः मम समस्तं विश्वासं विघटितं विधाय मम हृदयप्रदेशात् अतिदूरं विनिर्गतः।

बहुदिवसपर्यन्तं तु सः स्वयमेव मत्समक्षं न समागतः। अहम् इदमपि अनुभूतवती यत् यथा स मां विलोक्य साम्मुख्यं परिहरति लज्जाधिक्याच्च दृष्टिं नीचैः विधाय महाविद्यालये गमनागमनं करोति। कक्षयामपि सः मत्तः दूरमेव तिष्ठति।

एवं प्रायः मासद्वयं व्यतीतम्। अन्ततः एकस्मिन् दिवसे यदा अहं पुस्तकालये पठामि स्म तदा सः मम पार्श्वे समागत्य निःशब्दम् एव समीपस्थायाम् आसन्दिकायाम् उपविष्टवान्।

किञ्चित्कालपर्यन्तं च तूष्णीं तिष्ठन् पुनः माम् उक्तवान्-"कल्पने! क्षमस्व माम्! .....अहम् तत्र नितान्तमेव आत्मनो दोषं मन्ये। मया त्वां तथाविधाम् एकाकिनीं विहाय न पलायितव्यम् आसीत् .....। परन्तु न जाने तत्र मम किमभूत् .....। कथमेवम् अकस्मादेव मयि संवृत्तम् .....।"

तस्य वचसा प्रतीयते स्म यत् सः अतिशयलज्जितः पश्चात्तापयुक्तश्च वर्तते।

"राममनोहर! तव तत्र दोषस्वीकारेण किं भविष्यति? यद् भवितव्यमासीद् तत्तु दुर्घटिमेव ....."-अहं उदासीनतया प्रत्युक्तवती।

"मम तत् प्रथमं परिस्खलनम् आसीत्। किं त्वं मह्यं क्षमां न प्रदास्यसि?" सः रुद्धकण्ठेन अवादीत्।

"तत् केवलं परिस्खलनं नाभूत्। तत्तु एकं शूलमासीत् यत् मम कोमलं हृदयं विदीर्णं कृत्वा अन्तःप्रविष्टं सञ्जातम्। एतत् व्रणं तु कथमपि नैव पूर्णम् भवितुमर्हति। कृपया त्वं साम्प्रतम् इतः प्रयाहि।"-अहम् अत्यन्तं दुःखमिश्रेण स्वरेण प्रत्युक्तवती।

"अहं जानामि यत् त्वं महान्तं हृदयाघातं प्राप्तवती। एवं तत्र न भवितव्यमासीत्; अहम् आत्मानम् अपराधिनं मन्ये। परन्तु त्वमेव पश्य ...... मानवः देवत्वं तु न प्राप्तुं शक्नोति .... आवयोः मैत्री बहुवर्षैः निर्मिता ..... अहं तव विश्वासं कदापि न खण्डितवान् .....। आवां परस्परस्य स्वभावादिकं पूर्णतया जानीवः। न जाने तस्मिन् दिवसे मम किमभवत् ......। कृपया मां क्षमस्व .....। अहं त्वां विना स्वकीयजीवनमपि न कल्पये, न च त्वां विना संसारे जीवितुमिच्छामि ....."-सः नितरां भावुकेन स्वरेण वक्तुं प्रारब्धवान्।

तस्य तत्सर्वं वचनं निशम्य अहं तं निपुणं निरीक्ष्य दीर्घं च निःश्वस्य मन्दस्वरेण एवं प्रत्युक्तवती–"किंविधम् एतत् प्रेमकृत्यं वर्तते मनोहर! प्रेमकार्यं तु किमपि भौतिकं वस्तुजातं न गणयति। पुनस्त्वं तु स्वजीवनस्य रक्षणार्थं मम प्रतिष्ठायाः अपि पणं कृतवान् आसीः .....।"

"अहं अतिलज्जाम् अनुभवामि। एषः मम प्रथमः अन्तिमश्च अपराधः। इतोऽनन्तरं त्वं कदापि ममान्तर्हृदये दौर्बल्यं न द्रक्ष्यसि"–सः कातरेण स्वरेण मां प्राह।

"साम्प्रतं तु त्वं कृपया इतः प्रस्थानं कुरुष्व। अहमेकान्ततां कामये .....।" अहं स्वकीयम् आननम् अन्यतः कृत्वा प्रत्युक्तवती।

किञ्चित्कालपर्यन्तं तु सः तूष्णीं तत्रैव स्थितः आसीत्। पुनः ततः उत्थाय शनैः प्रतस्थे।

वस्तुतः राममनोहरः मह्यम् अतीव रोचते स्म। अहमपि तेन समम् अत्यन्तं प्रबलं प्रेम करोमि स्म। अथ च इदमेव कारणमासीत् यत् यदा मम तेन सह प्रेम्णः अभिमानः ध्वस्तीभूतः तदा अत्यन्तं रिक्तताम् अन्वभवम्। पूर्णतया एकाकिनी .....। अधुना कः खलु मम संरक्षणं प्रदातुं शक्नोति?

अन्ततः राममनोहरोऽपि मम उपेक्षया खिन्नः सन् अस्माकम् एकाम् अन्यां सहपाठिनीं नलिनीं मध्यस्थताकार्यार्थम् आवयोः मध्ये सामञ्जस्यं स्थापयितुं वा नियुक्तवान्।

० ० ०

नलिनी मत्समक्षं राममनोहरस्य पक्षं बहुवारं प्रस्तुतवती। अहं राममनोहरस्य चर्चाकरणमपि निवारितवती, अप्रसन्नतां प्रकटितवती। परन्तु सा यदापि मम समीपे उपविशति तदा राममनोहरस्यैव पक्षस्य समर्थं कुर्वती एवं भणति स्म–"कल्पने! अहं जानामि सर्वम्। अथ च राममनोहरोऽपि मन्यते स्म यत् तस्मिन् दिवसे यदाचरितं सः महापराधः एव वर्तते। अनेकधा मानवः तदेव सहसा विधत्ते यन्न कर्तुं कामयते। मानवस्तु मानव एव भावति। देवता भवितुं नार्हति। यदा कदाचित् मानवस्य जीवने दुर्बलाः क्षणाः आयान्ति एव। पश्य, यदा साक्षात् मृत्युः पुरतः समायाति तदा मातरः स्वसुतानपि विस्मरन्ति.....।"

"न हि नलिनि .....।" अहं तस्याः वचांसि आकर्ण्य सहसा आक्रुष्टवती–"माता कथमपि नैवं कर्तुं शक्नोति। यस्याः जनन्याः अन्तःस्थले ममत्वं विराजते, प्रेम्णः प्रवाहो वा सञ्चरति सा स्वयं मृत्योः वरणं करिष्यति, परन्तु स्वकीयं सुतं कथमपि आशङ्कापङ्के नैव प्रक्षेप्स्यति। याः जनन्यः स्वीयजीवनस्य कृते

आत्मजान् तिरस्कुर्वन्ति ताः प्रियताविहीनाः भवन्त्यः इतिहासपुस्तकेषु कुत्सिततमाः मन्यन्ते .....।"

"त्वं सत्यं कथयसि कल्पने!"–नलिनी अग्रे प्रत्युक्तवती–"परं राममनोहरस्य समस्या पृथगेव वर्तते। पश्य, तत्र पारिवारिकपृष्ठभूमेः परिवेशस्य चापि कारणं द्रष्टव्यं भवति। सः धनाढ्यपरिवारस्य बालकः वर्तते। पर्याप्तं लालनपूर्वकं तस्य पालनं संवृत्तम्। एवंविधेषु बालकेषु काचित् भीरुता स्वभावतः एव प्रविशति। नैतस्य तात्पर्यं यत् सः त्वया समं स्नेहं न करोति। अन्ततः त्वं तस्य अनेकान् अन्यान् गुणान् कथं तिरस्करोषि? विगतेषु सप्तसु वर्षेषु केवलं तद्दुःखदायिघटनातिरिक्तं त्वं तस्मिन् कां न्यूनतां प्राप्तवती? कश्चिदपि मनुष्यः परिपूर्णस्तु न भवति .....।"

"न जाने कस्य किं वैशिष्ट्यं भवति, किं च न्यूनत्वम् .....।"–अहं बाष्पमिश्रेण स्वरेण प्रत्युक्तवती–"अहं तु केवलम् इदमेव जानामि यत् प्रेम्णः याम् आधारशिलां सुदृढां निरूप्य अहं राममनोहरस्य पाणिं प्रतिगृहीतवती, यदा सा आधारशिलैव सुदुर्बला भवेत् तदा तदवलम्बनेन को लाभः?"

"न हि कल्पने! त्वं तस्य प्रेम्णः परिवर्तनं कर्तुं न शक्नोषि। पश्य, सः कथङ्कारं स्वकीयान् अभिभावकान् त्वया समं विवाहार्थं समुद्यतान् कर्तुं सङ्घर्षं कृतवान्। यदि तत् प्रेम न,तर्हि किं स्यात् प्रेम? किं केवलम् एकस्यैव दुर्बलस्य क्षणस्य कारणात् त्वं तस्य सप्तानां वर्षाणां प्रेमकृत्यानि परिवर्तयिष्यसि? सः एव प्रथमं प्रेमपात्रं वर्तते। नारी स्वकीयं प्रथमं प्रेमकार्यं तु स्वजीवने कदापि विस्मर्तुं नैव पारयेत् .....।"–नलिनी माम् आवादीत्।

"तव इमानि वचनानि मम विचारे सिद्धान्तहीनानि वर्तन्ते। एवंविधेषु दुर्बलक्षणेष्वेव प्रेम्णः परीक्षा प्रवर्तते। विगतसप्तवर्षाणां प्रेमक्रियाप्रसङ्गेषु सः एव दुर्बलः क्षणः प्रबलीभवन् मम मानसं मथ्नाति .....। नलिनि! अहं किं कर्तुं पारये? त्वमेव वद .....।–" अहं व्यथितहृदया अवदम्।

"अस्तु, तर्हि राममनोहरं विहाय यस्यचिदपि पाणिं ग्रहीष्यसि, किं त्वं विश्वासपूर्वकं कथयितुं शक्नोषि यत् सः तव संरक्षणं पूर्णतया करिष्यत्येव। एतस्य तव समीपे का प्रतिभूतिः वर्तते?"–नलिनी सरोषं अग्रेऽपि एवम् प्रत्युक्तवती–"एवं न स्यात् यत् त्वं राममनोहरं विहाय पश्चात्तापमेव अनुभवेः .....। यदि राममनोहरस्यं त्वया समं गाढं प्रेम नाभविष्यित् तर्हि स्वापराधबोधमनुभूय सः एवं वारं वारं पश्चात्तापं नाकरिष्यत्। त्वत्कृतम् उपेक्षाभावं च विज्ञाय सः त्वदभिमुखं सविह्वलं नागमिष्यत्। अस्तु, इतःपरम् अहम् एतद्विषये पुनः कदापि किमपि च वार्तालापं न करिष्यामि"–इत्येवम् उक्त्वा नलिनी मत्समीपात् निर्जगाम। अहं

च इदमेव चिन्तयामि स्म यत् "कि तस्याः कथने काचिदपि सत्यता वर्तते? .....मया चात्र किं कर्तव्यम् ....." इति।

० ० ०

सा एका शीतयुक्ता सन्ध्या आसीत्। महाविद्यालयस्य कक्षायां बहुकालपर्यन्तं मम समुपवेशनं सञ्जातम् तदनन्तरम् अहं सर्वाणि पुस्तकानि समेकीकृत्य गृहं गन्तुं समद्यता। नलिनी तु तद्दिवसानन्तरं पुनः मया सह कदाचिदपि राममनोहरस्य चर्चां न कृतवती। यद्यपि सा प्रत्यहमेव प्रायः विद्यालये पुस्तकालये वा मिलति स्म परन्तु तद्विषयिकी चर्चा नैव प्रावर्तत। राममनोहरोऽपि मां दूरतः एव पश्यति, न च किमपि वक्तुं प्रयतते स्म। नलिनी अपि सम्भवतः इदमेव मन्यते स्म यत् समये व्यतीते अहमपि सर्वं विस्मरिष्यामि, तथा च शनैः शनैः कालेन सह सामञ्जस्यं स्थापिष्यामि। अहमपि सम्भवतः इदमेव मन्ये स्म यत् कदाचित् एवं भवेदपि यत् अहं राममनोहराभिमुखं पूर्वमिव भवेयम्। परन्तु वर्तमाने काले कश्चिदपि एवंविधो विचारः नाभवत्।

अहं महाविद्यालयस्य पुस्तकालयात् निःसृत्य बसयानस्थानकं प्राप्तवती। किञ्चित्कालानन्तरमेव मम मार्गस्य बसयानं समागतम्। यस्मिन् समये अहं स्वकीयनिवासक्षेत्रस्य स्थानके अवातरं तदानीं सन्ध्यासमयः प्रादुर्भूतः। सन्ध्यासमये यथा प्रतिदिनं स्थानकमेतत् निर्जनं भवति स्म तथैव अद्यापि जनविचरणरहितमेव बभूव। बसयानात् अवतरणसमये मया किमपि विशिष्टं न ध्यातम्। परन्तु यदा किञ्चिदग्रे गतवती तदैव द्वयोः मोटरसाइकिलयानयोः समारूढ़ाः चत्वारः भद्राचरणविवर्जिताः दर्शनेनैव अशिष्टाः असाधवः युवकाः मम अतिसमीपतः एव वेगात् अग्रे निःसृताः, पुनश्च यानं प्रतिनिवर्त्य मम स्पर्शमिव कुर्वाणाः अग्रे प्रयाताः।

मया अनुभूतं यत् तस्मिन् एव काले मत्तः किञ्चित् दूरत्वं विधाय पुरतः गच्छन् एकः कृशकायः दुर्बलः युवकः स्वकीयां दृष्टिं परावर्त्य तान् चतुरोऽपि युवकान् पश्यति स्म। मया अपि ध्यानं न दत्तमासीत् यत् एषः युवकः अपि मया सममेव तस्मिन्नेव स्थानके बसयानात् अवतीर्णः आसीत्। यानारूढाः ते चत्वारः युवकाः पर्याप्तम् अग्रे गत्वा पुनः प्रतिनिवृत्ताः भवन्ति स्म। अहं तु तीव्रैः चरणैः चलन्ती आत्मविश्वासपूर्वकम् अग्रे गच्छन्ती निर्भीकतां प्रदर्शयामि स्म। अहं किञ्चित् विरम्य यदा तान् सरोषं घूर्णितवती तदा ते निर्लज्जाः साट्टहासं हसितुम् आरब्धवन्तः। " अहो! इदम् अनिन्द्यम् सौन्दर्यम् .....! एष च प्रबलः कोपः ..... "-तत्रैकः युवकः अशिष्टस्वरेण प्रोक्तवान्।

मम रुधिरं तप्तमिव सञ्जातम्। परन्तु अहं तस्य वाक्यम् अश्रुतमिव विधाय

तस्य च उपेक्षां प्रदर्श्य अग्रे प्रस्थितवती। सम्भवतः मम तूष्णीम्भावं विलोक्य तेषां दुष्टयुवकानां धृष्टता वृद्धिं गता।

एकं यानं मां परितः परिभ्रान्तुम् आरभत। तत्र एकः युवा मम उत्तरीयं हठात् आक्रष्टुं प्रायतत। अहं काठिन्येनैव स्वीयम् उत्तरीयं सुरक्षितुं प्राभवम्। एतत्प्रयासे मम पुस्तकानि मार्गे एव विकीर्णानि जातानि।

तस्मिन्नेव काले असौ पूर्वचर्चितः दुर्बलः युवकः, यो मम पुरतः चलति स्म माम् एतैः दुर्युवकैः परिवृतं विलोक्य सहसा प्रतिनिवृत्य एतान् युवकान् सक्षोभम् उवाच-"किं भोः! किं युष्माकं लज्जा अस्तङ्गता? किमेतत् कुरुथ .....?"

"ओ! तूष्णीम् इतः प्रस्थानं कुरुष्व, यदि स्वकीयजीवनस्य कल्याणं कामयसे" तन्मध्ये एको युवकः प्राह।

"व्यर्थं न भाषस्व ....."-युवापि सः तम् प्रत्युवाच।

"इयं तव का वर्तते?"-तेषु एकः दुष्टयुवकः औद्धत्येन प्राह। तदनन्तरं च एतस्य युवकस्य साक्षात् अभिमुखमेव भूत्वा स्वकीयं यानं स्थापितवान्। एतमन्ध्ये द्वितीयं यानमपि तेन सहैव समागत्य तत्रैव निरुद्धम्। तेषां मनोभावाः नितान्तं क्रूरतापूर्णाः दुरभिसन्धियुक्ताश्च प्रतीयन्ते स्म।

मया विचारितं यत् सः युवकोऽपि ततः सद्यः एव पलायनमेव करिष्यति।अन्ततः यदा मम सप्तवर्षीयं सान्निध्यं साहचर्यं च तिरस्कृत्य राममनोहरः आत्मनः रक्षार्थं पलायनं कर्तुं शक्नोति तदा एषः कृशकायः युवकस्तु मत्कृते नितान्तम् अपरिचितः एव आसीत्। तेन सह च न कश्चित् मम दूरस्थः सम्बन्धोऽपि आसीत्, न चाहं तस्य किमपि अभूवम्।

परन्तु तत्र तु किञ्चित् विचित्रमिव घटितम्। सः युवकः यो मम कश्चिदपि न आसीत्, अकस्मादेव वक्षःस्थलं विस्तार्य मम शीलरक्षार्थं तेषां दुष्टयुवकानां पुरस्तात् साम्मुख्यं कर्तुं सरोषं समुद्यतः सञ्जातः। तत् सर्वं विलोक्य च अहं तदानीम् अत्यन्तं भयग्रस्ता अभूवम्। इमे दुर्युवकास्तु तेषां मार्गलुण्टाकानाम् अपेक्षया कुत्सिततराः आसन्, ये खलु मम सुवर्णाभूषणानि धनानि च लुण्टितवन्तः।

अधुना ते चत्वारोऽपि दुर्युवकाः तं भद्रयुवकं परितः स्थित्वा तदुन्मुखाः सम्भूताः। परन्तु सः युवकस्तु निर्भीकः तान् सर्वान् अपरिगणय्य उपेक्षाभावेन च तान् विलोक्य माम् अवादीत्-"गच्छतु भवती इतः सत्वरम् .....।"

अहं तु तम् एतस्यां विषमवेलायाम् एकाकिनं परित्यज्य गन्तुं न कामये स्म। मम अन्तरात्मा न मां तथा कर्तुम् अनुमन्यते स्म।

तत्र एकः युवकः तम् एवम् आह–"त्वम् एनां परित्यज्य इतः शीघ्रं प्रस्थास्यसि, न वा .....?"

"अहं युष्मादृशः आत्मविहीनः निर्हृदयश्च न भवामि"–सः युवकः तान् प्रत्युवाच।

ततस्तु नेत्रनिमीलनसमकालमेव एकः दुष्टयुवकः न जाने कुतः, एकां छुरिकां निःसार्य तदुपरि सहसा प्रहारं कर्तुं प्रारब्धवान्। अन्ये त्रयः युवकाश्च तस्य भद्रयुवकस्य उभावपि हस्तौ सबलं गृहीत्वां तं किमपि प्रतिकारं कर्तुम् अक्षमम् अकुर्वन्। परन्तु सः युवकः निरन्तरं तैः सह निष्फलं सङ्घर्षं प्रकुर्वाणः तारस्वरेण–"त्रायध्वम् .....त्रायध्वम् .....एतेभ्यः दुष्टेभ्यः कश्चित् मां रक्षतु .....हे ईश्वर! अरे, कोऽपि वर्तते ....." इत्यादीनि वाक्यानि मुखात् साक्रोशं निःसारयति स्म।

तस्य विकटं सङ्घर्षाक्रोशं श्रुत्वा समीपस्थेभ्यः दूरवर्तिभ्यश्च गृहेभ्यः केचन जनाः यदा निःसर्तुम् आरब्धाः तदैव ते चत्वारोऽपि युवकाः सहसा पलायाञ्चक्रिरे। अहमपि तथा समुद्विग्नहृदया सोच्चैः समाक्रुश्यामि स्म। तस्य युवकस्य तु एकं नेत्रं छुरिकाप्रहारेण पूर्णतया क्षतिग्रस्तं सञ्जातम्। मुखे च बीभत्सरूपाः व्रणाः समुत्पन्नाः। तस्य उदरात् वक्षःस्थलाच्चापि छुरिकाघातात् अनवरतं रुधिरं प्रवहति स्म। तस्य वस्त्राणि रक्तावलिप्तानि जातानि। यदा समीपस्थगृहेभ्यः निःसृत्य केचन जनाः तत्र समागताः तदानीं तु युवकः पृथिव्यां निपत्य सकष्टं स्वीयानि अङ्गानि समुत्क्षिपति स्म। तद् विलोक्य एवं प्रतीयते स्म यदस्य प्राणाः शरीरात् निःसरिष्यन्ति एव।

तत्क्षणादेव कश्चित् सज्जनः स्वीयेन कार्यानेन तं युवकं चिकित्सालयं नेतुम् उद्युक्तः अभवत्। अहमपि तेन सममेव तत्र कारयाने समुपविष्टवती। मम तत्परतां विलोक्य सर्वे इदमेव ज्ञातवन्तः यदहं तस्य युवकस्य काचित् निकटसम्बन्धिनी भवामि। शीघ्रमेव सः शल्यचिकित्सालयं प्रापितः। तत्रस्थः चिकित्सकः मां प्राह यत् तस्य शल्यक्रिया तत्क्षणमेव आवश्यकी। तदर्थं च दशसहस्ररूप्यकाणां तत्कालमेव प्रबन्धः करणीयः आसीत्।

अहं तु तस्य युवकस्य नामधेयमपि न जानामि स्म। यदा मया उक्तं यत् स तु केवलं मम नगरबसयानस्य सहयात्री आसीत्, तदा ते परस्परं विलोक्य किङ्कर्तव्यताविमूढाः सञ्जाताः। अन्ततः अहम् उक्तवती यत् कृपया शल्यक्रियां सम्पादयन्तु, अहम् एतस्य युवकस्य गृहं गत्वा अथवा स्वगृहं गत्वा तत्कालमेव रूप्यकाणि प्रापयिष्यामि।

तस्य मूर्च्छितस्य युवकस्य वस्त्रेषु एकं परिचयपत्रं प्राप्तं, यस्मिन् तस्य

आवाससङ्केतः लिखितः आसीत्। सः युवकः अस्माकम् आवासक्षेत्रस्य निकटे एव निवसति स्म, तस्य नामधेयं च 'वीरेन्द्रः' इत्यासीत्।

तस्य गृहं गत्वा यदा मया तस्य पारिवारिकाः सदस्याः तद्दुर्घटनाविषये सूचिताः तदा ते सर्वे हतप्रभाः भूत्वा सहाहाकारं रोदितुम् आरभन्त। कथञ्चित् सान्त्वनेन तस्य माता, लघ्वी स्वसा लघुभ्राता च मया समं चिकित्सालयं प्राप्तवन्तः। दुर्भाग्यात् तस्य युवकस्य जनकः नासीत्। स्वकीयगृहस्य सः एव ज्येष्ठः पोषकश्च सदस्यः आसीत्। तस्य एकः औषधापणः आसीत्, तस्मिन् दिने च तमेव स्वकीयम् आपणं पिधाय सः रात्रौ मया सममेव बसयानात् प्रतिनिवर्तते स्म।

शल्यचिकित्सानन्तरं तस्य प्राणाः कथमपि रक्षिताः। पञ्चदिवसपर्यन्तं तु सः चिकित्सालये एव स्थितः। तदननतरं च सः स्वकीयं गृहं समागत्य मासद्वयं यावत् स्वास्थ्यलाभाय चिकित्सकैः परामृष्टः। तस्य एकं नेत्रं तु तस्मिन्नेव काले पूर्णतया विनष्टं सञ्जातम् आसीत्। छुरिकाप्रहारकारणाच्च मुखमण्डलमपि यत्र तत्र व्रणचिन्हसमन्वितं सत् कुरूपम् आसीत्। यदा अहं तं द्रष्टुं तस्य गृहं गच्छामि स्म तदा मम अन्तरात्मा तं विलोक्य इदमेव कथयति स्म यत्-"पश्य, त्वत्कारणादेव एतस्य इयं स्थितिः सञ्जाता"।

एकदा वार्तालापप्रसङ्गे तस्य जननी माम् उक्तवती यत् वीरेन्द्रस्य विवाहोऽपि निश्चितः आसीत्, परन्तु तद्दुर्घटनानन्तरं कन्यापक्षीयाः तस्य कुरूपतां निर्वर्ण्य विवाहस्य निर्णयं स्थगितं कृतवन्तः। वीरेन्द्रस्य गृहस्य आर्थिकी स्थितिरपि दुर्बला एव बभूव। तस्य माता द्वौ च लघुस्वसृभ्रातरौ तदाश्रये एव निर्भरौ आस्ताम्। मासद्वयात् तस्य आपणोऽपि न समुद्घाटितः। यदाप्यहं तस्य गृहं गच्छामि स्म तदा तत्सर्वं विलोक्य मम मानसं नितरां दूयते स्म। तद्घटनानन्तरं तु अहमपि पर्याप्तं समयं स्वमहाविद्यालयमपि गन्तुं नैव प्राभवम्।

○ ○ ○

बहुदिवसानन्तरं यदा अहं महाविद्यालयं गतवती महविद्यालयस्य प्राङ्गणे केषुचित् पदेषु गतेषु राममनोहरः दृष्टिपथम् आगतः। सः किञ्चित् औदासीन्येन मां पश्यति स्म। अहमपि तस्मिन् दिवसे तदभिमुखमेव प्रयाता। मां निरीक्ष्य एका मन्दस्मितिः तस्य आनने प्रादुरभवत्। मम ओष्ठयोः अपि मन्दस्मितिः तथैव प्रकटीभूता।

"कथम्? कीदृशी त्वम् .....?"-सः पृष्टवान्।

"समीचीनमेव सर्वम् .....।" अहमपि मन्दस्वरेण प्रत्युक्तवती।

तदनन्तरम् प्रायः मौनमेव। आवां सहैव गच्छन्तौ महाविद्यालयस्य भवनं

प्राप्तवन्तौ। यदा तत्र नलिनी आवाम् एवं दृष्टवती तदा तस्याः मुखमण्डले काचित् उत्फुल्लता प्रसन्नता च दृष्टा।

"चलन्तु, जलपानगृहं गत्वा सहैव तत्र काफीपानं कुर्महे ....."-राममनोहरः नलिनीं विलोक्य माम् अभिलक्ष्य च प्रोक्तवान्। तदनन्तरं वयं महाविद्यालयस्य जलपानगृहं प्रविष्टाः।

"तदा किं त्वं निर्णयं कृतवती कल्पने .....?" राममनोहरो नम्रेण स्वरेण मां पृष्टवान्।

"एवम्, अहं निर्णयं कृतवती"-अहम् उक्तवती-"अहं नलिन्याः वचनेषु विचारेषु च बहुवारं चिन्तनं कृतवती। अथ च राममनोहर! अहं त्वदर्थं स्वीयं हृदयकपाटमपि समुद्घाटितवती। यतो हि त्वं तु मम सप्तवर्षाणां सहचरः सहपाठी भवसि। तव सर्वस्य प्रेमकृत्यस्य च उपरि दुर्घटनावशात् यो दुर्बलः क्षणः समारूढः आसीत् तस्य क्षणस्य बन्धनं किञ्चित् शिथिलमपि भवितुं प्रारभत।"

अहं किञ्चित् विरम्य दीर्घं च निःश्वस्य पुनः स्वकीयं वाक्यं पूर्णं कर्तुम् एवम् उक्तवती-"परन्तु एतस्मिन्नेव काले सः पुरुषः, यो हि मदीयः कोऽपि न भवति स्म, एकस्मिन् तथैव दुर्घटनापरिपूर्णे दुर्बले क्षणे साम्प्रतं मम सर्वस्वम् इव बभूव। न जाने कथं सः हृदयकपाटम् उद्घाट्य मम अन्तः प्रविष्टः सञ्जातः। अधुना सः एकनेत्रविहीनः गभीरव्रणयुक्तमुखमण्डलः अस्वस्थश्च वर्तते। परन्तु मत्कृते साम्प्रतं सः एव आश्रयः सम्पन्नः। अहं तेन सममेव विवाहस्य निर्णयं कृतवती।"

एतत् सर्वम् उक्त्वा यदा अहं तूष्णीम् अभवं तदा राममनोहरस्य दीप्तियुक्तं मुखं विवर्णमिव सञ्जातम्। परन्तु न तत्र किमपि अहं ध्यातवती।

अहं शान्तभावेन समुपविष्टौ नलिनीराममनोहरौ च गहनं विलोक्य "ईश्वरेच्छा बलीयसी" इत्युक्त्वा ततः निःसृतवती। ततः मम चरणौ वीरेन्द्रस्य गृहस्य अभिमुखं बभूवतुः।

अधुना भवन्तः एव कथयन्तु यत् इदं मम द्वितीयं प्रेम वर्तते अथवा अद्वितीयं प्रेम कथयिष्यते .....? इति।

***

जाज्वल्यमानं जीवनज्योतिः

"अयि वसुधे। अधुना त्वं चिन्तां मा कुरु। सर्वं समुचितं सम्पत्स्यते। केवलम् इयम् अद्यतनीया रात्रिः कथमपि व्यतीता भवेत्"–सुमित्रा रोगशय्यायां बहुभ्यः दिवसेभ्यः विद्यमानायाः वसुधायाः परमां व्याकुलतां निरीक्ष्य सान्त्वयन्तीव प्रोक्तवती।

सख्याः सुमित्रायाः तत् सान्त्वनवचनं श्रुत्वा वसुधा प्रोक्तवती–"सुमित्रे! कां सान्त्वनवचनं कथयसि? आत्मानम् उत माम्? अहं सम्यक् एव जानामि यत् श्वस्तनं सूर्योदयं द्रष्टुम् अहम् असमर्था भविष्यामि इति। मम मरणं प्रायः निश्चितमेव। परन्तु मम दुःखं तु इदं वर्त्तते यत् मम प्राणान्तसमयम् अधिगम्य अपि परिवारस्य कश्चित् सदस्यः न समागतः इति"–वसुधा साश्रुनयना सुमित्राम् अवदत्।

वसुधायाः वचनं श्रुत्वा सुमित्रा स्वकीयनयनयोः समुद्भूतानि बाष्पाणि गोपयन्तीव प्रत्यब्रवीत्–"न हि वसुधे! ते सर्वे निश्चयेन एव समागमिष्यन्ति। मन्ये ट्रेनयानस्य आगमने विलम्बो भवेत् .....। अथवा स्वीयैः वाहनैः एव प्रस्थिताः स्युः .....। मन्ये अधुना क्वचित् पथि एव भवेयुः, इह आगच्छन्तः एव भवेयुः .....। अथवा मन्ये प्रातःकाले एव तेषाम् आगमनं प्रभवेत् .....। सूचना तु मया दूरभाषाद्वारा यथासमयमेव प्रदत्ता आसीत्। न जाने क्व विलम्बायन्ते सर्वे इति। अस्तु, त्वं विश्वासं कुरुष्व। अहं किञ्चित्कालानन्तरं पुनः आगमिष्यामि"–इति कथयन्ती सुमित्रा वसुधायाः कक्षात् निःसृत्य समीपस्थम् एव स्वकीयं कक्षं प्रति अगच्छत्।

सुमित्रायाः ततः प्रस्थनानन्तरम् एव वसुधायाः मनसि चिन्तनचक्रस्य चलनं प्रारब्धम्–"परमेश्वरः अपि कदाचित् जीवने किंविधं नाटकं विरचयति। ये खलु अस्मदीयाः आसन्, रुधिरसम्बन्धयुक्ताः, ते तु सर्वे अस्मिन् वृद्धाश्रमे माम् एकाकिनीं परित्यज्य प्रायः विस्मृतवन्तः एव। परन्तु ये खलु अज्ञाताः अपरिचिताः अस्मिन् आश्रमे एव निवसन्तः अल्पकालादेव किञ्चित् परिचिताः सञ्जाताः ते एव साम्प्रतं मम साहाय्यं कुर्वन्ति, नानाविधानि कार्याणि च यथाकथञ्चित् साधयन्ति। अस्यां महाप्रयाणवेलायां यदा सिंहावलोकनं करोमि तदा प्रतीयते यत् सम्पूर्णं जीवनमेव प्रायः व्यर्थमिव सञ्जातम् इति। जीवनस्य यान् क्षणान् स्वकीये वस्त्राञ्चले सङ्ग्रहीतुम् ऐच्छं ते क्षणाः समयस्य तरङ्गैः न जाने क्व प्रक्षिप्ताः इति। अहं मन्ये स्म यत् जीवने न जाने किं किं कियत् च न प्राप्तवती इति, परन्तु साम्प्रतं प्रतीयते यत् किं किं कियत् च न हापितवती इति।

अद्य अहम् अनुभवामि यत् जीवने मम सर्वं सञ्चितं बालुकाकणा इव दृढमुष्टिबन्धनेऽपि शनैः शनैः क्षीणाः प्रावर्तन्त इति। यान बालकान् अहं नवमासपर्यन्तं

स्वकीये कुक्षौ रुधिरैः सिक्तवती, हृदयेन संयोज्य पालितवती, हस्ताभ्यां समुत्थाप्य वर्धितवती, ते एव अस्मिन् विकटे काले परकीयाः स्नेहहीनाः विमुखाश्च भवेयुः इति न कदाचिदपि चिन्तितवती आसम्। यान् पालयितुम् अहम् आत्मनः अस्तित्वं तिरस्कृत्य सर्वं सम्पादितवती ते एव साम्प्रतं मदीयम् अस्तित्वम् एव निषेधयन्ति। तेषां कृते मदीयम् अस्तित्वं तथाविधं नगण्यम् अस्ति यत् मम अन्तकालं विज्ञाय अपि ते मया मेलितुं सन्द्रष्टुं वा न समागताः।"

इत्येवं सर्वं चिन्तयन्त्याः वसुधायाः नेत्रे शनैः शनैः निमीलिते अभवताम्। आलस्यवशात् दौर्बल्यवशात् च किञ्चित्कालं सा सुप्तवती।

प्रायः केनचित् सत्यमेव निगदितं यत् नार्याः सर्वविधाः सम्बन्धाः तस्याः पतिमेव समुपलक्ष्य प्रवर्तन्ते इति। यदि पतिः न भवति तर्हि तस्याः प्रायः अस्तित्वमेव समाप्तमिव जायते। यावद् वसुधायाः पतिः श्रीदिवाकरदत्तः जीवितः आसीत् तावत् तस्याः उभावपि सुतौ वध्वौ च उच्चस्वरेण तस्याः समक्षं किमपि वचनमेव न उच्चारयन्ति स्म। न चैव तस्याः कस्यचित् वचनस्य आदेशस्य वा प्रतीकारमपि कृतवन्तः। यावत् श्रीदिवाकरदत्तः जीवितः आसीत् तावत् सा आत्मानम् अस्य संसारस्य सर्वतोऽधिकां सुसम्पन्नां महिलां मन्यते स्म। सर्वं खलु सुखमयमेव आसीत् तस्याः जीवने। स्निग्धः पतिः, कार्यकुशलौ शिक्षितौ पुत्रौ, तयोश्च प्रियवध्वौ। दिवाकरदत्तः यद्यपि अतिव्यस्तः चिकित्सकः आसीत् तथापि पत्नीकृते बालकानां च कृते तु पर्याप्तं समयं व्यवस्थापयति स्म।

अकस्मादेव वसुधायाः निद्रा पुनः भग्ना बभूव। सा पुनरपि स्वकीयं प्राक्तनं जीवनं स्मारं स्मारं विचारयितुं प्रारब्धवती–अहो दिवाकर! त्वम् इतः यदा गतवान् ततः मम सर्वः कुटुम्बः एव अस्तः व्यस्तः च समजायत। समग्रं जीवनचक्रमेव ध्वस्तं जातम्। यान् बालकान् अहं पालितवती, वर्धितवती,पाठितवती च ते एव माम् एकाकिनीम् अस्मिन् वृद्धाश्रमे परित्यज्य गताः–"भवती अत्र समानवयःसम्पन्नाभिः महिलाभिः समम् अधिकां प्रसन्नतां प्राप्स्यति" इति कथयन्तः। अयि! दिवाकर! त्वमेव कथय यत् काचित् जननी किं स्वीयैः सुतैः दूरीभवन्ती वस्तुतः प्रसन्नतां शान्तिं च लभेत?

सर्वथा सत्यं तथ्यं च इदमेव वर्तते यत् मदीयाः पुत्रा माम् इदं वक्तुम् असमर्था आसन् यत् तव इह गृहे स्थितिः अस्माकम् आहारेषु, वार्त्तागोष्ठीषु, चायमेलासु, पत्रक्रीडासु, मित्रमण्डलेषु च विघ्नं कल्पयति इति।

अहम् एतद् ज्ञातुम् इच्छामि यत् पुत्राणां जीवनचर्यायां मातापित्रोः उपस्थितिः किं समुद्विग्नतादायिका वैमनस्यवर्धिका कष्टकारिका च भवेत्? वस्तुतः तु तयोः

उपस्थितिः सम्बन्धं सदृढ़मेव विरचयति। पुनः कथं खलु पुत्राणां कृते पितरौ भारभूतौ प्रतिभातः?

नाहं ज्ञातुं पारये यदत्र कस्य दोषं कथयेयम्? भाग्यस्य दोषः, आधुनिकसमाज–व्यवस्थायाः विडम्बना? उत संस्काराणाम् अभावः? के खलु वर्तन्तेऽत्र दोषभांजः? हे दिवाकर! यद्यपि पुत्रेभ्यः संस्काराः तु अस्माभिरेव प्रदत्ताः, पुनः तेषां पालने शिक्षणे निर्माणे च कुत्र खलु स्खलनं सञ्जातम्? किम् एतान् दिवसान् द्रष्टुमेव पितरौ पुत्रान् कामयेते? यैः अहम् अत्र निवासार्थं वृद्धाश्रमे परित्यक्तास्ते मां द्रष्टुं, मम वार्ताम् अवगन्तुं वा कथं न समागच्छन्ति? कि मम स्वास्थ्यवृत्तान्तं ज्ञातुमपि तेषाम् अभिलाषो न प्रवर्तते? कथम् एतावती विरक्तिः तेषां स्वजननीं प्रति? किं तेषाम् आत्मा तान् न धिक्करोति? अथवा किं ते आत्मवन्तः एव न? किं ते सर्वथा आत्महीनाः प्राणहीनाः संवेदनाशून्याः स्नेहहीनाश्च संवृत्ताः?

अद्य सुमित्रा कथयति स्म यत् लोकलज्जाभयाद् वा ते सर्वे ध्रुवमेव समागमिष्यन्ति इति। जनाः किमपि कथयेयुः इति मत्वा किं ते आगच्छेयुः? जननी रुग्णा वृद्धा आसन्नमरणा च वर्तते इत्येतत् किं तेषाम् अगमनस्य कारणं न भवेत्? अयि दिवाकर! इमे ते एव पुत्राः वर्तन्ते येषां साधारणज्वरावस्थायां सामान्यशिरःपीडायामपि वा वयम् आरात्रिं जागृमः स्म, येषाम् ईषद्व्यथां समाकर्ण्य वयं कम्पामहे स्म। इमान् एव बालकान् उपलक्ष्य त्वं कथयसि स्म यत् इमे ज्येष्ठाः भूत्वा आवयोः वृद्धावस्थायाम् अवलम्बदण्डाः भविष्यन्ति इति। अधुना त्वमेव पश्य यत् कथम् इमे मम वृद्धावस्थायाम् आश्रयदण्डाः सम्भूताः–

हे दिवाकर! एतत् समीचीनमेव सम्पन्नं यत् एवम् एतैः सुतैः सम्पादितायाः एतस्याः भयावहवास्तविकतायाः प्रज्ञानात् पूर्वमेव सारहीनम् इमं संसारं परित्यज्य त्वं दिवं प्रयातः इति। अन्यथा एवम् एतेषां लालितानां प्रियाणां पुत्राणां स्नेहशून्यतां रूक्षतां विमुखतां वा त्वं सोढुं न प्रभवेः एव। जानासि दिवाकर! एकदा तव ज्येष्ठः पुत्रः सर्वेशः मां किम् उवाच? स कथयति स्म–"भवन्तौ मां पालयित्वा किंविधम् उपकारं कृतवन्तौ? एतत् सर्वं तु संसारे सर्वे अपि मातापितरः पुत्रार्थं कुर्वन्ति एव" इति।

साम्प्रतं प्रतीयते यत् सर्वेशः सत्यमेव कथितवान् इति। अस्माभिः किमपि न कृतं तेभ्यः। साम्प्रतं विचारयामि यत् एवंविधयोः पुत्रयोः परिपालनात् अपि, यदि कश्चित् पशुरेव अस्माभिः पालितः अभविष्यत् तर्हि सः अस्मान् प्रति निश्चयेन कृतज्ञताभावभरितः अभविष्यत्।

प्रायः मम एतौ पुत्रौ न जानीतः यत् अस्माभिः एतयोः कृते किं कृतं, किं किं वा न कृतम् इति। यदा एतयोरपि सुताः वृद्धिं प्राप्स्यन्ति तदा तौ इदमेव

अनुभविष्यतः यत् मातापितृपदप्राप्तिस्तु सरला, परन्तु तत्कर्तव्यतानिर्वाहः नितरां कठिनः इति। यदा स्वकीयं सर्वस्वं हूयते तदा एव पुत्राः स्वावलम्बिताम् अधिगच्छन्ति। अस्तु, भगवन्तं प्रार्थये यत् तयोः जीवने एतादृशः समयः न आगच्छेत् यश्च साम्प्रतं मया अत्र वृद्धाश्रमे प्राप्तः। अहं किं कुर्याम्? मातृत्वकारणात् सुतान् अधिकृत्य शापशब्दमपि समुच्चारयितुं न प्रभवामि। पुत्राः महत् दुष्टत्वम् आचरेयुः चेदपि पितरौ तु स्वगरिमाणं महिमानं वा हातुं न अर्हतः। उक्तमपि शास्त्रेषु– “कुपुत्रो जायेत क्वचिदपि कुमाता न भवति” इति।

अयि! दिवाकर! सत्यमेव कथयसि स्म यत् कष्टं तु अपेक्षाणाम् अभिलाषी जनः एव प्राप्नोति इति। निरपेक्षः जनस्तु सदापि सुखी भवन् दुःखानि सततं परिहरति एव। अत एव अहं तयोः पक्षतः साम्प्रतं कामपि अपेक्षां न करोमि। तौ इह समागत्य मम अन्तिमं संस्कारं कुर्याताम् इत्यपि अहं नैव अभिलषामि।

इत्येवं सर्वं चिन्तयन्त्याः वसुधायाः स्मृतिपथे अकस्मादेव समागतं यत् दिवाकरः प्रायशः कथयति स्म यत् चिकित्साशास्त्रमहाविद्यालयेभ्यः चिकित्साविज्ञानं पाठयितुं क्रियात्मकम् अध्ययनं सम्पादयितुं च मानवशरीरस्य महती आवश्यकता भवति इति। मानवः दाहसंस्कारं विधाय स्वशरीरं भस्मसात् करोति। अल्पीयांसः एव अङ्गुलिगणनीयाः पुरुषाः भवन्ति ये स्वशरीरं चिकित्साविभागेभ्यः प्रयच्छेयुः।

यदा दिवाकरदत्तः स्वकीयनेत्रयोः दानं विधातुं स्वाभिलाषं प्रकटितवान् तदा तस्याः धर्मभीरु चित्तं व्याकुलं जातम् आसीत्।सा तु दिवाकरं नेत्रदानात् परावर्त्तयन्ती कथितवती आसीत्–“कृपया त्वं नेत्रदानं न कुरु, अन्तसमये स्वकीयस्य शरीरस्य अपूर्णतायाः विधानात् विकलाङ्गताकल्पनात् वा परलोकप्राप्तिं न विनाशय इति।” परन्तु दिवाकरः तस्याः वचनं निशम्य सर्वं तस्याः प्रतिपादनं परिहासहेतुकं मत्वा अन्ततः पूर्वनिश्चयानुसारं स्वकीयनेत्रयोः दानं कृतवान् एव आसीत्।

अधुना वसुधायै इदमेव प्रतीयते–“मम पतिः स्वीयं परलोकं न नाशितवान्, प्रत्युत सः नयनयोः सार्थक्यमेव कृतवान्। सः तु न केवलम् इहलोकमेव, अपितु स्वकीयं परलोकमपि प्रसाधितवान्। अहं स्वयमेव स्वकीयम् इहलोकं परलोकं च साम्प्रतं विनाशयन्ती अस्मि। दिवाकरदत्तः यथासमयं स्वकीयस्य भागस्य परोपकारकार्यं सम्पादितवान् अधुना तु ममापि पर्यायो वर्तते यत् अहं स्वीयं परलोकं प्रसाधायेयम्। ये खलु मां निरर्थकं वस्तुजातं मन्यन्ते तान् अहं बोधयितुम् इच्छामि यत् भवन्तः तु जीवन्तोऽपि कस्यचित् उपकारं न कृतवन्तः,परन्तु यदि मानवस्य सदिच्छा भवेत् तर्हि स मृतो भूत्वापि अनेकेषां मानवानां कृते स्वकीयाम् उपयोगितां प्रकटीकर्तुं प्रभवति इति।”

एवं स्वकीयाङ्गदानभावनां मनसि निधाय वसुधा अङ्गस्य दानं कुर्वाणस्य पुरुषस्य पक्षतः विचारं कर्तुं प्रारब्धवती। "एषः तु सुखकरः एव अनुभवः प्रतीयते यत् मरणानन्तरं भवताम् अभावेऽपि भवतां सहभावः प्रकारान्तरेण लोके प्रत्येष्यते। भस्मीभूतोऽपि भवान् स्वीयैः विभिन्नैः अङ्गैः कुत्रचित् जीवितः इव प्रतिभास्यति। कस्यचित् अन्यस्य शरीरे सुस्थापिताभ्यां स्वीयनयनाभ्याम् अयं संसारः अवलोक्यते भवता। कस्मिंश्चिद् अन्यस्मिन् शरीरे स्थितं भवदीयं हृदयं स्पन्दिष्यते, वृक्कः (गुर्दा) च कार्यरतः भविष्यति।"

अन्ततः सर्वम् एतत् विचारयन्ती वसुधा सुमित्राम् आहूतवती। कतिपयेषु क्षणेषु एव सुमित्रा वसुधायाः कक्षे तस्याः समक्षम् पुनः: उपस्थिता सञ्जाता। कथञ्चित् स्वपाणिम् उत्थाप्य वसुधा सुमित्रायाः पाणिं स्पृशन्ती अब्रवीत्-"सुमित्रे! मम अन्तिमः समयः समागतः इति प्रतिभाति। अहम् एकम् आवश्यकं कार्यं त्वां कथयितुम् इच्छामि। मन्ये त्वं सर्वतोभावेन मम वचनम् अवधानपूर्वकं निशम्य मम अन्तिमस्य अभिलाषस्य च महत्त्वं विज्ञाय मम मनसः कामनां पूरयिष्यसि इति।"

वसुधायाः अश्रुपूर्णं वचनं समाकर्ण्य सुमित्रा प्रावोचत्-"भगिनि! त्वं निस्संशयं कथयस्व। अहं यथाशक्ति तव अभीप्सितं पूरयितुं प्रयासं विधास्यामि। म्रियमाणस्य पुरुषस्य अन्तिमायाः इच्छायाः समादरस्तु करणीय एव।"

वसुधा सुदीर्घं निःश्वस्य अब्रवीत्-"सुमित्रे! त्वं मम साहाय्यं सदा सम्पादितवती। अधुना जीवनस्य अन्तिमावसरे कृपया मम एकम् अपरं कार्यं सम्पादयस्व। यदा अहं शरीरम् इदं विहाय परलोकं प्रतिष्ठेय तदा मम शरीरम् इदं मम पुत्रेभ्यः न समर्पणीयम्, अपितु चिकित्सासंस्थनाय समर्पयितव्यम्। मम नेत्रे, वृक्कौ, यानि अङ्गानि मानवस्य कृते उपयोगीनि भवेयुः तानि सर्वाणि रोगिणाम् उपयोगाय ग्रहीतव्यानि। अथ च मम अवशिष्टं शरीरमपि अस्थिविज्ञानम् अधीयानेभ्यः छात्रेभ्यः प्रदेयं, येन तस्य उपयोगः अध्ययने अध्यापने च भवेत्।"

इत्येतत्सर्वं कथयन्त्याः वसुधायाः नेत्रे शनैः शनैः निमेषरहिते सञ्जाते। श्वासगतिरपि अव्यवस्थिता भूत्वा समापनाभिमुखा प्रवृत्ता। सा चिरनिद्रायां विलीना। साम्प्रतं तस्याः आनने चिरशान्तेः सन्तोषस्य च आभा प्रतिभासते स्म। सा मृत्वापि अमृतस्य रहस्यं ज्ञातवती। सुमित्रा अनुभूतवती यत् अस्यां गहनायां कृष्णायां निशायामपि एकः लघुदीपकः स्वीयैः प्रखरैः तेजोभिः अन्धकारं विदार्य प्रकाशं विस्तारयितुं प्रयतते इति।

***

प्रचण्ड-प्रतीक्षा

अद्याऽपि मम जननी मुख्यद्वारे एव गमनाऽऽगमनं कुर्वाणा मम प्रतीक्षायां निरता बभूव। तस्यास्तु एष प्रायः नियम एव आसीत् यत् गृहकार्येभ्यो निवृत्ता भूत्वा मम प्रतीक्षाकरणम् एव तस्या एकमात्रं कार्यम्। इदमेव च तस्याः दिनचर्या। प्रतीक्षायां गमनाऽऽगमनं कुर्वाणायाः तस्याः चरणानि समयस्य गतिं कियता तीव्रेण वेगेन मापयन्ति स्म इति तस्याऽऽभासस्तु मयाऽपि कदाचित् न कृतः। गृहस्य समक्षे रिक्शायानात् अवतरण-समकालमेव जननी किञ्चिद् उद्विग्ना भवन्ती मां पृष्टवती-"अद्य तु बहु विलम्बः सञ्जातः?"

"एवम् अम्ब! अद्य कार्यालये ध्वन्यङ्कनक्रियायाम् (रिकार्डिंग) एव अतिशयः समयो व्यतीतः"-कुमुदिनी प्रत्युक्तवती।

"यदाऽपि तव गृहागमने विलम्बः प्रवर्तते तदा मम मानसम् अतिशयव्यथितं जायते"-माता प्रोक्तवती।

"अहो! अम्ब! एवंविधाभिः समुद्विग्नताभिः जीवनं न चलिष्यति।यदा कार्यं भवति तदा कदाचित् क्षिप्रता विलम्बता वा प्रवर्तिष्यत एव"-कुमुदिनी प्रत्युक्तवती।

भोजनमञ्चे (डाइनिंग टेबल) जननी शीघ्रमेव चायादिकं पेयं जलपानसामग्रीं च व्यवस्थापयत्। अहमपि किञ्चिद् विश्रम्य मुखादिकं च प्रक्षाल्य चायपानार्थम् आसने समुपविष्टवती। अहम् अनुभूतवती यद् इयमेव अस्माकं जननी आकाशवाणी-कार्यालयात् प्रत्यागमनकाले कियतीम् उद्विग्नतां दुश्चिन्तां च धारयति स्म। परन्तु साम्प्रतं तु सा अत्यन्तं सुशान्ता निश्चिन्ता सुदृढमानसा च प्रतीयते स्म।

यदा समयः प्रतिकूलो भवति तदा जीवनम् अत्यन्तं भयावहं प्रतिभाति। एकम् अज्ञातं भयं सदैव मानसम् आत्माभिमुखम् आकृष्टं कुरुते। जीवनपथे विकीर्णानां प्रस्तराणामुपरि प्रचलितानि चरणानि व्रणयुक्तानि भूत्वा अग्रे गमनम् अवरोधयन्ति। जीवननौका च दुःखपूर्णैः झञ्झावातैः सघर्षं कुर्वाणा प्रकीर्णप्राया नष्टप्राया च प्रतीयते स्म।

पुनरपि जीवनं तु जीवितव्यमेव वर्तते। किं मृत्युरपि सहजतया प्राप्तुं शक्यते? दुःखातिशये तु जननीद्वारा प्रोक्ताः समस्तजीवनवृत्तान्ता मम चक्षुषोः पुरस्तात् चलचित्रमिव प्रचलितुमारब्धाः।

° ° °

तदानीम् मम आयुर्मन्ये द्विवर्षात्मकमेव बभूव यदा मम जनकः चिकित्सास्नातको भूत्वा उच्चाऽध्ययनार्थं विदेशे प्रस्थातुकाम आसीत्। गृहे परमप्रसन्नताया वातावरणं प्रवर्त्तते स्म। पितामहः पितामही पितृव्यादयः सर्वे एव इति विचार्य महता प्रमोदेन

परिपूर्णा आसन् यत् अस्माकं तनयः पारिवारिकजनो वा विदेशं गत्वा तत्र च सर्वोच्चां शिक्षामधिगम्य पुनः भारते समागत्य बहुवित्तम् अर्जयिष्यति प्रतिष्ठां च प्राप्स्यति। फलतश्च अस्मदीयं गृहमपि बहुधनधान्यपूर्णं समृद्धियुक्तं च भविष्यति। परन्तु तत्र एकमेव तथाविधम् आननमासीद् यत्र प्रसन्नतामिश्रिता उदासीनताऽपि स्पष्टतया परिलक्ष्यते स्म। सा च मदीया जननी आसीत् या खलु अस्मिन् गृहे केवलं त्रिवर्षपूर्वमेव विवाहिता भूत्वा समागता बभूव। अत एव इहस्थेषु सम्बन्धेषु प्रायः नीवनता एव आसीत्। इमं श्वशुरालयस्थं परिवारं तु मन्ये मम जननी तदानीं पूर्णतया अवगन्तुमपि न समर्था बभूव।

सौप्रस्थानिके समये मम जनकः अत्यन्तम् उत्साहेन स्नेहेन च समं चुम्बनसहितं मातरम् अब्रवीत्–"वैशालि! कथम् एवम् उद्विग्नताम् उदासीनतां च मनसि धारयसि? केवलं वर्षद्वयमेव तत्र व्यतीतं करणीयं वर्तते। तदनन्तरं तु आवां सदैव सार्धमेव वत्स्यावः समयं च यापयिष्यावः। एवमपि दूरभाषद्वारा पत्राचारादिमाध्यमेन च आवयोः सदैव सम्पर्कः सन्निकटता च सम्भविष्यत्येव। मम कुसुमसदृशाया एतस्याः कुमुदिन्याः उपरि विशिष्टं ध्यानं कर्तव्यम्। वर्षद्वयं तु एवमेव नयन-निमीलन-समकालमेव व्यत्येष्यति ....." इत्यादि।

परन्तु भवितव्यतां कः खलु निवारयितुं शक्नोति? जनकद्वारा प्रोक्तं तद् वर्षद्वयं कदापि न समाप्तम्। अद्य तौ द्वौ वर्षौ द्वाविंशतिवर्षेषु परिवर्तितौ परन्तु सर्वं पूर्ववदेव प्रवर्त्तते स्म। पूर्वं तु प्रारम्भिकेषु मासेषु पितृमहोदयो दूरभाषं करोति स्म पत्रादिकमपि च प्रहिणोति स्म परन्तु शनैः शनैः तद्द्वारा प्रोक्तानि सर्वाणि प्रतिज्ञावचनानि सान्त्वनावाक्यानि च मिथ्याश्वासानि संवृत्तानि। दूरभाषेषु पत्रप्रदानेषु च लम्बायमानाः समयान्तरालाः भवितुं प्रारब्धाः। सम्बन्धानामपि उष्णता शीतायमाना सञ्जाता। एवं शनैः शनैः द्वितीयवर्षान्ते तु मदीयो जनकः सर्वान् अस्मान् पारिवारिकजनान् मन्ये विस्मृतान् एव विधाय स्वकीय-सर्वविध-समाचारेभ्यो वञ्चितान् कृत्वा न जाने क्व अन्तर्हितः सञ्जातः।

पूर्वं तु पितामहः पितामही च तस्य प्रतीक्षायां चर्चायां च सदैव तत्परौ बभूवतुः, पुनः काञ्चिद् दुर्घटनामाशङ्क्य निरन्तरं चिन्तितो बभूवतुः, परन्तु शनैः शनैः स्तयोराशाबन्धो भग्नताम्प्राप्तः। तयोश्चक्षूंषि रोदं रोदं शुष्कतामधिगम्य पाषाण इव कठोरतां प्रापुः। विदेशात् प्रतिनिवृत्तस्य पुत्रदर्शनस्य लालसाऽपि मुहुर्मुहुः मृतप्राया सञ्जाता। स्वकीय-वृद्धावस्थाजन्यां शरीरजर्जरतां धारयन्तौ तौ पुत्रस्य प्रतीक्षायां मानसिक-रूपेणाऽपि अव्यवस्थितौ भूत्वा कस्यचिद् अज्ञातस्य सुखस्य सम्पन्नतायाः समृद्धेश्च लालसां मनसि निधाय तौ वृद्धौ अस्मात् मायाविनः संसारात् प्रयाणं चक्रतुः।

मम पितृव्यमहोदयोऽपि एकस्मिन् दूरस्थे नगरे भृतिम्प्राप्य तत्रैव च

विवाहं विधाय स्वजीवनशकटिकां चालयन् स्वपरिवारपोषणे नितरां निमग्नो बभूव।

अत्र ग्रामस्य गृहे तु केवलं त्रय एंव मनुष्याः सम्प्रति अवशिष्टाः। मम जननी अहं रामूकाका च। पञ्चपञ्चाशद् वर्षदेशीयो वर्त्तते रामूकाका। स एव अस्माकं ग्रामस्य कार्याणां क्षेत्राणां वृक्षाणां च संध्यानं सुरक्षणं च करोति। अहं तु स्वजनन्या समं ग्रामस्य केवलं पञ्चकिलोमीटरदूरस्थे नगरे अध्ययनादिसौकर्यवशात् निवसामि। आवयोः गमनाऽऽगमनं प्रायशः ग्रामस्य गृहे प्रवर्तते एव। रामू काका उभयत्राऽपि आवयोः दैनन्दिनवस्तूनां प्रबन्धम् उत्तरदायित्वपूर्वकं विधत्ते। पितृव्यमहोदयस्तु यदा कदाचिदेव वर्षे द्विवर्षे वा अत्र समागम्य अस्मान् सर्वान् मिलित्वा स्वकीयमपि समाचारं प्रयच्छति स्म। पितामहस्य पितामह्याश्चाऽपि निधनाऽनन्तरं तु प्रायः तेषामत्र गमनाऽऽगमनमपि अल्पाद् अल्पतरमेव प्रवर्त्तत।

अस्तु, प्रारम्भिकेषु वर्षेषु तु मम जननी मम जनकं बहुधा स्मारं स्मारं अश्रुभिः सममेव स्वकीयाः निशाः यापयति स्म। परन्तु मन्ये अश्रूणाम् उद्गमस्यापि काचित् सीमा भवति। समयानुसारं नयनानाम् आर्द्रतायामपि अल्पता समागता। तदनन्तरं च तान्येव अश्रूणि चिन्तारूपेण रोषरूपेण च प्रकटीभवितुम् प्रारब्धानि। जनन्याः हृदये जनकम्प्रति अज्ञाताः आशङ्काः समुदेतुं प्रारब्धाः। पुनरेकदा तत्रैव विदेशे निवासं कुर्वता केनचित् दूरस्थसम्बन्धिना इयम् अदभुता सूचना प्रदत्ता यत् अस्मदीयः पितृमहोदयस्तु तत्र विदेशे गमनाऽनन्तरम् एकवर्षस्य समयाऽभ्यन्तरे एव स्वकीयया कयाचित् एकया सहपाठिन्या सममेव विवाहं विधाय गार्हस्थ्ये मोदमानः सुखेन संवर्तते। तस्य एकः पुत्रोऽपि समुत्पन्नः।

तत्सर्वं निशम्य जनन्याः उपरि तु कश्चित् पर्वत एव भ्रष्टो भूत्वा निपतित इव सञ्जातः। मम जननी साम्प्रतमेतस्मिन् विशाले संसारे नितान्तम् एकाकिनी असहाया च समवर्त्तत। परन्तु श्रूयते यत् नारी यदा मातृत्वं प्राप्नोति तदा सा केवलं स्वतनयेभ्य एव जीवति। नारीणां हृदयेषु तथाविधा सहनशीलता आन्तरिकी संघर्षप्रवृत्तिः आत्मशक्तिश्च भवति यत् ताः घोराणि दुःखान्यपि सोढुं सहजतया समर्थाः जायन्ते।

समयः अत्यन्तं बलवान् भवति। अयं समय एव वर्तते यो यथावसरं मानवं जीवनस्य कलामपि शिक्षयति। जनन्या मत्कृते तु जीवितव्या एवाऽभवत्। सा स्वकीयाम् अंगुलिं ग्राहयित्वा मां लक्ष्यम्प्रति प्रापयितुं बद्धपरिकरा बभूव। सा मदर्थं नानाविधाः सुस्वप्नाः धारयति स्म। सा तानेव स्वप्नान् यथार्थीकर्तुमिच्छति स्म। विवाहसमये सा केवलं स्नातकपरीक्षोत्तीर्णा बभूव। परन्तु आत्मशक्तिमधिगम्य उत्कटसंघर्षप्रवृत्तिकारणात् सा स्नातकोत्तरपरीक्षां समुत्तीर्य प्रशिक्षित-स्नातकं (बी०एड्०) उपाधिमपि यथा कथञ्चिद् अधिगम्य सा ग्रामस्य समीपस्थे विद्यालये एव अध्यापिकायाः

भृतिमधिगंम्य स्वावलम्बिनी संजाता। एवम् अस्माकं जीवनचक्रं कथंचित् मन्दगत्या प्रचलितुं प्रारब्धम्।

लोके श्रूयते यत् दुःखानि प्रायशः सुखान्यपि अनुवर्त्तन्ते। अर्थात् जीवने सुखैः समम् अनेकानि दुःखानि दुःखैश्च समम् अनेकानि सुखान्यपि मनुष्यस्य पृष्ठतो धावन्ति।

सुखं तु वसन्तसमय इव शीघ्रं व्यतीतो भवति। यथा वसन्तकाले पत्रपतनवेलायां वृक्षस्य सर्वाणि पत्राणि शाखाभ्यो विरहिता भूत्वा धरायां निपतान्ति तथैव सुखस्य राशिरपि शनैः शनैः तथा क्षीणो भवति यत् तस्याऽनुभवः सद्यः न प्रतीयते।

कतिपयवर्षेभ्यः पश्चादेव शर्मण्य (जर्मनी) देशात् पितृमहोदयस्य एकः दूरभाषः समागतः-"अयि! वैशालि! साम्प्रतमहम् अत्यन्तम् अस्वस्थो भवामि। प्रतीयते यत् बहुकालं मम जीवनं न चलिष्यति। मया तव समक्षम् अपराद्धम् एव। केषां शब्दानां माध्यमेन अहं क्षमायाचनां कुर्याम्? स्वकीयां स्निग्धाम् आत्मजां त्वां च सबलं साकूतं च निरूपयितुं कामये। त्वत्समक्षं च स्वपापानां विश्वासघातस्य च प्रायश्चित्तं कर्त्तुमिच्छामि। अहं सर्वथा विश्वसिमि यत् मरणात् पूर्वं त्वं मत्कृते क्षमावचनम् उच्चारयिष्यसि। आगामिनो दिसम्बरमासस्य दशमे दिनाङ्के अहं भारतम् प्रत्यागच्छामि। त्वया मम प्रतीक्षा करणीया।"

जनकस्य अस्वस्थतावृत्तान्तमधिगम्य स्वपत्युः प्रेम्णि विह्वला दुःखिता च मम जननी दिसम्बरमासस्य दशमे दिनाङ्के वायुपत्तने गत्वा वायुयानस्य प्रतीक्षायां निरता बभूव। असौ अल्पः प्रतीक्षाकालोऽपि युगकाल इव बभूव। प्रतीक्षा-क्षणाः यथा क्षीणा एव न जायन्ते स्म।

अन्ततः शर्मण्यदेशात् आगमिष्यमाणस्य वायुयानस्य घोषणा वायुपत्तने वारंवारं प्रकटीभूता। मम जननी तत आगतान् सर्वान् यात्रिणः सबलं निरूपयितुं तिष्ठति। परन्तु पितृमहोदयो नैव समागतः। स तु मिथ्याश्वासन-दायकानां गुरुरिव संजातः। यथा द्विवर्षेष्वेव विदेशात् प्रतिनिवर्त्तनस्य समाश्वासनवचनं मिथ्या बभूव तथैव दिसम्बर-मासस्य दशमदिनाङ्के समागमनस्य समाश्वासनमपि सर्वथा मिथ्यैव सिद्धम्। तस्मिन् समये जनन्या स्वहृदये किं किं न सोढम् इति विचार्यैव मम मानसम् अव्यवस्थितं भवति रोमाञ्चश्च संजायते। सा अतिशयदुःखयुक्ता भूत्वा व्यथितहृदया शून्यनयना रिक्तमस्तिष्का सती मनसि समुत्थितं झञ्झावातं कथंचित् नियम्य अश्रुपूर्णाभ्यां नयनाभ्यां वायुपत्तनात् यथा कथंचित् गृहं प्रत्यागतवती।

अथ पञ्चदश-दिवसानन्तरमेव मम तथाकथितस्य असहोदरस्य भ्रातुः जोजफस्य पत्रं समागतम्-

अयि! अदृष्टपूर्वे मे मातः!
तव चरणेषु सादरं वन्दनानि।

पितृचरणास्तत्र भारते गन्तुं पूर्णतया समुद्यता आसन्। तेषां भारते प्रस्थानस्य तिथिः वायुयानयात्रापत्रादिकम् (टिकट) आरक्षितमासीत्। परन्तु प्रस्थानात् दिनद्वयपूर्वमेव तेषां स्वास्थ्यमकस्मात् संकटग्रस्तं सञ्जातम्। अहं तत्क्षणम् आतुरालयं प्रापितवान् परन्तु तेषां जीवनम् अस्तंगतमेव। साम्प्रतं ते अस्माकं मध्ये न वर्त्तन्ते इति एतद् दुःखदायकं समाचारम् अत्यन्तं शोकेन सूचयति-

भवत्या एव स्नेहाकांक्षी पुत्रकः
रॉबर्ट जोजफः

पितृमहोदयानां निधनवृत्तान्तं निशम्य मदीया जननी तु विक्षिप्तहृदयेव सञ्जाता। एष शोकदायकः सामाचारो जनन्याः धैर्यबन्धं ध्वस्तीकृत्य ताम् अगणितदुःखैः समं शोकसागरे निपात्य वैधव्यजन्यं शृङ्गारविहीनतामपि प्रदत्तवान्। पुनरपि सा अत्यन्तं धैर्येण कथं कथमपि आत्मानं संयम्य वस्तुस्थितिम् आकलय्य ममाऽपि च ध्यानमाधाय जीवनशकटिकाम् अग्रे चालयितुं प्रयासं प्रारब्धवती। तदानीम् अहम् आयुषो अष्टादशे वर्षे आसम्, अथ च इन्टरपरीक्षाम् उत्तीर्य स्नातकपरीक्षायाः प्रथमे वर्षे प्रविष्टा अभूवम्।

तदननतरं तु स्नातकपरीक्षाम् प्रथमश्रेण्यामुत्तीर्य अहम् आकाशवाण्याम् उद्घोषिकारूपेण अंशकालिकीं भृतिम्प्राप्तवती।

मम मातुर्मानसे माम् अभिलक्ष्य पुनर्नूतनाः आशाः आकाङ्क्षाश्च प्रादुर्भवितुम् प्रारब्धाः। सा सुखदस्वप्नानां तन्तुसन्तानवितानं रचयितुं प्रारब्धवती। यथा-"आत्मजायाः कुमुदिन्याः गार्हस्थ्यं सम्यक्तया वासयिष्यामि ..... एतस्याः पुत्रान् पालयिष्यामि ..... आगामिनो वंशस्य प्रभवं प्रसादयिष्यामि .....प्रभृति स्वकल्पितायां सांसारिक-सुखसंरचनायां निरता बभूव"। यदा कदाचिदपि च वार्त्तालापप्रसंगे पितृमहोदयस्य चर्चा प्रवर्त्तते स्म तदा सा कथयति स्म-"तव जनकस्तु अत्यन्तं भीरुः कातरश्च बभूव। यः स्वजीवनेन मम जीवनेन च समं छलमेव समाचरितवान्। यदि स विदेशस्थितायाः कस्याश्चित् कन्यायाः सहपाठिन्याः वा रूपसौन्दर्ये निमग्नो भूत्वा विवाहं कृतवान् एव तदा एतत् कथं मत्तः संगोप्य रहस्यात्मकं कृतवान्? अत्र तस्य कस्माद् भयं बभूव? किं विचार्य स निगूहितवान्? मत्तः प्रच्छन्नश्च भूत्वा सम्बन्धं विच्छिद्य सर्वान् अस्मान् परित्यक्तवान्? एकदा मां सर्वं वक्तव्यं तु आसीत् ....." इत्यादि।

अथ एकदाऽहं तथाविधायामेव चर्चायां निमग्ना भूत्वा स्वपितृमहोदयानां

सन्दर्भे न जाने किं विचारयामि स्म इति तत्समये एव–"कुमुदिनि! त्वं कुत्र विचारमग्ना वर्त्तसे?" इति कथयन्ती जननी मम विचारसरणिं तन्द्रां वा भग्नां कुर्वती यदा किमपि प्राह तदा अहमपि भूतकालस्य चिन्तनं विहाय वर्त्तमाने काले प्रविष्टवती। तदानीमेव अकस्मात् पत्रवितरकः (पोस्टमैन) समायातः। स एकं पत्रं जनन्या हस्ते प्रदत्तवान्। पत्रस्य आवरकेण स्पष्टं प्रतीयते यत् तत् विदेशात् प्रेषितं वर्त्तते। जननी तत्पत्रम् उपरिष्टादेव विलोक्य मां प्रयच्छन्ती प्रोवाच– "पत्रप्रेषकस्य स्थाने तु जोजफस्य नामधेयं वर्त्तते। डाकमुद्रिकाऽपि जर्मनदेशस्यैव प्रतिभाति। कुमुदिनि! बहुकालाऽनन्तरं तस्य पत्रं समागतम्। पश्य तेन किं लिखितम्? मम तु तस्य पत्रपठने साहसमेव न प्रवर्त्तते"–इति कथयन्ती जननी रॉबर्ट जोजफ–द्वारा प्रेषितं नीलावरणवेष्टितं तत्पत्रं मम हस्ते प्रदत्तवती।

अहं च अत्यन्तमुत्सुकहृदयतया पत्रस्य आवरकं शीघ्रमेव समुत्पाट्य पत्रं पठितुम् प्रारब्धवती। भ्रात्रा जोजफेन लिखितमासीत्–

आदरणीये मातः!

सादरं प्रणामाः।

पितृमहोदयानां देहावसानाऽनन्तरं मम जननी अपि उदर–कैंसर रोगेण पीडिता भूत्वा प्रायः एकवर्षाऽनन्तरमेव माम् एकाकिनम् अत्र संसारे परित्यज्य दिवंगता बभूव।

अम्ब! साम्प्रतमहम् अस्मिन् संसारे पूर्णतया असहायः एकाकी च भवामि। अधुना अहम् भवदीयपुत्रस्याऽधिकारभावनया संग्रस्तः सन् पत्रलेखनस्य साहसमाचरामि।

पितृमहोदयास्तु स्वजीवनकाले सदैव भवत्याः प्रशंसामेवाऽत्र कीर्त्तयन्ति स्म। ते प्रायशः कथयन्ति स्म यत् तव भारतदेशस्थिताया जनन्याः हृदयं भारतदेशवत् विशालम् उदारं च वर्त्तते। घोररुग्णतासमये ते स्वजीवनावसानम् आसन्नं परिकल्प्य मोनिकायाः (मम जर्मनजनन्याः) रोगस्याऽपि असाध्यतामाकलय्य एकदा साश्रुनयनाः अकथयन्–"मम निधनाऽनन्तरम् अथवा मोनिकायाः देहावसानाऽनन्तरमपि त्वया सा भारदेशीया माता न विस्मर्त्तव्या। सा स्वकीये विशाले हृदये तुभ्यम् अवश्यं स्थानं प्रदास्यति। यद्यपि सा मत्तः कुपिता रुष्टा च वर्त्तते यतो हि अहं तत्कृते विश्वासघातकः अपराधयुक्तश्च भवामि,परन्तु सा त्वत्कृते सदैव ममतामयी आह्लाददात्री च भविष्यति।"

पत्रे रॉबर्ट जोजफः पुनरग्रे लिखति–

मम प्रियमातः!

भवत्याः जीवने पितृमहोदयेन यः अन्यायः तिरस्कारश्च समाचरितः, अथवा भवत्यै या मानसिकी पीडा उपेक्षा च प्रदत्ता, तत्सर्वेषाम् अपराधबोधभावेन स सदैव

संग्रस्तो बभूव। स प्रायः कथयति स्म-"तया देव्या समं मया साधु न समाचरितम्.....छलमेव आचरितम् ...... एतस्य कर्मणः फलं तु मया भोक्तव्यम् एव भविष्यति। परन्तु जोजफ! सं त्वां निरपराधं विचार्य निश्चितमेव स्वीकरिष्यति .....आत्मसाद् विधास्यति .....मत्कृतस्य अपराधस्य दण्डं स तुभ्यं कदापि न प्रदास्यति इति मे सुदृढः विश्वासः। उच्यतेऽपि-"कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।"

अयि! जननि!

पितृमहोदयेन कृतस्य कर्मणो यत्किमपि प्रायश्चित्तं भवती मन्यते तत्सर्वमहं कर्त्तुं पारयिष्यामि। अहं संसारेऽस्मिन् नितान्तः एकान्तताम् असहायताम् उद्विग्नतां च अनुभवामि। स्वजीवने सदैव असन्तोषम् असुरक्षाभावम् अमाधुर्यम् अनुभवन् कदाचित् जीवनस्य निष्प्रयोज्यतां निष्ठुरतां रूक्षतां च विचारयामि। एवंविधेषु विषमकालेषु निशि निशि कदाचिदात्महत्या-प्रवृत्तिरपि मानसे प्रकटीभवति।

अत एव साम्प्रतमहं स्वकीयजेष्ठभगिन्याः स्नेहच्छायाम् अधिगम्य अद्वितीयायाः द्वितीयजनन्याश्च ममताच्छायायामाश्रयं विधाय स्वकीयम् आयुषः व्यत्येतुं कामये। एकां जननीं हापयित्वा साम्प्रतमहं द्वितीयां जननीं कदापि हातुं न कामये।"

मातः!

यदि भवती कथयिष्यति तदा अहं भवत्याः सेवको भूत्वा गृहे स्वकीयं सर्वमायुः समापयिष्यामि परन्तु भवती मां स्वस्नेहेन वञ्चितं मा कुरुताम्। अहं भवत्याः क्रोडस्य स्पर्शं समासाद्य एकं वारं भारतवर्षस्य पवित्रतमायां धरायां निवासं कुर्वाणायास्तस्याः जनन्या आशीर्वादमधिगन्तुम् इच्छामि यया स्वजीवनस्य स्वर्णिमः कालः स्वपत्युः प्रतीक्षायामेव हापितः। अहं तस्याः जनन्याः पवित्रेषु पादपद्मेषु प्रणामं निवेदयितुमिच्छामि या निष्ठायाः सहनशीलतायाः धीरतायाश्च जीवन्ती जाग्रती च प्रतिमा वर्त्तते। यया जीवने केवलं वितीर्णम् एव .....हापितम् एव .....प्रदत्तम् एव च परन्तु किमपि प्राप्तुं न कश्चिदपि कदाचिदपि च अभिलाषः प्रकटितः। अस्मदीयेषु पाश्चात्यदेशेषु तु तथाविधस्य नारीसमाजस्य कल्पनैव कठिना वर्त्तते।"

अयि मम भारतवासिनि! जननि!

अहं तु पितृमहोदयेन लिखितानां दैनन्दिन्याः पृष्ठानाम् अवलोकनेन भवद्विषये तथाविधान् वृत्तान्तान् ज्ञातवान् यत् भवदीयाम् उपस्थितिमहम् अन्तस्तले गहनतया अनुभवितुं शक्नोमि। अहं दिसम्बरमासस्य दशमे दिनाङ्के भारते समागच्छामि। इयमेव तिथिः पितृमहोदयेनाऽपि पञ्चवर्षपूर्वं भारते आगमनाय निर्धारिता आसीत्। अहं तस्याः तिथेः स्मरणीयतां रचयितुं पुनः कामये। अहं सर्वस्मै कालाय भारते

भवत्याः स्नेहयुक्तायाः शीतलच्छायायाः सान्निध्ये निवासं कर्त्तुं कामये। स्वज्येष्ठभगिन्याः प्रेम्णः स्नेहस्य च सान्निध्यमधिगम्य जीवनपथे सोत्साहः सोत्कण्ठश्च प्रचलितुमिच्छामि। मातः! मन्ये मां सस्नेहम् अन्तस्तलेन स्वीकरिष्यति भवती इति।

सर्वथा भावत्क एव
रॉबर्ट जोजफः

जोजफ–लिखितं तत्पत्रं पठन्त्याः मम कपोलेषु अनायासमेव अश्रुबिन्दवः सम्पतितुं प्रारब्धाः। अहं मातरम् अपि निरूपितवती। तस्याः नयनाभ्यां तु अविरलम् अश्रुधारा एव प्रवहमाना सन्दृश्यते स्म। अहं तु किञ्चित्क्षणपर्यन्तं पत्रे लिखितं पूर्वाऽपरं वस्तुजातं सर्वमनुभूय सम्यक् संध्याय सर्वं भूतं भविष्यं च पुनः पुनः परिकल्प्य किंकर्तव्यविमूढा इव संजाता। अथ किञ्चित्कालानन्तरं कथंचित् आत्मानं संयम्य मातरं शान्तां कुर्वती प्रावोचम्–

"अम्ब! मा रुदिहि। मन्ये अस्माकं गृहे पुनरेकवारं प्रसन्नताः समागच्छन्ति। अस्माभिः जोजफस्य स्वागतं स्मितिपूर्वकं करणीयम्। परश्वस्तने दिवसे एव तु दिसम्बरमासस्य दशमी तिथिः वर्तते। परश्वस्तने दिवसे प्रातः दशवादने जोजफः वायुयानात् समायाति। वायुपत्तने अस्माभिः तस्य स्वागतार्थं गन्तव्यम् एव।

त्वं सदैव कथयसि स्म यत् पितामहः पितामही च पौत्रस्य मुखदर्शनस्य कामनां मनसि धारयन्त एवं दिवं प्रयाताः। यदि ते साम्प्रतं जीविताः अभविष्यन् तदा निश्चितमेव अद्य महतीं प्रसन्नताम् अन्वभविष्यन् यत् तेषां पौत्रः विदेशात् प्रत्यागच्छति। मन्ये जोजफस्य जननी जर्मनदेशीया महिला आसीत् पुनरपि स पितृमहोदयस्यैव तु अंशो वर्त्तते।"

मम पूर्वोक्तं सर्वं कथनं मदीया जननी सावधानतया श्रृणोति स्म। मया जनन्याः मुखमण्डले चिन्तायाः रेखाः स्पष्टतया परिलक्षिताः। यद्यपि जोजफस्य पत्रमधीत्य अहम् अतिशयप्रसन्नताम् अनुभवामि स्म पुनरपि मम मानसेऽपि चिन्तायाश्छायाः कम्पन्ते स्म। न जाने इयं प्रतीक्षा कीदृशी भविता?

पूर्वमपि मम माता पञ्चवर्षपूर्वम् एकदा दिसम्बरमासस्य दशमे दिनाङ्के पितृमहोदयानाम् आगमनस्य प्रतीक्षायाम् उत्सुकतायां च प्रातः दशवादनात् सायंकालपर्यन्तं निराहारा सती वायुपत्तने एव प्रतीक्षारता बभूव। परन्तु किं स आगतः .....? अद्य पुनः जननी जोजफस्य प्रतीक्षां कुरुते .....न जाने स जोजफोऽपि आगमिष्यति वा न वा? .....जनन्याः प्रतीक्षायाः घटिकाः सामाप्स्यन्ते वा न वा?..... किम् इयं जननी सम्पूर्णायुःपर्यन्तम् प्रतीक्षाकरणार्थम् एव समुत्पन्ना? .....एवं खलु बहुविधाभिराशंकाभिर्मम मानसं सर्वथा व्याकुलीभूतं संजातम्। यदि

जोजफोऽपि न समागच्छेत् तदा? अस्तु, एवं प्रतीक्षारतास्वस्मासु स परश्वस्तनः दिवसोऽपि समागतः .....अर्थात् दिसम्बरमासस्य दशमो दिनाङ्कः।

अहम् अद्य आकाशवाण्याः कार्यालये एकदिवसात्मकस्य अवकाशस्य कृते प्रार्थनापत्रं प्रस्तुतवती। यतो हि अद्यतनीयं दिवसमहं स्वकीयभ्रात्रा सममेव यापयितुं कामये स्म। वस्तुतं मानवानां कामनाः अनन्ता एवं भवन्ति। अस्माकं कामनानां तारतम्यं कदाचिदपि समाप्तिं न गच्छति। प्रथमकामनाया अनन्तरं द्वितीयकामनाया जन्म स्वत एव प्रवर्त्तते। तस्याः पूर्त्तिश्च अस्मदीया महती कामना भवति।

अस्तु, वयं समयात् एकघण्टापूर्वमेव वायुपत्तनं प्राप्तवन्तः। निर्धारितसमये विमान-पट्टिकायां वायुयानस्य अवतरणं सञ्जातम्। अदृष्टपूर्वस्य भ्रातुः प्रतीक्षायां मम हृदयं तीव्रतरं स्पन्दितुम् प्रारब्धम्। अह मातरं दृष्टवती। तस्याः मुखमण्डलेऽपि चिन्तायाः प्रतीक्षायाः समुद्विग्नतायाश्च मनोभावाः स्पष्टतया परिलक्ष्यन्ते स्म। तदानीं मदीया जननी काचित् प्रस्तरप्रतिमावत् निश्चेष्टा दृश्यते स्म। अहं जनन्याः मनोगतान् भावान् पूर्णतया अवगच्छामि स्म। मन्ये तस्याः मानसे इयमेव कामना आसीद् यत् मम पितृमहोदयास्तु कदापि न समागतः परन्तु अधुना मम भ्राता जोजफस्तु समागच्छेत् एव। येन तस्याः प्रचण्ड-प्रतीक्षायाः क्वचित् सार्थक्यं भवेत्।

अधुना दूरत एव मया दृष्टं यत् एकः प्रायः विंशतिवर्षकल्पः नवयुवकः समागच्छति स्म यस्य प्रशस्ते वक्षःस्थले "जोजफ" इति नामधेया पट्टिका स्पष्टतया परिलक्ष्यते।

अहं बहुवारं स्वपित्रोः विवाहस्य चित्रसंग्रहं दृष्टवती। जोजफस्य मुखमण्डले स्पष्टतया पितृमहोदयस्य आभासः प्रतीयते स्म। अहं चीत्कारमिव कुर्वती मातरम् उक्तवती-"पश्य, मातः! पश्य, असौ समन्तादेव जोजफः समायाति .....पश्य ..... पश्य .....तत्र पश्य"।

जोजफं सन्निकटमागच्छन्तं विलोक्य अहं स्वकीयौ उभावपि हस्तौ समुत्थाप्य तारस्वरेण साक्रोशं प्रोक्तवती-"जोजफ! एहि .....इत आयाहि ....."।

जोजफं निकटे समागतं विलोक्य तस्य स्कन्धेषु स्वकीयं दक्षिणं हस्तम् आश्रित्य जननी केवलम् इदमेव वक्तुं समर्था बभूव-"ओह! जोजफ!....."।

जोजफोऽपि बाष्पकण्ठः सन् केवलं-"मातः" इति वचनम् उच्चार्य तूष्णीम्बभूव।

तदनन्तरम् उभावपि जननी-पुत्रौ सबलाऽऽश्लेषपूर्वकम् मिलित्वा प्ररोदितुम् प्रारब्धवन्तौ। अहमपि दूरत एव साश्रुनयना तयोरकल्पनीयं सम्मेलनभावबोधमधिगम्य केवलं मूकदर्शिका संजाता।

***

स्नेहसदनस्य स्वप्नः

(पत्रात्मकशैल्याम् उपनिबद्धेयं कथा)

मम प्रिय पुत्र भवेश!

तुभ्यं बहूनि आशीर्वचनानि।

मन्ये परमेश्वरस्य महत्या अनुकम्पया त्वं स्वकीये "स्नेह-सदने" प्रसन्नो भविष्यसि। अत्र तु अहमपि स्वकीये "वृद्धाश्रम-भवने" निवसन्ती प्रसन्नतामनुभवितुं प्राप्तुं च विगतेभ्यः त्रिवर्षेभ्यः निरन्तरं प्रयासं करोमि परन्तु साम्प्रतमपि असाफल्यमेव प्राप्नोमि।

जीवने वयं सर्वे प्रसन्नताम् अधिगन्तुं तत्पृष्ठत एव धावामः। स्वयं प्रसन्नतया समं भाव्यम् अन्ये चाऽपि प्रसन्नाः करणीया इति उभयमपि सदैव सुखदं भवति। परन्तु सर्वेभ्यः, सहैव सर्वदा प्रसन्नता प्रदानं दुष्करमपि भवति। यदि एकः प्रसन्नो भवति तदा अपरः दुःखी जायते। यदि च उभावपि आत्मीयौ भवतस्तदा तु परिस्थितिः कथंकारा विकटा भवतीति त्वत्तोऽधिकं कः शक्नोति अवगन्तुम्?

अथ च मां स्वकीय-"स्नेह-सदनात्" निष्कास्य एतस्मिन् "वृद्धाश्रम-भवने" प्रापणार्थं त्वया याः विकटाः परिस्थितयः सम्प्राप्ताः ताभिरहं पूर्णतया परिचिता भवामि। अत एव त्वाम्प्रति मम मनसि कश्चिदपि असन्तोषभावः सम्प्रति न वर्त्तते। एतत्सर्वं तु परिस्थितिवशादेव घटितमिति मन्ये। सत्यं त्विदमेव यत् महत्त्वाकाङ्क्षाभिः समाविष्टयोः द्वयोः नार्योः मध्ये सन्तुलनस्थापनार्थम् प्रयत्नः अत्यन्तं कठिनः प्रवर्त्तते।

एतत् तु पत्नी जनन्योर्मध्ये सम्पिष्टः सन् पुत्र एव सम्यक्तया विज्ञातुं शक्नोति। यदि त्वं माम् प्रसन्नां कर्त्तुम् अकामयिष्यथाः तर्हि स्वजीवनसंगिनीं प्रतिभां दुःखितां व्यधास्यः। यदि च पत्नीं प्रतिभां प्रसन्नाम् अकरिष्यस्तर्हि अहम् अप्रसन्ना अभविष्यम्। एवं त्वया कस्याश्चित् एकस्या एव प्रसन्नता वरणीया आसीत्। तदानीं कश्चिद् विकल्पोऽपि तव समीपे न बभूव।

यद्यप्यहम् अत्र "वृद्धाश्रम-भवने" समागत्य यावद् दुःखम् अनुभूतवती ततोऽप्यधिकं सुखं गर्वं च तदा अनुभूतवती यदा त्वं स्वजनकस्य पदचिन्हेषु न प्रचलितवान्। त्वया तेषाम् अनुसरणम् अकृत्वा स्वकीयपत्न्याः प्रतिभायाः प्रसन्नतानाम् अभिलाषाणां च महत्त्वमाध्याय इदमेव संकेतितं संज्ञापितं च यत् त्वं वास्तविकेषु अर्थेषु तां जीवनसंगिनीं मन्यसे। यद्यपि एतत्कार्यसिद्ध्यर्थं त्वया अहं "स्नेह-सदनम्" इति नामधेयात् स्वगृहात् निष्कासिता पृथक्कृता, दूरस्थे चाऽस्मिन् "वृद्धाश्रमे भवने" सम्प्रवेशिता। अस्तु, जीवने सर्वं सहजतया पूर्णतया आत्मनो मनोऽनुसारं च नैव प्रवर्त्तते।

प्रिय पुत्र! अधुनाऽहं मुख्यं वार्त्ताप्रसंगं प्रारभे। अहं जानामि यत् त्वम्-(भवेश कुमार पाण्डेयः) नगरस्य ख्यातनामा हृदयरोग-विशेषज्ञः .....एकोऽतिव्यस्तः पुरुषो भवसि। यस्य प्रतिक्षणस्य कालावधिः पूर्वत एव निर्धारितः वर्त्तते। परन्तु अहं त्वदीय-मातृत्वकारणात् साधिकाराः तव अतिव्यस्तस्य जीवनस्य कांश्चित् क्षणान् ग्रहीतुं शक्नोमि एव। अहमत्र इदमपि अनुभवामि यत् स्ववक्तव्यं संक्षेपेणैव समापयेयं येन तव महार्घः समयः वृथा न भवेत्।

अस्मिन् वृद्धाश्रमे मम परिचयः अत्रैव निवासं कुर्वाणेन एकेन तथाविधेन वृद्धेन समम् अभूत् यो भारतीयसेना-सेवायाः प्राप्तावकाशः इहैव निवसति। तस्य नामधेयं च ब्रिगेडियर इन्द्रकुमार इति वर्त्तते। असावपि मादृश एव समानपीडायुक्तो वर्त्तते। स्वकीये सज्जायुक्ते (फ्लैट) गृहे प्रतिवसति स्म परन्तु वृद्धावस्था-जन्यपारवश्यात् तत्र गृहे च भोजनादिकार्ये असहायत्वात् नितान्तमेकाकित्वात् (फ्लैट) गृहे च तत्र कस्य-चिदात्मीयस्याऽभावात् सुरक्षाकारणात् एकान्तता-जन्य-दुःखात् च सततं त्रस्तो भूत्वा एकाकित्वजन्यपरिस्थितिभिश्च विवशो भूत्वा इहैव 'वृद्धाश्रमे' स्वेच्छया आश्रयं गृहीतवान्।

ब्रिगेडियर इन्द्रकुमारस्य द्वौ पुत्रौ वर्त्तेते। द्वितीयपुत्रस्य जन्मनः समकालमेव तस्य पत्नी दिवंगता बभूव। जीवनपर्यन्तं स्वदेशरक्षायै संकल्पं कुर्वाणस्य ब्रिगे० इन्द्रकुमारस्य जीवनं गार्हस्थ्यकार्याऽभियानेऽपि युद्धाऽभियानमिव सफलतामवापत्। स खलु पुत्रयोः पितृत्वस्य मातृत्वस्य चाऽपि उभयात्मकमेव उत्तरदायित्वम् एकाकी एव निष्ठापूर्वकम् सम्पादितवान्। साम्प्रतं तस्य द्वावपि पुत्रौ अध्ययनादिकं समाप्य विवाहितौ भूत्वा विदेशेषु नियोजनवृत्तिमासाद्य तथाविधौ व्यस्तौ संजातौ यत् तयोः समीपे स्वकीयवृद्धपितुरेकाकित्वम् अपनेतुम् इह भारते समागमनस्य समय एव न वर्त्तते।

इन्द्रकुमारोऽपि पुत्रयोः समीपे विदेशे गमनं न कामयते। स प्रायशः कथयति स्म यद् यदा अहम् आजीवनम् अत्रैव भारतभूम्याः प्रतिरक्षाकार्ये युद्धं कुर्वाण एव सम्पूर्णं जीवनं व्यतीतं कृतवान् सर्वं कालं च मातृभूमेः कृते समर्पितवान् तदा जीवनस्य सान्ध्यवेलायाम् अन्तिमसमये विदेशे गत्वा प्रवासस्य किम् औचित्यम्? अत एव सः स्वकीयम् अन्तिमं श्वासं स्वदेशे एव ग्रहीतुमिच्छति। एवंविधानां विचाराणां दुराग्रहेण वशीभूतः एव सः स्वीयसुतानां समीपे विदेशगमनं नाऽभिलषति। शारीरिक-दुर्बलता-कारणात् एकान्तताजन्यकष्टकारणाच्च सोऽपि इहैव वृद्धाश्रमे समागत आसीत् परन्तु सोऽपि मद्विधः एव इह समागत्य सर्वथा खिन्न-हृदयः सन् असन्तुष्ट एव विराजते।

कदाचित् द्वौ "अपूर्णौ" अन्योन्यस्य पूरकौ भूत्वा "पूर्णतां" प्राप्नुतः। विगतेषु कतिपयदिवसेषु इयमेवाऽनुभूतिः ब्रिगे० इन्द्रकुमारस्य मानसे, अथ च ममाऽपि

मानसे सबलतया प्रवर्तमाना भवति। अत एव आवां स्वकीयजीवनसन्ध्याया अवशिष्टान् क्षणान् सहैव भूत्वा "गृहे" यापयितुमिच्छावः। तदर्थम् आवां ब्रिगे० इन्द्रकमारस्य मुम्बई-स्थितं (फ्लैटं) कक्षमेव "स्नेह-सदन" रूपेण परिवर्तितुमिच्छावः।

ब्रिगे० इन्द्रकुमारः स्वेच्छया एव अस्मिन् "वृद्धाश्रम-भवने" प्रविष्ट आसीत् अत एव तत्कृते इतः प्रस्थाने विशिष्टं काठिन्यं न भविष्यति। परम् अहन्तु त्वद्द्वारा प्रवेशिता, अत एव मम इतो निर्गमनात् पूर्वं काश्चित् औपचारिकताः सम्पादनीयाः भवष्यन्ति। अर्थात् त्वया अत्र समागत्य अनापत्ति-प्रमाणपत्रे (एन०ओ०सी०) स्वकीयं हस्ताक्षरं कर्तव्यं भविष्यति। तदैव अहम् इमं 'वृद्धाश्रम-भवनम्' परित्यज्य इतः प्रस्थातुं समर्था भविष्यामि।

इयमपि कीदृशी विडम्बना वर्त्तते यत् यं पुत्रम् अहम् अजीजनम् .....भाषाम् अशिक्षयम् .....अंगुलिम् आलम्ब्य चलनमशिक्षयम् .....विद्यालये त्रुटिसन्दर्भे स्खलने च वा तस्य शिक्षकाणां सम्मुखे समुपस्थिता अभवम् .....अभिभाविकाकारणात् तस्य दोषा अपि बहुधा बहुभिः श्रुताः .....मातृकारणाच्च बहुधा दोषाणाम् आच्छादने दण्डकार्येषु च तत्परिरक्षणे प्रयासं कृतवती .....अद्य सैव तस्य जननी स्वपुत्रान् एव अनापत्तिप्रमाणपत्रस्य याचनां कुरुते, स्वपुत्राणां समक्षं वा अनापत्ति-प्रमाणपत्रस्य याचनायाः आवश्यकतामनुभवति? मन्ये आवयोः उभयोरपि स्थानं परिवर्तितं संजातम्। अर्थात् अहं तव स्थाने, त्वं च मम स्थाने प्रतिष्ठितोऽसि अभिभावकरूपेण।

अहं जानामि यत् मम निर्णयमाध्याय त्वरितप्रतिक्रियास्वरूपे तव मस्तिष्के शतशः वक्ररेखाः समुत्पन्नाः भविष्यन्ति। तव मानसमरुभूमौ सहस्रशः प्रश्नाः जंगलघासा इव सहसा समुत्पन्ना भवेयुः, येषां गन्धमात्रेणैव तव मनोऽनुभूतयः प्रदूषिता इव भवेयुः .....मस्तिष्के च विचारतरंगस्समुदितः स्यात् यत्-"कथमिदं सर्वं मातुर्मनसि अकस्मादेव अनायासमेव स समुद्भूतम्? .....आयुषो विचारोऽपि न तया समादृतः? .....अस्मत्सर्वेषां प्रतिष्ठाविषयेऽपि न तया किमपि चिन्तितम् .....किम् एतत् सर्वम् अस्मिन् आयुषि शोभते तस्यै?"-इत्थमेवंविधाः अनेके विचाराः झञ्झावात-सदृशाः मन्ये तव मनसि समुत्थिता भवेयुः .....क्रोधाधिक्यात् मन्ये तव रुधिरनालिकासु रक्तसंचारोऽपि द्विगुणितः भवेत् ..... मन्ये त्वं क्रोधातिशये इदमपि विचारयेः यत् षष्टिपूर्त्तौ जननी बुद्धिभ्रष्टतां प्राप्तवती .....अहं तु त्वां बाल्यकालादेव अवगच्छामि .....कोपावेशे वृथामुखचालनं तव स्वभाव एव .....पुनरपि यत्किमपि वक्तुमिच्छसि तत् त्वं मुखादवश्यं निःसारय .....एतेन/तव मनसो भावावेशः शान्तिं गमिष्यति .....चित्तं च स्वस्थं प्रसन्नं च प्रवर्त्तिष्यते। अहमपि इदमेव वाञ्छामि यद् अहम् इतोऽप्यग्रे यत् लिखितुमिच्छामि तत्सर्वं त्वं शान्तेन चेतसा पठिष्यसि गहनतया च तत्सर्वमवगम्य सम्यक्तया मां विज्ञातुं प्रयासं विधास्यसि।

मम प्रिय पुत्र! भवेश! जीवने अहमपि कश्चित् सामान्यजन इव प्रसन्नताः हर्षान् वा अनुसृत्य धावन्ती बभूव। परन्तु इदमपि सत्यं यत् ताः प्रसन्नताः मत्तोऽप्यधिकवेगेन दूरत एव भवन्ति स्म। बाल्याकालादेवाऽहमेकं स्वप्नं पश्यामि स्म। तच्चेदम् आसीत्-"स्नेह-सदनम्" इत्यस्य निर्माणम्। एवंविधं "स्नेहसदनम्" यत्र निवासं कुर्वाणाः सर्वे जनाः परस्परं सुख-दुःखानि अनुभूय जीवन्ति प्रेमपूर्वकं च व्यवहरन्ति .....अन्योन्यस्य भावनानाम् आदरं कुर्वन्ति .....परस्परं प्रसन्नताः द्विगुणिताः विधातुं प्रयासनिरता भवन्ति। परन्तु वारं वारं भाग्यस्य तन्तवः तथाविधाः अस्ताः व्यस्ताः भूत्वा परस्परं दुःसंयुक्ता भवन्ति येन स्वप्ने संकल्पितः पटः वेतुं न शक्यते। अथ च पुनः तेषां तन्तूनां सुसंयोजने एव वर्षाः व्यतीता भवन्ति।

बाल्यकाले यदा मम जननी जीवनपथस्य अर्धे मार्गे एव मां परित्यज्य स्वर्गं प्रस्थिता तदा प्रथमं वारं मम स्वकल्पितस्य "स्नेह-सदनस्य" आधारशिलाः प्रकम्पिताः संजाताः। पुनः मम पितरः द्वितीयां मातरम् आनीतवन्तः, या खलु तेषां पत्नी तु बभूव परन्तु मम माता नाऽभवत्। एवं संसारेऽस्मिन् पुनरहम् एकाकिनी संवृत्ता ..... सर्वथा एकाकिनी एव। तथाविधाद् एकान्तभावादेव समुद्विग्ना अहम् अनायासमेव निरन्तरं स्वकीय-स्वप्नस्य राजकुमारं प्रतीक्षमाणा पञ्चविंशति-वर्ष-देशीया सम्पन्ना। तदानीमहम् प्रायः विचारयामि स्म यत् "सः" कल्पितः कश्चित् आगमिष्यति मम पाणिं च सस्नेहं संगृह्य जीवनपथे वर्धमानः अन्तिमश्वासपर्यन्तं मम सहयात्री भविष्यति। संभवतः तदर्थमेवाऽहं विवाहस्य कृते सोत्सुका प्रतीक्षामापि तदानीं करोमि स्म।

विवाहस्य पश्चादेव स्वकल्पितस्य "स्नेहसदनस्य" स्वप्नो यथार्थतां प्राप्स्यति इति मम विश्वासो बभूव। परन्तु तव जनकेन तु प्रथमायां निशायामेव मम मानसे एवम् अनुभवः साम्प्रापितो यदहं तदर्थं केवलम् "भार" इव भवामि। कस्याश्चिदपि कृते भाररूपात्मिका स्थितिः कष्टदायिनी एव भवति। एवं पूर्वं त्वहं द्वितीयमातुः कृते भारभूता अभवम् पुनः त्वत्पितुरपि कृते भारभूता संजाता। एवं मम "स्नेह-सदन" निर्माणस्य द्वितीयं स्वप्नदर्शनमपि केवलं दिवास्वप्न इव बभूव। परन्तु एतन्मध्य एव तव पितृमहोदयः प्रसन्नताप्रदं तव मातृत्वपदमेव अनुदानरूपेण मम क्रोडे प्रक्षिप्तवान्।

अयि पुत्र! श्रूयते यद् दिवंगतानां निन्दा न कर्त्तव्या। अथ च कमपि पुत्रं तु तस्य जनकस्य विषये कदाचिदपि अन्यथारूपेण नैव वक्तव्यम्। परन्तु यदा त्वं कश्चित् ज्ञानवान् समभवस्तदा त्वमपि एतत् तु शनैः-शनैः अवगतवान् एव यत् तव पिता केवलं मम पतिरेव बभूव .....। स मम जीवनस्य सहयात्री तु कदापि न प्राभवत्। यद्यपि तेषु दिवसेषु मया कस्यचिदपि आवश्यकता न समनुभूता, यतो हि त्वं मया सार्धमेव अभवः। तव पितुर्द्वारा प्रदत्तां रिक्ततामहं

सर्वदैव तव मन्दस्मितिभिः .....तव प्रसन्नताभिः .....तव परिहासैश्च जीवने पूर्णीकर्त्तुं प्रयतितवती। अर्धम् अपूर्णं वा पुनरपि तत् "स्नेह-सदनम्" यथा कथञ्चित् मां सन्तोषयति स्म। यतो हि तदानीं त्वमेव मम मानसिकः समाश्रयः आसीः..... आजीवनं त्वया सह निवासकल्पनैव मत्कृते प्रसन्नताप्रदा आसीत्।

परन्तु परिस्थितयः सदैव मनोनुकूलाः न भवन्ति। स्वसहपाठिन्या निर्मलया समं विवाहं विधाय त्वम् अकस्मात् सहसा यदा गृहं समागतस्तदा मम मनसि महती पीडा प्रादुरभवत्। एतद् विचार्य इयं पीडा नासीद् यत् तव पत्नी निर्मला मां त्वत्तो दूरं करिष्यति, अपितु पीडायाः कारणम् इदमासीद् यत् त्वं जीवनस्य तादृशे महत्त्वपूर्णे निर्णये मह्यं सहभागितां न प्रदत्तवान्। यदि विवाहात् पूर्वं त्वं मम एतद्विषये अप्रक्ष्यः तदा निश्चितमेव अहं प्रसन्नता-परिपूरिता भूत्वा विवाहस्य अनुमतिं प्रादास्यम्। अहं तु सर्वदैव त्वत्प्रसन्नतायामेव स्वकीयाम्प्रसन्नतां मार्गयामि स्म। पुनः निर्मलायाः तव पत्नीरूपेण अंगीकारे कथं मम असमर्थतायाः प्रश्नः प्रादुर्भवेत्?

अस्तु,तस्मिन्नेव दिवसे मया अनुभूतं यत् मम जीवने यादृशं महत्वपूर्णं स्थानं तव वर्त्तते, सम्भवतः तादृशं स्थानं तव जीवने मम नैव वर्त्तते। पुनरपि आत्मीयानां परीवादस्तु नैव क्रियते। परिवादश्चाऽपि कस्य समक्षे अकरिष्यम्? जीवनपर्यन्तं परकीयभावमापन्नस्तव जनकोऽपि तु सर्वकालाय माम् एकाकिनीं विहाय पञ्चवर्षपूर्वमेव परमेश्वरस्य सान्निध्यमवाप्तवान्। ममाऽपि समक्षम् अन्ततः परमेश्वर एव सहाय आसीत् .....अहमपि तत्समक्षमेव स्वीयप्रार्थनां प्रस्तुतवती .....तदानीमहं स्वकीय-"स्नेह-सदनम्" प्ररक्षितुं प्रकामं प्ररुदितवती। परन्तु मम प्रार्थना मन्ये निरर्था जाता। तदानीं तव पत्न्या निर्मलादेव्या "स्नेह-सदनस्य" एका नवा परिभाषा आविष्कृता वर्त्तते इति त्वहं न जानामि स्म। तस्याः परिभाषायाम् अहं न सम्मिलिता आसम्। संभवतः तव उपरि पूर्णरूपेण स्वकीयमधिकारं स्थापयितुमेव सा माम् अन्यतः करोति स्म। अहमपि च निरन्तरमेव तद्द्वारा कृतैः प्रयत्नैः आचरणैश्च "स्नेह-सदने" आत्मानम् अवाञ्छितमेव अनुभवामि स्म।

अहं, जानामि यत् त्वद् द्वारा उभाभ्याम् (मह्यं निर्मलायै च) सहैव प्रसन्नताप्रदानं दिनाऽनुदिनं कठिनतरमेव प्रवर्त्तते स्म। मया दृष्टं यत् जीवने तव मुखात् मन्दस्मितिः परिहासभावश्च शनैः-शनैः लुप्ततां याति, तत्स्थाने च वृथागाम्भीर्यम् असहजताः कुण्ठाश्च प्रादुर्भवितुमारब्धाः। तत्सर्वमनुभूय अहमपि अत्यन्तम् असहजा असामान्या च भवामि स्म। मम एकान्तभावः शनैः-शनैः वृद्धि गतः मम मानसं च नितराम् एकाकित्व-बोध-ग्रस्तमभूत्। "एकाकित्वम्" अपि हृदयस्य एकस्तथाविधो महारोगो भवति यस्य चिकित्साविज्ञाने उपचारो न वर्त्तते। यदि हृदयस्य शल्यक्रिया द्वारा

अयं रोगः समाप्तोऽभविष्यत् तर्हि अहं स्वकीय-हृदयरोग-चिकित्सकेन पुत्रेण तस्योपचारमपि अकारयिष्यम्। परन्तु हृदयरोगस्य विशेषज्ञो भवन्नपि त्वं मदीयहृदयरोगस्य समक्षं विवशः आसीः। अत एव तव समीपे मम "वृद्धाश्रमभवने" अत्र प्रवेशातिरिक्तः कश्चिदपि उपचारो नाऽभवत्।

त्वया इदं विचारितमासीद् यदत्र समानवयस्कैः सहवासिभिः समं निवासेन मम एकान्तता समाप्तिं गमिष्यति। परन्तु हे! भवेश! सत्यमहं कथयामि यदत्र समागत्य मम एकान्ततायाम् अतितरां वृद्धिरेव प्रादुरभवत्। अत्राऽहम् अनुभवामि यत् कस्यचित् 'माता' अथवा कस्यचित् 'पिता' स्वसुतैः 'स्नेह-सदनात्' तथैव दूरीकृताः वर्त्तन्ते यथा काचित् मक्षिका दुग्धपात्रात् निष्कास्य प्रक्षिप्यते। अत्र समानपीडायुक्तान् दुःखितान् निरीक्ष्य मानसं खिन्नं भवत् वितृष्णाभावेन परिपूर्णं जायते। प्रत्यहं मानसे एष एव विचारः समुदेति यत् किं मातापितरौ स्वकीयहृदयस्य शकलसदृशान् सुतान् इत्येव विचार्य पालयतः यत् वृद्धावस्थायां तयोः पुत्राः स्वकीयां व्यस्ततां विवशताम् अनर्हतां वा प्रतिपाद्य स्वकीयैः समं तौ रक्षितुम् असमर्थाः भवेयुः?

तनयाः किं विचारयन्ति? किं पित्रोः 'वृद्धावस्थायां' केवलं तयोः कृते रोटिकाद्वयस्य, शिरसि उपरि आच्छादनस्य, एकस्य विष्टरस्य चैव आवश्यकता प्रवर्तते? किं वृद्धेभ्यः तथाविधाः आत्मीयतायुक्ताः क्षणाः वृद्धाश्रमेषु प्राप्तुं शक्यन्ते यथा स्वकीयगृहेषु आत्मीय-सन्ततिषु मध्ये प्राप्यन्ते? किं तथाविधेषु सुखदक्षणेषु वृद्धानाम् अधिकारो न भवेत् कथमपि? स्वकर्तव्यपूरणाऽनन्तरं किं परिवारेषु वृद्धानाम् उपस्थितिः निरर्थका अवाञ्छिता च प्रवर्त्तते?

सर्वविधानां भौतिक-सुखसुविधानां प्रापणाऽनन्तरमपि इह वृद्धाश्रमेषु वृद्धानां नयनेषु एका गहना निराशा रिक्तता च विराजते। यदि चाऽत्र प्रतीक्षा अपि कस्यचित् वर्त्तते तदा केवलं मृत्योरेव। यतो हि मृत्युरेव तेभ्यः एवंविधेभ्यो वृद्धाश्रमेभ्यो मुक्तिं प्रदास्यति। विगत-त्रिवर्षेषु अहमपि अत्र इदमेव सत्यं जीवने आत्मसात् कृतवती तथा च अत्रस्थां सर्वामनुभूतिं गहनतया अनुभूतवती। सर्वस्य वस्तुनः सद्भावेऽपि अत्र सर्वदा निरीहतायाः परवशतायाः कुण्ठायाश्च भावः मानसं समाच्छादयति। अत्र प्रायः समागमिष्यमाणानां समाजसेवकानां नयनेषु यदा आत्मानं प्रति दयायाः सहानुभूतेर्वा भावं पश्यामि तदा न जाने कतिवारं मम स्वाभिमानः क्षतिग्रस्त इव जायते।

इह वृद्धाश्रमे समागत्य यदा कश्चित् दयाभावना-वशीभूतः, कदाचित् परमार्थभावनाऽभिभूतः, कदाचित् पुण्यप्राप्तिभावना-वशीभूतः, कदाचिच्च कश्चित् सहायता-भावनावशीभूतः सन् सर्वसम्पन्नगृहस्थानां मादृशानां वृद्धानां साहाय्यं कर्त्तुमभिलषति तदा आत्मानं दयापात्रम् अनुभूय अस्मादृशानां मानसे को भावः समुदेति इति तस्य कल्पना तु कश्चिद् भुक्तभोगी एव कर्त्तुं शक्नोति। विगत-

सप्ताहे यदा अस्य नगरस्य कश्चिद् उद्योगपतिः वृद्धाश्रमे विद्यमानानां समस्तानां कृते वितरणार्थं कम्बलानि स्वेदवस्त्राणि (स्वेटर) च आनीतवान् तदा बहुप्रयासेनाऽपि अहं स्वकीयम् अश्रुपातं निवारयितुं समर्था न संजाता। अनायासमेव तानि सर्वाणि स्वेदवस्त्राणि मम स्मृतिपथे समायातानि यानि मया त्वत्कृते बाल्यकालादारभ्य वयस्कता-प्राप्तिपर्यन्तं स्वहस्तैरेव संयोजितानि। तदानीमहं स्वकक्षे समागत्य अश्रुसम्पातमध्ये ताः सर्वाः स्मृतीः स्वमस्तिष्कात् समापयितुं घोरं प्रयासं कृतवती।

इमाः सर्वाः सत्याः अनुभूतयो वर्त्तन्ते याः साक्षात् भुक्त्वा एव अनुभवितुं शक्यन्ते। अहं भगवन्तं प्रकामं प्रार्थये यत् तव जीवने एतादृशः समयः कदाचित् न समागच्छेत्, परन्तु सर्वमेतत् लिखित्वा त्वाम् अहं केवलम् इदम् अनुभावयितुमिच्छामि यत् मत्कृतः निर्णयः कथमपि तव मानसे निराधारो न प्रतीयेत।

ब्रिगे० इन्द्रकुमारस्याऽपि कदाचित् स्वजीवने पर्याप्तः प्रभावः प्रतिष्ठा स्वाभिमानभावश्च बभूव। स तु इह समागत्य केवलं कतिपयमासाऽभ्यन्तरे एव अत्रत्यं वातावरणं समीक्ष्य व्याकुलीभावग्रस्तः सञ्जातः। सत्यं चाऽत्र इदमेव यत् येषां सम्पूर्णं जीवनमेव स्वाभिमानपरिपूर्णम् आत्मसम्मानसंयुक्तं च भवति ते जना इह वृद्धाश्रमेषु समागत्य परैःकृतं दयाभावम् आत्मसम्मानस्य हानिं तिरस्कारभावनां च निरीक्ष्य अत्यन्तमसहनीयं कष्टमनुभवन्ति। ब्रिगे० इन्द्रकुमारः प्रायः कथयति यत्-अस्मिन् वृद्धाश्रमभवने कश्चिदपि स्वाभिमान-सम्पन्नः पुरुषो जीवनन्नेव म्रियमाणः प्रतीयते .....मानवेन जीवनस्य प्रत्येकं क्षणं जीवन्ततायुक्तेन उत्साहेन स्वाभिमानेन च समं जीवितव्यम् ..... यद् व्यतीतं तद् व्यतीतं .....वारं वारं तत्सर्वं व्यतीतमेव परिकीर्त्य अनुतापेन को लाभः? .....परन्तु यद् अवशिष्टं वर्त्तते तत् सर्वं विलोक्य याथातथ्येन च विज्ञाय कथं वयं विहातुं कामयामहे?.....इति।

ब्रिगे० इन्द्रकुमारस्य तथाविधेन जीवनदर्शनेन अहमपि पूर्णतया सहमता भवामि। तस्मादेव यदा स मत्समक्षं "वृद्धाश्रम-भवनम्" इदं परित्यज्य स्वीये मुम्बईस्थिते (फ्लैट) भवने निवासाय प्रस्तावं कृतवान् तदा मया सहर्षं स्वीकृति-स्वरस्य उच्चारणे विशष-विचारस्य आवश्यकता नैव अनुभूता।

स्वीयं परिकल्पितुं "स्नेह-सदनम्" निर्मातुं साम्प्रतमपि मम मानसे कश्चिदभिलाषः संभवतः संजीवति एव। तदभिलाषस्य पूरणे नैव मम पिता साहय्यं कृतवान्, नैव च मम पतिरेव तत्र किमपि विचारयामास। अथ त्वादृशः पुत्रस्तु मदर्थं स्नेह-सदनस्य का कथा स तु निवासार्थं किमपि साधारणं गृहमपि न प्रदत्तवान्, अन्यथा कथमहम् अत्र नरके समागमिष्यम्? वस्तुतः अत्र नरकमेव वर्त्तते। यतो हि अत्र सर्वे जनाः समागत्य केवलं मृत्योरेव कल्पनां कुर्वन्ति, इतो मुक्तये च मरणमेव कामयन्ते। तदेवमेतत् "वृद्धाश्रम-भवनम्" नरकात् कथमपि पार्थक्यं न भजति। अहम्

इतो नरकात् निःसृत्य ब्रिगेडियर इन्द्रकुमारेण समं तदीये (फ्लैट) गृहे निवसितुमिच्छामि। जीवनपर्यन्तं मया कियन्तः अश्रुबिन्दवः पातिताः? तत्सर्वमपि विस्मृत्य चरमश्वासपर्यन्तं सानन्दं समुच्छ्वसितुम् इच्छामि..... सदैव स्मितियुक्तं भवितुमिच्छामि .....प्रत्यहं विहसितुमिच्छामि .....जीवनं जीवन्ततया जीवितुमिच्छामि.....।

साम्प्रतं ब्रिगे० इन्द्रकुमारस्य कारणादेव मम मनसि एष विश्वासः समुत्पन्नो यत् मम जीवनं तादृशं निरर्थकं निःसारं च न वर्त्तते यथा विगतेषु वर्षेषु मया स्वजीवने समनुभूतं व्यत्यापितं च। बाल्यकाले त्वहं विमातृकृते "भार" इवाऽभवम्, यं भारं मम पिता त्वदीयपितुः शिरसि निधाय भारमुक्तः संजातः। पुनः स एव "भारः" यदा त्वदीये स्कन्धे समागतः तदा त्वं तं भारं वृद्धाश्रमे निक्षिप्य भारमुक्तः सञ्जातः। परन्तु साम्प्रतमहं "भारो" भूत्वा जीवितुं न वाञ्छामि। अहं तत्कृते जीवितुमिच्छामि यत्कृते वस्तुतो मदीया आवश्यकता वर्त्तते। कस्यचित् श्लोकस्य इमाः पंक्तयः साम्प्रतं मम स्मृतिपथे समागच्छन्ति–

"यदि निराश्रयस्त्वं स्याः आश्रयो भव कस्यचित्।
ततस्तु स्वयमेव त्वम् आश्रयं समवाप्स्यसि।।"

ब्रिगेडियर इन्द्रकुमारस्य कृते मम साहाय्यस्य साम्प्रतम् आवश्यकता प्रतिभाति। मह्यमपि च तस्य साहाय्यस्य आवश्यकता वर्त्तते। सम्भवतः आवाम् उभावपि परस्परम् अन्योन्यस्य आवश्यकताम् अनुभवावः।

अस्य आयुषः शून्यत्वम् एकाकित्वं रिक्तत्वम् औदासीन्यं च मन्ये त्वया कथमपि नैवाऽनुभवितुं शक्यते। पुनरपि अहम् इच्छामि यत् त्वं मम विचारान् गहनतया शान्तचित्तेन संज्ञातुं प्रयतस्व। "जनाः खलु किं कथयिष्यन्ति? .....लोकः किं विचारयिष्यति?" इत्येवंविधान् प्रश्नान् अपास्य यदि त्वं समग्रतया विचारयिष्यसि तदा त्वं मया समं न्यायं कर्त्तुं प्रभविष्यसि।

मन्ये मम हृदयरोगविशेषज्ञः सुतः स्वकीयमातुः हृदयपीडामनुभूय तदीयोपचारे प्रयत्नं कुर्वाणः साहाय्यं विधास्यति इति सौख्याभिलाषायामेव पत्रमिदं प्रेषयामि।

यदि च मम निर्णये त्वं सहमतः स्याः तदा यथाशीघ्रम् इह समागत्य 'अनापत्तिप्रमाणपत्रे" (एन०ओ०सी०) हस्ताक्षरं विधाय एतस्मात् "वृद्धाश्रम-भवनात्" निष्कास्य "स्नेह–सदने" प्रापणार्थं मम सहायतां कुरु इति।

तव परिवारस्य सर्वदा सर्वथा च शुभं कामयमाना,

त्वदीया एव माता
वसुन्धरा

***

अपराजिता

अद्य पुनः मातुः पत्रं समागतम्। पत्रे विगतवृत्तान्तानामेव चर्चा बभूव, यथा-"यूयं सर्वे निश्चिन्ता वर्त्तध्वे .....कमलायै किमपि कर्त्तव्यम् एव.....अहं तु तस्याः दुःखान्यपि द्रष्टुं न पारयामि" .....इत्यादि।

पत्रं पठित्वा अहमपि पर्याप्तम् अन्यमनस्का भग्नहृदया च भवामि स्म। समस्तं दिनमेव अस्तव्यस्तमिव प्रतीयते स्म। नाहमेतत् कल्पयितुं पारयामि स्म यत् किं करवाणि? कं कथयामि? वस्तुतः मम ज्येष्ठभगिन्याः कमलायाः समस्या तथाविधा विकटा बभूव यत् तस्याः समाधानमपि सुकरं नासीत्। नाऽहमेतत् कथयामि यत् एषा समस्या तथाविधा विकराला वर्त्तते यत् तस्याः समाधानमेव न वर्त्तेत। पुनरपि अत्र तु सर्वे जनाः संसारे प्रायः प्रत्येकस्य कृते समस्यारूपेणैव वर्तन्ते। एकदा तु मे मनसि एतत् समागतं यत् अहं स्वमातरं कथयेयं यत्-"अम्ब! कृपया कमलायाः पुनर्विवाहस्य विचारं हृदयाद् दूरं कुरुष्व," परन्तु अग्रिमे एव क्षणे लोकव्यावहारिकतायाः विचारोऽपि मनसि समुत्थितः। अत एव किमपि ध्यात्वा चिन्तयित्वा च आत्मानमहं निरुद्धवती। एवं कथनेन च अम्बायाः मानसं कथंचित् रुचिकरं नाऽनुभवेत्। सा कथयिष्यति-"स्वीयं गृहं परिवारश्च व्यवस्थितः सञ्जातः परन्तु ज्येष्ठभगिन्याश्चिन्तामकृत्वा त्वम् एवं कथयिष्यसि एव।"

अधुना ताम् अहं कथं ज्ञापयेयं यत् एतस्मिन् विचित्रे कलिकाले कन्यायाः विवाहसमस्या कियती कठिना वर्त्तते। पुनः भगिनी कमलादेवी च काचित् कुमारिका अपि न वर्त्तते। सा एकस्या चतुर्वर्षीयायाः कन्यकाया जननी अपि वर्तते। तां सम्प्रति सहजतया कः स्वीकरिष्यति? एवम् एतस्यां सर्वस्यां विचारप्रक्रियायाम् आसक्तं मम मानसम् अनायासमेव व्यतीतस्य कालखण्डस्य पृष्ठान् परिवर्तयितुम् आरब्धवत्-

° ° °

भगिन्याः कमलायाः विवाहः श्रीधरेण समम् अत्यन्तम् उत्साहेन आडम्बरेण च समं सुसम्पन्नम्। संयोगात् श्रीधरस्य परिवारः साधनसम्पन्नः सुव्यस्थितश्च आसीत् अत एव मम जननी किमपि विलम्बम् अकृत्वा शीघ्रमेव तद्विवाहकार्यं समपादयत्। संभवतः जनन्याः कृते वयं सर्वे अर्थात् अहम्, मम ज्येष्ठा भगिनी कमला, भ्राता कमलेश्वरश्च भार इव बभूवुः। तस्य कारणं चेदम् आसीद् यत् बाल्यकाले एव अस्माकं पितृचरणा दिवंगता आसन्। यथा कथंचित् वयं सर्वे स्नातक-परीक्षा-पर्यन्तमेव शिक्षां प्राप्तवन्तः। ज्येष्ठा भगिनी कमला तु केवलं माध्यमिकपरीक्षोत्तीर्णा एव बभूव। संभवतः असुरक्षाभावसंग्रस्ता एव अस्माकं

जननी अस्मान् सर्वान् यथाशीघ्रं पारिवारिक-रूपेण सुव्यवस्थितान् कृत्वा स्वजीवनकाले एव चिन्ताभारमुक्ता भवितुं कामयते स्म। परन्तु सहोदरायाः कमलायास्तु भाग्ये मन्ये किमप्यन्यदेव लिखितमासीत्। विवाहाऽनन्तरं केचन मासास्तु तस्याः सौख्यपूर्वकं व्यतीताः। श्वशुरालयस्था जना अपि सर्वथा हितचिन्तकाः प्रियाश्च बभूवुः। परन्तु एकवर्षाऽनन्तरमेव यदा सा कन्यायाः मातृत्वपदं प्राप्तवती तत एव तस्या भाग्येन वैपरीत्यं प्रदर्शितुम् आरब्धम्। श्वशुरालयस्थाः सर्वे जनाः पुत्रस्य प्राप्तेरभिलाषां धारयन्ति स्म परन्तु कन्याजननमाकर्ण्य सर्वे सहसा खिन्नतामावहन्ति स्म। भगिनी कमलायाः पतिः श्रीधरोऽपि दुःखितः खिन्नश्च भूत्वा कमलादेव्या समं यथोचितं न व्यवहरति स्म सदैव कोपाविष्ट एव प्रवर्तते स्म। परिवारस्था अन्ये जना अपि सदैव ताम् उपेक्षाभावेन तिरस्कारपूर्वकं प्रवर्त्तन्ते स्म। कमलादेव्याः कृते सर्वमेतत् कष्टप्रदं बभूव। अन्ततः शनैः शनैः यथा कथञ्चित् तस्याः पति श्रीधरः कन्याजननदुःखं विस्मृत्य पितृभावेन सन्तुष्टो भूत्वा सहजः समवर्त्तत।

परन्तु घोरः कष्टकालस्तु भगिनीकमलाया जीवने तदा समागतः यदा श्रीधरः सहसैव एकस्यां मार्गदुर्घटनायां दिवंगतः समभवत्। कमलायाः उपरि तु दुःखानां पर्वत एव आपतितः। सा भृशं चीत्कारं कुर्वती रोदितवती। श्वशुरालयस्था जनास्तु तस्मिन् विषमकालेऽपि तां प्रति सहजाः नाऽभवन्। सान्त्वनाप्रदानाऽपेक्षया तां कुलक्षिणीम् एव उद्घोषयन्तः सततम् अस्निग्धव्यवहारा रूक्षाश्च भवन्तः प्रताडयितुम् आरब्धवन्तः। अन्ततः सा श्वशुरालये पत्युरभावे तत्र कस्याऽवलम्बनं विधाय तिष्ठेत्? फलतः सा एकदा अपमानिता भूत्वा श्वशुरालयात् निःसृत्य निःसारिता वा भूत्वा मातृगेहमेव समागतवती। अत्र समागत्य च जनन्याः स्कन्धमाश्रित्य सहाहाकरं प्रकामं रुदितवती। तदानीं तस्या अंके तस्याः पञ्चमासदेशीया कन्यकाऽपि बभूव या सर्वैः दुःखैरभिज्ञा निश्चिन्ता गहननिद्रायामेव निमग्ना दृश्यते स्म।

यदा रोदनादिकं समाप्तं तदा जननी कमलां भगिनीं धनादिविषये पृष्टवती। तत्र श्वशुरालयस्थे गृहे तस्याः कश्चिदधिकारस्तु दूर एव श्वशुरालयस्थास्तु जनाः श्रीधरस्य बीमाधनादिकमपि सर्वं छलात् एव गृहीतवन्तः। ते तथा निष्ठुराः स्वार्थिनश्च बभूवुः यत् पञ्चमासदेशीयायाः कन्यायाः भविष्यत्कालस्य चिन्तनमपि न कृतवन्तः। तत्सर्वं विचार्य मम मानसं तु काषायितमेव आसीत्।

अस्तु, कालगतिस्तु शनैः शनैः सम्प्रावर्त्तत एव। ममाऽपि विवाहः सम्पन्नः। अहमपि श्वशुरालयमागतवती। भगिनी कमलादेवी स्वकन्यकाया नामधेयं "विपाशा" इति कृतवती। सा सम्प्रति पञ्चवर्षदशीया बभूव। कमलाऽपि स्वदौर्भाग्य-चिन्तन-चक्राद् बहिरागतवती। जनन्या अपि हृदये तां प्रति चिन्तनसरिता प्रवहितुम् आरब्धा। तस्याः भविष्यत्कालं विचार्य सा प्रायः कथयति स्म-"कमलायाः साम्प्रतमायुः

कियत् वर्त्तते? केवलं सा सप्तविंशतिवर्षदेशीया एव तु वर्त्तते। तदा किं सा स्वसमस्तम् आयुरेवमेव वैधव्येन यापयिष्यति?"

वस्तुतः मम जननी भगिनीं कमलां कथमपि एवंविधां वैधव्ययुक्तां द्रष्टुं न कामयते स्म। सा प्रायः अधीरतायुक्ता भूत्वा कथयति स्म-"भ्रातृणां भ्रातृजायानां भ्रातृव्याणां च का कथा? यावत्पर्यन्तमहं जीवामि तावत् पर्यन्तमेव ते सर्वे कमलाम्प्रति सावहिताः भविष्यन्ति। अन्यथा साम्प्रतिकाः वध्वस्तु श्वशुर-श्वश्र्वादीनां मरणाऽनन्तरं ननान्दॄणां कृते सेविकाभावमेव धारयन्ति।"

अहं यदा कदापि मातृगेहं गच्छामि स्म जननी एतेन तथाविधेन पूर्वोक्तेन कटुसत्येन माम् अवगतमेव प्रायः करोति स्म। यदाऽहं कथयामि यत्-"विपाशायाः किम् भविष्यति?" तदा सा मम प्रश्नमाकर्ण्य प्रायः शून्यनयना भवन्ती मौनम् आकलयति स्म। शून्ये च सा न जाने किं विचारयति स्म। भगिनीं कमलां यदा सा विलोकयति स्म तदा तस्याः मानसं कारुण्येन विगलितमिव प्रवर्त्तते स्म। मन्ये मम जननी कदाचित् समीचीनमेव विचारयति स्म। अहमपि तया समं तथैव विचारयामि स्म परन्तु भगिन्याः कमलायाः वात्सल्यपूर्णं मानसं कदापि तां स्वसुतायाः विपाशायाः पृथग् भवितुं नैव अनुमतिं प्रयच्छति स्म। सा पतिवियोगं तु सोढवती परम् अधुना किं तया सुतावियोगोऽपि सहनीयः? सर्वं विचार्य ज्येष्ठभगिनी कमला प्रायशः गहने विषादे निमग्ना जायते स्म। तस्याश्चक्षूंषि सजलानि प्रवर्त्तन्ते स्म।

"अहं पालयिष्यामि विपाशाम् .....अहम् अधुना दशवर्षाणि तु जीविष्यामि एव"-न जाने केन विश्वासेन वशीभूता जननी प्राब्रवीत्।

अहं जननीम् अनिमेषलोचना निरीक्षितवती। "किं तस्याः जीर्णेषु अस्थिषु तथाविधं बलं विद्यते?" अहम् आत्मानं पृष्टवती। परन्तु मम जननी यदा ममतया वशीभूता ज्येष्ठभगिन्याः पुनर्विवाहस्य संकल्पं घोषितवती तद्विचार्य तां प्रति मम मानसं श्रद्धया परिपूर्णमभवत्। अहं कथितवती-"कृपया कमलाभगिनीमपि पृच्छतु"। सा प्रोक्तवती ताम् अहं किं पृच्छेयम्?" पुनः जननी भगिन्याः कमलायाः समीपे एव उपविष्टवती। कमला तु तदानीं माम् आर्द्रनयनाभ्यां विलोकितवती परन्तु न किमपि प्रत्युक्तवती।

एकस्याः अकथनीयायाः पीडायाः भावस्तस्याः क्लिन्नेषु नयनेषु सन्तरति स्म। सा एकदा प्राब्रवीत्-"मया समम् पुनः को विवाहं करिष्यति? ..... केवलम् एतद् विचार्य यदहं साम्प्रतमपि यौवनसम्पन्ना वर्त्ते? .....कदाचित् मम कुत्रचित् स्खलनं न भवेत् .....अतः केनचित् सुरक्षापुरुषेण भाव्यम् .....परन्तु को जानाति

यत् सोऽपि असमये कालकवलितः न स्यात्..?"–एतेषां सर्वेषां प्रश्नानां समुचितम् उत्तरं तु जनन्याः समीपे नाऽभवत्।

o o o

अस्तु, भगिन्याः कमलायाः पुनर्विवाहः कथंचित् सुनिश्चितः। युवकः श्री कृष्णो विधुर एवाऽऽसीत्। वर्षद्वयपूर्वमेव तस्य पत्न्याः क्वचित् दुर्घटनायामेव देहान्तः समभवत्। पूर्वं तु स पुरुषो भगिन्या कमलादेव्या समं विवाहार्थम् उद्यतो एव नाऽभवत्। स कथयति स्म–"एकस्याः कन्यकायाः अम्बया समं नाऽहं विवाहं विधास्यामि .....तस्याः कन्यकाया वितण्डां को धारयिष्यति? .....अहं तस्या उत्तरदायित्वं न ग्रहीष्ये .....यदि सन्ततिः पुत्रोऽभविष्यत् तदा तु कथमपि निर्वोढुं विचारये परन्तु बालिकां तु नैव कामये .....तां भवन्तस्तत्रैव स्वसमीपे रक्षन्तु" ..... इत्यादि।

तस्य वचनानि समाकर्ण्य तं तस्य मातरं च वयम् उक्तवन्तः–"बालिका तु साम्प्रतं केवलं पञ्चवर्षदेशीया वर्त्तते। शीघ्रमेव भवद्भिः समं सा स्नेहेन सामञ्जस्यं स्थापयिष्यति। ..... बालास्तु क्लिन्नमृत्तिकासदृशा भवन्ति.....यस्मिन् आकारे संस्थापयिष्यन्ते तथैव आकृतिं ग्रहीष्यन्ते .....इत्यादि।" परन्तु अस्माभिः बहुविधे कथितेऽपि सः कथमपि कन्यकां स्वसमीपे रक्षितुं सहमतो न बभूव।

अन्ततः व्यथितमानसेन अहं कमलाभगिनीं स्वजननीं च वस्तुस्थितिम्प्रोक्तवती। जननी तु पूर्वत एव समुद्यता बभूव। तस्याः कृते तु कमलायाः पुनर्विवाह एव प्राथम्यं भजति स्म। विपाशाया व्यवस्थां तु सा किमपि विशिष्टं न मन्यते स्म। परन्तु भगिनी कमलादेवी कथमपि विपाशाया वियोगं सोढुं न समुद्यता बभूव। सा तस्या उपेक्षां कदापि न विचारयति स्म। तस्याः कृते पुनर्विवाहस्याऽपेक्षया स्वसुतायाः सम्यक् पालनं प्राथम्येन प्रवर्त्तते स्म। सा रुद्धकण्ठा प्रोक्तवती–"अहं किमपि करिष्यामि परन्तु स्वकीयाम् आत्मजां न त्यक्ष्यामि .....तां स्वसमीपे एव रक्षिष्यामि .....साऽपि मया सहैव निवत्स्यति .....।"

अहं भगिनीं प्रबोधयितुकामा संभालयितुकामा च प्रोक्तवती–"स्वसः! अत्र धैर्यस्य आवश्यकता वर्त्तते .....त्वया कठोरता नाऽऽचरणीया .....मन्ये ते सर्वे कतिपयदिवासाऽनन्तरं विपाशां स्वीकुर्युः.....समयोऽपि कदाचित् अनेकेषां प्राश्नानां समाधानं प्रस्तौति .....तस्य प्रतीक्षा विधातव्या .....त्वया अत्र कथमपि हठवादिता न दर्शयितव्या।" इति .....मन्ये मम कथनस्य प्रभावो भगिन्याः मस्तिके कश्चित् प्रादुर्भूत एव। सा कथमपि विवाहार्थं सहमता बभूव।

अथ विवाहाऽनन्तरं सुप्रतिप्रस्थानवेलायां विपाशा कक्षाऽन्तरे निरुद्धेव आसीत्। न जाने कथम् अन्यदिवसाऽपेक्षया तस्मिन् दिवसे सा वाचाला बालिका अत्यन्तं

शान्ता तूष्णीं च दृश्यते स्म। स्वबालसुलभप्रवृत्तिभिः वाग्भिश्च सर्वान् श्रान्तान् विधास्यमाना सा बालिका मन्ये कालेन किमप्याभासयुक्ता विहिता। लोके तु प्रायः जननी एव कन्यकायाः सौप्रास्थानिकम् आचष्टे परन्तु अत्र कन्यका एव स्वजनन्याः सौप्रास्थानिकम् आचरति स्म।

भगिनी कमलादेवी तु निरन्तरं रोदनने स्वकीयां दुरवस्थामेव कृतवती। वारंवारं विपाशाया नामधेयस्य उच्चारणं कुर्वती चीत्कारमिव कृतवती। तत्सर्वं वीक्ष्य वयं विचलितमानसाः संवृत्ताः। प्रस्थानवेलायां सा पुनरेव उक्तवती–"मम सुतायाः किमप्यस्वास्थ्येन न भाव्यम्।यदि तस्याः किमपि अन्यथा भविता तदा यूयं मम मृतं मुखमेव द्रक्ष्यथ ....." इत्यादि। मम मानसं तस्या वचनमाकर्ण्य व्यथितं संजातम्। प्रतिवेशिनीनामपि चक्षूंषि सजलानि जातानि। परन्तु सर्वे शनैः शनैः इदमेव कथयन्ति स्म–"इदं समीचीनमेव संवृत्तं यत् भ्राता भ्रातृजाया वा कश्चिदपि अस्या विपाशायाः उत्तरदायित्वं ग्रहीतुम् उद्यतो नाऽभवत्"।

अस्तु, श्वशुरालयगमनाऽनन्तरं यदा तस्याः पत्रं समागतं तदा तदधीत्य इदमेव प्रतीयते स्म यत् सा विपाशां विस्मर्तुं न प्राभवत्। एकदा त्वहं यदा भगिनीकमलायाः श्वशुरालयं गतवती तदा भगिनीपतिरपि माम् एवम् अब्रवीत्–"अस्यास्तु कस्याश्चिदपि कार्ये मानसमेव न रमते। प्रायशः निन्तरं विपाशां स्मारं स्मारं रोदित्येव। अत्र गार्हस्थ्यकार्येषु किमपि ध्यानमेव न करोति। एवं कदा पर्यन्तं सर्वं चलिष्यति?"

भगिनीपतेर्वचनं निशम्य अहम् एकान्ते स्वसारं कमलाम् उक्तवती–"भगिनि! यथाशीघ्रम् आत्मानं सम्यक् धारयस्व। अथ च नवीनपरिस्थितिभिः समं सामञ्जस्यं स्थापयस्व। विपाशा च सानन्दं वर्त्तते। यदि जननी कदाचित् तां प्रति सावहिता न भविष्यति उपेक्षां विधास्यति तर्हि अहं तदर्थं सावहिता भविष्यामि, स्वसमीपे च समानीय तस्या भविष्य-चिन्तनं सुसम्पादयिष्यामि। तद्विषये त्वया विशिष्टा चिन्ता नैव कर्त्तव्या" .....इत्यादि।

"न जाने जननी तस्यै यथासमयं दुग्धं प्रयच्छति वा न वा? यदि समयाऽनुसारं तस्यै दुग्धं न दास्यते तदा सा बहु रोदिष्यति"–भगिनी कमला सबाष्पनयना प्रोक्तवती।

"अस्माकं जननी तत्कृते विमाता तु न वर्त्तते? त्वं कथमेतत् सर्वं व्यर्थं चिन्तयसि?" अहं भगिनीम् प्रावोचम्।

"किं सा मया विना स्वपिति? कस्तां शयनगीतं श्रावयति? नूनं सा बहुवारं जननीम् उद्वेजयितुं भवेत्? सा तु बहु चञ्चला वर्त्तते। निश्चितमेव भ्राता भ्रातृजाया च कदाचिद् उद्विग्नौ भूत्वा तस्याः कपोले चपेटिकामपि अदास्यताम्।" इत्येवं

कथयन्त्याः भगिन्याः नयनाभ्याम् अश्रुबिन्दवः निपतितुम् आरब्धाः। तत्सर्वं विलोक्य ममाऽपि हृदयं द्रवीभूतं सञ्जातम्।

० ० ०

जननी शनैः शनैः वार्धक्यं प्राप्नोति स्म। विपाशायाः सहजचाञ्चल्येन उद्धततया च सा प्रायशः समुद्विग्नतामेव धारयति स्म। यदा कदाचिद् रोषावेशात् सक्षोभतया च सा चपेटिकाप्रहारमपि करोति स्म। यदा सा "अम्ब! अम्ब!" इति कृत्वा रोदिति स्म तदा सा समुद्विग्नतया कोपाविष्टा ब्रवीति स्म-"अये हतभाग्ये! जन्मना समकालमेव स्वजनकमेव ग्रसितवती.....अधुना साम्प्रतं माम् अपि निगरितुं समुद्यता ..." इत्यादि। सा प्रायः विपाशाकारणात् खिन्नतामेव धारयति स्म कथमपि च विश्रामम् आरामं वा न प्राप्नुते स्म। मम विचारे बालकास्तु स्वपितृभ्यामेव सहजं स्नेहं लभन्ते, शेषाः मनुष्यास्तु केवलम् औपचारिकतामेव निर्वाहयन्तीत्येव सत्यम्। अहम् अनुभवामि स्म यद् अद्यतने दिवसे यदि भगिन्या समं किमपि दुःखदं घटितं स्यात् तदा जनन्या हृदये यावद् दुःखं तत्कृते भविष्यति तावद् दुःखं विपाशायाः कृते नैव भविष्यति। एतस्य कटुयथार्थस्य संकीर्त्तनमत्र कथमपि अप्रासंगिकं न वर्त्तते।

अस्तु, मया अनुभूतं यत् भगिन्याः कमलायाः मानसं तत्र श्वशुरालये कदापि अनुरक्तं न संजातम्। यदा कदाचिदपि सा स्वकर्मभिः अवकाशं प्राप्नोति तदा विपाशायाः संस्मरणेष्वेव निमग्ना भूत्वा आत्मानं विस्मारयति स्म। तस्याः स्वास्थ्यमपि पूर्वसदृशं न प्रवर्त्तते। यदा चाहं तस्याः श्वशुरालयात् प्रतिनिवृत्य जनन्याः समीपमागत्य तस्या तथाविधान् समाचारान् श्रावितवती तदा मम जननी सर्वं श्रुत्वाऽपि अश्रुतामिव आत्मानं दर्शितवती।

अथ एकदा पूर्वसूचनां विना भगिनी कमलादेवी अकस्मादेव सहसा श्वशुरालयं परित्यज्य मातृगेहं प्राप्तवती। अनावृते द्वारे प्रविशन्ती सा समक्षमेव गृहाङ्गणे दृष्टवती यत् जननी रोटिकानिर्माणे विनिमग्ना वर्त्तते। भ्राता भ्रातृजाया च गृहाद् बहिः क्वचित् कार्यवशात् गतौ वर्त्तेते। रसवत्याः समीपे एव विपाशा भूमौ विलुठ्य रोदनं कुर्वाणा दुरवस्थामेव प्रकटयति स्म। कमलाम् अकस्मात् तत्र समागतां विलोक्य जननी तु अत्यन्तं आश्चर्यसम्पन्ना संजाता। तस्याः कस्याऽपि प्रश्नस्य समुत्थापनात् पूर्वमेव कमला भगिनी स्वहस्ताभ्यां तत्क्षणमेव विपाशां समुत्थाय गाढम् आश्लेष्य हृदयेन संयोज्य रोदनं कुर्वती जननीम् एवम् अब्रवीत्-

"अम्ब! किम् एतद्दिवसाय एव मया विपाशा त्वत्पार्श्वे परित्यक्ता?"

"कथम्? किम् अभवत्?"-जनन्याः स्वरः अपेक्षाकृतः मन्द एव आसीत्।

"अस्यास्तु रोदनं प्रकुर्वाणायाः दुरवस्था एव वर्त्तते, परं त्वं तु तत्सर्वम्

अनवलोक्य रोटिकानां निर्माणे एव विनिमग्ना वर्त्तसे। एकवारमपि त्वया एतत् न विचारितं यदेतस्मिन् विषमे शीतमये काले यदा सा क्लिन्नवसना भूमौ लुठति तदा तस्याः किं भविष्यति?"

भगिन्याः कमलायाः कथनमाकर्ण्य जननी दुःखिता संजाता। परन्तु विषयपरिवर्त्तनं कुर्वाणा तत्सर्वम् उपेक्षितं विधाय प्रावोचत्-"अकस्मादेव पूर्वं किमपि सूचनां न दत्त्वा अत्र तव समागमनस्य किं कारणम्?"

"अहं स्वकीयाम् आत्मजां सम्मेलितुम् एव इह आगताऽस्मि।"कमला प्रत्यवोचत्।

"एतत् त्वया सम्यक् न समाचरितं यत् श्वशुरालयं परित्यज्य अत्र अकस्मादेव समागता"-जननी रोषमिव द्योतयन्ती प्रोक्तवती। परन्तु भगिनी कमला जनन्याः वचनानि समकर्ण्याऽपि विपाशया समं खेलने परिहासने च निरता समदृश्यत।

"त्वया श्रुतं न हि?.....अहं त्वां किं कथयामि?".....जननी तारस्वरेण प्रोक्तवती।

पूर्वं तु भगिनी कमलादेवी उपेक्षाभावेन अन्य-मनस्कतया एव सर्वं गृहीतवती। परन्तु जनन्याः पारुष्यम् अधीरतापूर्णमाचरणं च समालक्ष्य आवेशपूर्णा भवन्ती प्रोवाच-"अम्ब! त्वया त्वहं श्रीधरेण (पूर्वपत्युर्नामधेयमेतत्) समं सप्तजन्मनां कृते परिणद्धा आसम्, पुनरयं श्रीकृष्णः (द्वितीयपत्युर्नामधेयम्) मम किंविधः पतिः?"

"प्रमत्ता मा भव कमले! एतत् समीचीनं न वर्त्तते" जननी प्रत्यवोचत्।

"काञ्चित् मातरं तस्याः आत्मजेभ्यः पृथक्करणं किं समीचीनं वर्त्तते?" भगिनी कमला अब्रवीत्।

"अहं त्वया समं व्यर्थं विवादं न कामये। त्वया तु स्वगृहे (श्वशुरालये) गन्तव्यम् एव। त्वं युगपरम्पराभिः परिचिता न प्रतिभासि। त्वया स्वकीयपातिव्रत्य-धर्मस्य निर्वाहः कर्त्तव्य एव।" जननी पुनरब्रवीत्।

"अहमपि पूर्णतया जानामि युगधर्मम्। अम्ब! त्वं यदा संसारे न भविष्यसि तदा जनाः ममोपरि अंगुलिम् उत्थापयिष्यन्ति .....मम चरित्रं चर्चयिष्यन्ति .....भ्राता भ्रातृजायाऽपि च मन्ये मां प्रताडयिष्यतः .....इदमेव कथयितुमिच्छसि नु?".....इति कथयन्ती निरन्तरं विलपन्ती भगिनी कमलादेवी अश्रुवर्षणमेव कर्त्तुम् प्रारब्धवती।

"त्वं किं कथयसि पुत्रि! .....तव मानसे किमिदं सर्वं प्रादुर्भूतं सुते! .....किमेवं व्याहरसि सर्वम्?" इत्येवं कथयन्त्याः जनन्याः कण्ठमपि वाष्पेण रुद्धमिव संजातम्।

मम भगिनी कमलादेवी सहसा धीरगम्भीरस्वरेण वक्तुमारब्धवती-"अहं बहु

विचारितवती निर्णयं च कृतवती यत् श्वशुरालयस्थे गृहे कदाचिदपि नैव गमिष्यामि। एष च मम सर्वथा अन्तिमः निर्णयः। किं भवती जानाति यत् मम एष द्वितीयः पतिः अर्थात् भवत्याः जमाता श्रीकृष्णः किंविधो वर्त्तते? स घोरः सुरापश्चरित्रहीनश्च .....रात्रौ बहुविलम्बात् आगच्छति गृहे .....सदैव विपाशाया मरणमेव कामयते .....मम तव समीपे आगमनं कदापि न रोचते तस्मै .....अत्यन्तं क्रूरः सः .....गृह–सेविकावत् सततमाचरति मया समम् .....तत्र मदीयं भविष्यं सर्वथा अन्धकारयुक्तम् .....किं माम् अन्धकारे एव निमज्जयितुम् इच्छन्ति भवन्तः सर्वे? .....अहं कि कथयामि इतोऽधिकम्?.....मम एतं द्वितीयं विवाहं यूयं सर्वे तथा उत्साहेन सम्पादितवन्तः यदहम् एतत् सर्वं कथयितुं न पारयामि स्म। यूयं सर्वे माम् अत्र भारस्वरूपं मत्वा पितृगृहात् निःसार्य श्वशुरालयनामधेये अन्यस्मिन् गृहे प्रक्षिप्तवन्तः .....तस्य गृहस्य के संस्काराः वर्त्तन्ते? .....मम पत्युः स्वभावः कीदृशो वर्त्तते?.....इत्येतत् सर्वमवगन्तुं कस्याऽपि पार्श्वे समय एव नासीत् .....केवलं कथमपि कश्चित् पुरुषः पुनर्विवाहं कर्त्तुं कयाचिद् विधवया समम् उद्यतः इत्येव महती योग्यता तस्य? .....किमहं भवतां सर्वेषां कृते भाररूपा भवामि यद् भवन्तः सर्वे मम भविष्यं पुनर्विवाहे एव पश्यन्ति? ....." सुदीर्घं निःश्वस्य भगिनी कमलादेवी पुनरेव वक्तुम् प्रारब्धवती–

"अस्मिन् मातृगृहे पितृगृहे वा ममाऽप्यधिकारो वर्त्तते .....यतो हि एतद् गृहं मम जनकेन निर्मितम् .....इतः परमहम् अत्रैव निवत्स्यामि .....अहं तु त्वत्सर्वैः सम्पादितं सम्प्रेरितं हठात् परिनिष्ठितं च द्वितीयमिमं विवाहं पुरुषेण कृतं व्यभिचारमिव मन्ये .....यावान् खलु भ्रातृमहोदयस्य भ्रातृजायाया वा प्रश्नो वर्त्तते तदप्यहं द्रक्ष्यामि यत् ते मां कथमस्मात् गृहात् निष्कासयितुं समर्थाः? कथं च कश्चित् मां स्वकीयाधिकारात् वञ्चितां कर्त्तुं शक्नोति?....." इत्येवं सर्वं कथयन्त्याः कमलायाः भगिन्याः बाष्पमिश्रितोऽपि स्वरः सर्वथा आत्मविश्वासेन परिपूर्णः सुदृढश्च प्रतिभाति स्म।

अहं तु ज्येष्ठभगिन्याः कमलायाः मानसे आगतेन एतेन परिवर्त्तनेन अप्रत्याशितेन आत्मविश्वासेन च आश्चर्यचकितेव संजाता। मम मनसि कुत्रचित् प्रसन्नतायाः प्रकाशोऽपि इति विचार्य समुद्भूतो यत् भगिनी दुर्बला न वर्त्तते। कश्चित् पुरुषः स्त्रियाः सहचरः सहभागी वा भवितुमर्हति परन्तु कस्याश्चित् स्त्रियाः अन्तिमं लक्ष्यं ध्येयं वा पुरुष एव वर्त्तते इति न सम्यक्।

जीवने सर्वैरन्तिमं लक्ष्यं तु एकाकिनैव प्राप्तव्यं भवति। अथ च मम ज्येष्ठा भगिनी कमलादेवी मन्ये इदमेव निर्णीतवती यत् सा एतस्या जीवनयात्रायाः सहयात्री स्वयमेव भविष्यति। उक्तमपि श्रीमद्भगवद्गीतायाम्–

"उद्धरेदात्मनाऽऽत्मानं नाऽऽत्मानमवसादयेत्" इति।

***

कथं पुनः प्रत्यागमः?

"अम्ब! भवत्या समं कश्चित् मेलितुं समागतो वर्त्तते" सुनीता द्वारदेशस्था प्रोक्तवती।

"को वर्त्तते सुनीते!"

"अम्ब! इतः पूर्वं स मया कदाचिदपि नाऽवलोकितः। प्रायः विंशति-द्वाविंशति-वर्षदेशीयो नवयुवको वर्तते। मन्ये भवत्याः कश्चित् बालशिष्यो भवेत् यः प्रणाममाचरितुं समागतः स्यात्"-सुनीता स्वमनसा अम्बायाः जिज्ञासायाः समाधानं कुर्वाणा प्रोक्तवती।

"अस्तु, आभ्यन्तरे प्रवेशय" इत्यम्बाया आदेशं समुपलभ्य सुनीता तत्राऽऽगन्तुकं युवकं समाह्वातुं बहिर्निर्गत्य क्षणाऽनन्तरमेव तेन सुदर्शनयुवकेन सममेव कक्षे प्रविष्टवती।

"किं भवती एव मैत्रेयीमहोदया वर्तते?" स युवको विश्वस्तमानसो भवितुकामः प्रोवाच।

बहुकालाऽनन्तरं स्वकीयं नामधेयमाकर्ण्य मैत्रेयीदेवी आश्चर्यचकिता संजाता। यतो हि एतेन नामधेयेन तु, अत्रस्थः कश्चिदपि जनः परिचित एव नाऽभूत्। सा तु सर्वेषां कृते साम्प्रतम् "अम्बा" इति नामधेयेनैव सुप्रसिद्धा। सर्वे ताम् 'अम्बा' इति सम्बोधनेनैव समाह्वयन्ति। सा तु विगत-द्वाविंशतिवर्षेभ्यः स्वकीयं नामधेयमपि विस्मृतवती। तस्मिन् आवासक्षेत्रे 'अम्बा' इति नामधेयेनैव तस्याः परिचयाऽवसरः सम्प्रवर्त्तते। पुनरयमधुना महानुभावः कथं शान्ते सलिले प्रस्तरमिव प्रक्षिप्य तस्याः जीवनचक्रे अस्त-व्यस्ततां समुत्पादयितुं प्रकटीभूतः?

"एवम्, इदमेव मम नामधेयं वर्त्तते। परन्तु त्वं कोऽसि? मम नामधेयं कथं जानासि? मया तव किं कार्यम्? इतः पूर्वं तु कदाचित् त्वं न दृष्टिपथमागतः" इति कथयन्त्याः अम्बाया उत्सुकता चरमसीमानं स्पृष्टवती। सा स्वकीयम् उपनेत्रं सम्यक्तया नयनयोः सुस्थाप्य बहु निर्वर्ण्य तं युवकं दृष्टवती, पुनरपि परिचयस्य कश्चिदप्यङ्कुरस्तस्या हृदये न प्ररोहितोऽभवत्।

सुनीताऽपि कुतूहलवशात् तत्रैव स्थित्वा सर्वम् इति विचार्य निरीक्षते स्म यद् अम्बामहोदया संभवतः कश्चिदादेशमेव तां कथेयत्। अन्यथा तु तस्या अपि गृहे बहूनि कार्याणि कर्त्तव्यानि बभूवुः।

स नवयुवकः अम्बायाः पादयोः प्रणाममुद्रायां निपत्य यदा स्थितस्तदा अम्बामहोदयाऽपि तस्मै बहूनि आशीर्वचनानि समुच्चारयन्ती समक्षे स्थितायाम्

आसन्दिकायाम् उपवेष्टुं संकेतितवती। परन्तु स युवकः अम्बायाः पादयोः समीपे एव सुस्थितोऽभवत्।

"त्वम् उपरि आसन्दिकायाम् उपविश, नीचैरुपवेशने असुविधा भविष्यति" अम्बा प्रोक्तवती।

"न हि, पुत्रस्तु मातुश्चरणयोः सान्निध्ये एव शोभते" इति तस्य युवकस्य वाक्यमाकर्ण्य अम्बामहोदया सुसन्तुष्टा संजाता। पुनरपि सा अग्रे अवादीत्–"वस्तुतः अहं त्वां नैव पर्यचिनवम्। कृपया स्वकीयं परिचयं कथयस्व।"

"भवती मां 'पुत्र' इत्युक्त्वाऽपि परिचयं पृच्छति? अम्बायाः पुत्रेण समं कः परिचयः भवितुमर्हति?" स युवकः मन्दहासयुक्तः प्रत्युवाच।

"परन्तु अम्बायाः कस्याऽपि एकस्य पुत्रस्य परिचयः कथं भवेत्? अम्बायास्तु बहवः पुत्राः वर्त्तन्ते। प्रत्येकस्य पुत्रस्य परिचयस्तस्य मात्रा पित्रा च नामधेयेन सार्धमेव प्रकल्पते" मैत्रेयीदेवी युवकम् अवादीत्।

"भवती समुचितं न कथयति अम्बे! भवत्याः परिचयबलेनैव एको भवदीयो वास्तविकः आत्मजोऽपि वर्तते। तस्य नामधेयं दशरथ इति। किं भवती साम्प्रतमपि रुष्टा वर्तते? अम्ब! पितामहमहोदया न दृश्यन्ते। किं ते कुत्रचिद् गतवन्तः?" युवकः प्रोवाच।

तस्य युवकस्य तत्सर्वं वचनं निशम्य अम्बाया चेतनाचक्षूंषि अकस्मादेव समुद्घाटितानि। सा विचारयितुमारब्धवती–किमयं दशरथस्य पुत्रो वर्त्तते? अयं द्वाविंशतिवर्षाऽनन्तरं किं कर्तुमिह समागतः? किमयं मां नेतुमत्र दशरथेन प्रेषितः?

अहं तु एनं कदापि दृष्टवती एव न। यतो हि यदा सा स्वकीयं गृहं परित्यज्य पत्या श्रीभीमसिंहेन समम् प्रस्थिता तदा एष युवकः पुत्रवध्वाः चन्द्रप्रभायाः गर्भे आसीत्। दशरथस्तु कदापि ताम् अन्वेष्टुं विगतद्वाविंशतिवर्षेभ्यः प्रयासमेव न कृतवान्। किं पुत्रः दशरथस्तस्य पत्नी चन्द्रप्रभाऽपि आगते स्तः? स्वकीयस्य एकमात्रपुत्रस्य पुत्रवध्वाश्च कृते सा किं किं न कृतवती? .....परन्तु .....इति सर्वं चिन्तयन्ती मैत्रेयीदेवी द्वाविंशतिवर्षपूर्वे व्यतीते काले सम्प्रविष्टा बभूव।

o o o

तदानीं सा दिल्लीनगरस्य बहिर्भागे स्वपत्या श्रीभीमसिंहमहोदयेन समं निवसति स्म। तस्याः पुत्रो दशरथस्तदानीं सद्य एव एकस्मिन् साधारणे कार्यालये लिपिकरूपेण कार्यनिरतः संजात आसीत्। नियोजनवृत्तेः प्राप्तिसमकालमेव बहवो विवाहप्रस्तावाः दशरथस्य कृते तस्याः समक्षम्प्राप्तवन्तः। अन्ततः यथासंभवं सर्वं सुविचार्य सा

अत्यन्तम् उत्साहेन स्वकीयस्य एकमात्रपुत्रस्य दशरथस्य विवाहसम्बधं चन्द्रप्रभया सममेव सम्पादितवती। तदानीं चन्द्रप्रभाया आयुरपि विंशतिवर्षात्मिका बभूव। वध्वाश्चन्द्रप्रभाया गृहाऽऽगमनानऽन्तरं तु तस्याः कृते सम्पूर्णं गृहं चन्द्रप्रभामयमेव सञ्जातम्।

चन्द्रप्रभा अपि सर्वेषां कृते संजीवनी इवाऽभवत्। सा तस्यै प्रत्येकस्मिन् पर्वणि तथाविधं सर्वमावश्यकं वस्तुजातं प्रयच्छति स्म येन तत्कृते वस्त्राणाम् आभूषणानां प्रसाधनसामग्रीणां वा कथमपि न्यूनता न प्रभवेत्। तस्याः काऽपि सुता नाऽऽसीत् अत एव सा वधूं चन्द्रप्रभां सुताम् एव मन्यमाना सुताया अभावबोधं परिवर्जयति स्म। यद्यपि प्रायः पुत्रो दशरथः परिहासे कथयति स्म यत् त्वम् एनाम् अतिशयमानवशात् प्रेमाधिक्यकारणाद् वा दूषयसि, परन्तु साऽपि प्रायस्तम् उत्तरयति स्म–"त्वमपि तु मम स्नेहाधिक्याद् दुष्टतामेव प्राप्तोऽसि .....। अरे! भो! प्रेम्णो वितरणेन तस्याऽल्पता न प्रवर्त्तते प्रत्युत तत्र वृद्धिरेव प्रवर्त्तते। इयं (चन्द्रप्रभा) एकां मातरं परित्यज्य द्वितीयां मातरं प्राप्तवती। यदि एकां वीरुधम् उत्पाट्य तस्या आरोपणं अन्यत्र विधास्यते तदा तस्या मूलानां सुस्थापने कश्चित् समयस्तु अपेक्षते एव।"

तत्सर्वमाकर्ण्य पुत्रो दशरथस्तूष्णीमेवाऽभवत्। साऽपि चन्द्रप्रभायाः साधारणान् दोषान् त्रुटींश्च सदैव तिरस्करोति स्म। प्रायः वर्षद्वये एव संगीता समुत्पन्ना। तदनन्तरं तु तस्याः प्रायः समस्तः कालः संगीतायाः पालने लालने क्रीडायामेव च व्यत्येति स्म। तस्याः पतिः श्रीभीमसिंहमहोदयोऽपि सायंकाले स्वकार्यालयादागत्य शिशोः संगीतायाः सेवायामेव निरतोऽभवत्।

अस्तु, संगीतायाः समुत्पत्त्यनन्तरं सा न केवलं तस्याः सम्यक्तया परिपालने एव व्यस्ता अजायत प्रत्युत गृहस्य समस्तानि कर्याणि अपि निष्पादयति स्म। एवं वृद्धावस्थाकारणात् दुर्बलायमानेषु तस्याः स्कन्धेषु शनैः शनैः द्विगुणितो भारः समारूढः। दशरथश्चन्द्रप्रभा च सर्वविधेन उत्तरदायित्वेन पृथग्भूतौ सन्तौ स्वकीये संसारे एव समस्तौ व्यस्तौ वा बभूवतुः। अनेकधा तु तस्याः मानसे एष भावः समुदेति स्म यत् किमिदम् उचितं वर्त्तते? चन्द्रप्रभा परिवारस्य गार्हस्थ्यस्य वा उत्तरदायित्वं निर्वोढुं कथं न कामयते? सा प्रातः नववादनात् पूर्वं स्वीयकक्षात् बहिरेव न निःसरति। शीतर्तुः स्याद् अथवा ग्रीष्मर्तुः परन्तु सा कदापि नववादनात् पूर्वं विष्टराद् उत्थातुमपि न शक्नोति। सा स्वयमेव षड्वादनात् पूर्वमेव जागृता भूत्वा नववादनपर्यन्तं गृहस्य सर्वाणि कर्माणि सम्पादयति स्म।

स्वच्छताकिरिणी प्रातः षड्वादनकाले गृहं स्वच्छं विधातुम् उच्छिष्टानि पात्राणि च सम्मार्जयितुं समागच्छति स्म। तदर्थं षड्वादनात् पूर्वमेव प्रारुत्थाय

पानीयादेः व्यवस्था करणीया भवति स्म। अत एव सा ततः पूर्वमेव उत्तिष्ठति स्म। श्रीभीमसिंहमहोदयोऽपि सर्वं दैनन्दिनं कृत्यम् अष्टवादनात् पूर्वमेव सम्पाद्य जलपानादिकं च नववादनपर्यन्तं विधाय स्वकीयं कार्यालयं प्रति प्रतिष्ठते स्म। अत एव सा अष्टवादनपर्यन्तं तस्य कृते अल्पाहारस्य व्यवस्थां विधाय तत्कृते भोजनमञ्जूषां (टिफिन) सम्पादयति स्म। एवं प्रत्यहं सा सार्धपञ्चवादनपर्यन्तमुत्थाय सार्धनववादनपर्यन्तं तु क्षणमपि अवकाशं न प्राप्नोति स्म।

यदा प्रातः सा स्वपत्युः श्रीभीमसिंहस्य कृते भोजनमञ्जूषां सम्पादयति स्म तदैव दशरथोऽपि कथयति स्म–"अम्ब! कृपया एककपमात्रं चायं मह्यमपि प्रदेहि.....। संगीतायाः कृते दुग्धं साधयस्व .....सा रोदिति साम्प्रतम् .....कृपया पश्यतु ताम् ....." इत्यादि। सा भोजनमर्धनिर्मितमेव विहाय पूर्वं चायं निर्माति स्म। दुग्धस्य पात्रं प्रक्षाल्य पौत्र्याः कृते दुग्धं साधयति स्म। तदेतेषु सर्वेषु कार्येष्वेव कदाचिद् भीमसिंहमहोदयस्य कार्यालयप्रस्थानेऽपि विलम्बः प्रवर्त्तते स्म। अत एव सोऽपि क्षुब्धः सन् प्रायशः बड़बड़ायते स्म।

अनेकधा तु भीमसिंहमहोदयस्ताम् उक्तवानपि–"दशरथं कथयस्व यत् वधूः प्रातःकाले शीघ्रम् उत्तिष्ठेत् गृहकार्यं च स्वयमेव सम्पादयेत्। त्वं कदा पर्यन्तं सर्वं कार्यजातं सम्पादयितुं प्रवृत्ता भविष्यसि? एवमपि प्रातःकाले पञ्चवादने नलयन्त्रे जलमायाति अतः जलप्रपूरणार्थं पञ्चवादने सार्धपञ्चवादने वा उत्थातव्यं भवति। पूर्णनिद्राया अभावादेव त्वं प्रायः अस्वस्था भवसि ....." इत्यादि।

तस्याः पतिः श्री भीमसिंहः सत्यमेव कथयति स्म यत् यदि सा प्रातरुत्थाय जलप्रपूरणार्थं मोटरयन्त्रस्य प्रारम्भकं (स्विच) न संचालयेत् तदा कस्मैचिदपि सम्पूर्णदिवसं जलमेव नोपलब्धं भवेत्। एतादृशेष्वेव प्रातःकालीनेषु कार्येषु सम्पादनीयेषु तस्या निद्रा एव परिपूर्णा न भवति स्म। तस्याः पतिः कथयति स्म–"मैत्रेयि! एकस्मिन् दिवसे प्रातरुत्थाय जलं न बिभृष्व। सर्वे जलं विना यदा भविष्यन्ति तदा तव प्रातरुत्थानस्य महत्त्वमावश्यकतां च ज्ञास्यन्ति। अग्रिमेषु दिवसेषु च स्वयमेव समुत्थाय सर्वं साधयिष्यन्ति।"

परन्तु सा भीमसिंहमहोदयानां वचनं निशम्य प्रायः कथयति स्म–"सर्वैः समं भवानपि तु कष्टमनुभविष्यति। वारिध्रिम् (बाल्टी) उत्थाप्य प्रतिवेशिनां गृहस्य सम्मुखे जलहस्तपम्पेषु जलम् आनेतुं को गमिष्यति? अत्र तु केवलं प्रातरुत्थाय प्रारम्भकम् (स्विच) एव तु चालनीयं भवति। एतदपेक्षया तत्सर्वं तु कष्टप्रदमेव भविष्यति।"

तस्याः वचनमाकर्ण्य श्रीभीमसिंहमहोदयाः प्रायःतूष्णीमेव भवन्ति स्म। ते नियतवेलायामेव सर्वं कार्यं सम्पादयितुं प्रयतन्ते स्म। ते विचारयन्ति स्म यत् तेषां कारणेन कोऽपि कदाचिदपि च कष्टं न प्राप्नुयात्। सदैव ते स्वयमपि कष्टग्रस्ता

भूत्वा अपि अन्येभ्यः सुखमेव प्रदत्तवन्तः। एतस्यां प्रायः षष्टिवर्षपरिमितायाम् अवस्थायामपि ते कष्टम् अनुवन्तोऽपि पत्न्याः मैत्रेयीदेव्याः कृते कदाचित् स्वयमेव चायनिर्माणार्थम् उद्यताः दृश्यन्ते स्म। ते जानन्ति स्म यत् तेषां पत्नी प्रायः शरीरेण दुर्बला अस्वस्था च वर्तते, अत एव शीतर्त्तौ सा अवश्याय(जुकाम) ग्रस्ता बहुशः ज्वरग्रस्ताऽपि च जायते। अतः बहुधा तु ते एव प्रातरुत्थाय जलसंचयने प्रातःकाले च पात्र-प्रक्षालिकायाम् आगतायां गृहद्वारस्य समुद्घाटने सावधानाः तत्पराश्च प्रावर्तन्त।

यद्यपि मैत्रेयीदेवी नैव वाञ्छति स्म यत् ते प्रातरुत्थाय किमपि कार्यं कुर्वन्तु। वृद्धावस्थायां तु सर्वे एव पुत्राणां साहाय्यं कामयन्ते स्म। यथा कश्चित् पुत्रः स्वपितुः कृते तस्य दक्षिणहस्त इव भवति तथैव वधूरपि श्वश्र्वाः कृते वामहस्ता एव भवेत्। एतस्यां प्रौढावस्थायां प्राग्वृद्धावस्थायां वा कस्याश्चित् रचनात्मकः सहयोग एव श्वश्र्वाः कृते पर्याप्तं मानससन्तोषदायकः भवति। मन्ये कश्चित् मिष्ठान्नं न प्रयच्छेत् परन्तु मधुरवचनं तु समुच्चारयेत् एव। यदि तस्याः वधूः चन्द्रप्रभा केवलम् एकवारम् इदमेव अकथयिष्यत्-"अम्ब! नेदं तवायुः प्रातरुत्थाय जलप्रपूरणस्य। अधुना अहमेव प्रातरुत्थाय जलं प्रपूरयिष्यामि"-तदापि तच्छ्रुत्वा सा सन्तुष्टमानसा भूत्वा आनन्दमन्वभविष्यत्।

अथ एकदा सा साहसं कृत्वा स्वकीयं पुत्रं दशरथं प्रोक्तवती-"पुत्र! अस्मिन् गृहे समागतायाः चन्द्रप्रभायाः पञ्च वर्षाणि व्यतीतानि। पूर्वं तु सा नवागता आसीत् अनुभवहीना च। मया विचारितमासीद् यत् एतेषु वर्षेषु अस्य गृहस्य व्यवस्थाविषये सा स्वयमेव सर्वं विज्ञाय दत्तावधाना भविष्यति अतएव तदर्थं सा किं कथनीयं मया? त्वं तु स्वयमेव देशकालज्ञः बुद्धिसंयुतश्च वर्तसे। पूर्वाऽपरं यथार्थतया जानासि। अत एव अधुना त्वमेव तां कथय यत् प्रातरुत्थाय गृहकार्यविषये गाम्भीर्ययुक्ता सावहिता च भूत्वा ध्यानं ददातु व्यवस्थां च साधयेत्।"

परन्तु मम वचनं तत्सर्वम् आकर्ण्य मन्ये दशरथः प्रसन्नः न संजातः न च तस्मै तत्सर्वं मम कथनम् अरोचत। स तत्क्षणमेव प्रत्युवाच-"अहं तु बहुवारं ताम् अकथयम् .....त्वमेव वद किं करवाणि? ..... यदि सा प्रातरुत्थाय किमपि कार्यं न पश्यति तदा किमहं तां ताडयेयम्? ....."।

"तां प्रताडनार्थं भर्त्सनार्थं वा नाऽहं किमप्युक्तवती। अहं तु कथयामिं यत् सर्वेषां परिवाराणां गृहस्य काचिद् व्यवस्था भवति। तद्व्यवस्थाविषये आवश्यकता-विषये च विचार्य तथा प्रवर्तितव्यम्"-अहं प्रत्युक्तवती।

एकदा भीमसिंहमहोदयानां बुशशर्टवस्त्रस्य बन्धनं (बटन) स्खलितं संजातम्। सा चन्द्रप्रभायै तत्सुधारार्थं प्रदाय कुत्रचित् प्रस्थितवती। यदा गृहे समागता तदा

दृष्टवती यत् तद्वस्त्रं तथैव वर्त्तते। तत्र सुधारस्य कश्चित् प्रयत्न एव न कृतः। सा विचारितवती यत् इयं चन्द्रप्रभा तु किमपि कार्यमेव कर्त्तुं नैव इच्छति, न वा तस्या मानसं कस्मिश्चिंत् कर्मणि निरतं भवति। पौत्र्याः संगीतायाः वस्त्राणां प्रक्षालनं सुरक्षणं सुव्यवस्थापनं (प्रैस) च सैव करोति स्म। चन्द्रप्रभा तु मन्ये स्वकीये मातृगृहेऽपि किमपि कार्यं साधयति स्म वा न वा इति कथनं कठिनमेवासीत्। गृहे तु कन्यकाः लघूनि गृहकार्याणि स्वयमेव दर्शं दर्शं शिक्षन्ते स्म। अस्तु, सा चन्द्रप्रभाम्पृष्टवती– "वधु! किं पितृमहोदयानां बुशशर्टवस्त्रे बन्धनं (बटनं) व्यवस्थपितवती?"

सा प्रत्यब्रवीत्–"मातः! अहं स्यूत-(सिलाई) कार्यादिकं नैव जानामि। न वा स्यूतयन्त्रं (सिलाई मशीन) चालयितुं प्रभवामि।"

तदुत्तरं समाकर्ण्य सा वधूं प्रति प्रथमं वारं क्षुब्धा भवन्ती क्रोधाविष्टा संजाता। सा प्रोक्तवती–"चन्द्रप्रभे! अद्य पर्यन्तं मया न ज्ञातं यत् त्वं किं जानासि किं च न जानासि? कि कर्तुं शक्नोषि कि वा कर्तुं न शक्नोषि? किम् अतिमञ्जूषानां (आलमारी) स्वच्छताकार्यं न जानासि? किं वस्त्राणां प्रक्षालनं व्यवस्थितीकरणम् (प्रेस) अपि न जानासि? भोजननिर्माणं तु त्वं जानास्येव न। तव मातृगेहे पाचकास्तु न भवन्ति तदा पुनस्तत्र सर्वं कार्यं के कुर्वन्ति? तत्र किं किमपि न करोषि स्म? यदि अत्र एकस्मिन् दिवसे पात्रप्रक्षालिका न समागच्छेत् तदा त्वमिदमपि न विचारयसि यद् अद्य कार्यं कथं भविष्यति? को वा प्रक्षालनार्थम् आगमिष्यति? किमेतत् सर्वं ज्ञातुमपि तव मति र्न वर्तते? गृहे विद्यमानान् मर्कटिकावासान् (मकड़ी का जाला) अपि त्वं किं न पश्यसि?"

मैत्रेयी पुनः किञ्चिद् विरम्य चन्द्रप्रभाम् उपदेष्टुकामा शिक्षयितुकामा च वक्तुम्प्रारब्धवती–"परिवारे कन्यकाः नववध्वश्च स्वयमेव बहूनि सामान्यगृहकार्याणि सम्पादयन्ति। परन्तु विगतपञ्चवर्षेषु त्वया किमपि कार्यं शिक्षितुं ज्ञातुं वा कश्चित् प्रयत्नमपि न कृतवती। त्वया कदाचिदेकं चायचषकमपि निर्माय मह्यं न प्रदत्तवती। कदाचिदपि च मया सह उपविश्य आवयोः किमपि सुखं दुःखं वा ज्ञातुमपि प्रयासं न कृतवती। त्वं तु आतपे विद्यमानानि वस्त्राण्यपि संगृह्य गृहे न सुरक्षितवती। सर्वं मयैव सम्पादनीयं भवति। यदा च कश्चिद् गृहे समागतः स्यात् तदा तदर्थं जलपानं भोजनं तु दूरं भवतु, कदाचित् तस्य समक्षमागत्य तं प्रणामपूर्वकं स्वागतमपि न कृतवती। वधु! एतत् गृहं तवैव वर्त्तते। त्वया स्वकीयम् उत्तरदायित्वं सम्यक्तया अवगन्तव्यं संधातव्यं च।"

श्वश्र्वाः एतत्कथनसमकालमेव चन्द्रप्रभा सहाहाकरं तथा रोदितुमारब्धवती यथा तां कश्चित् ताडिताम् अकरोत्। उभयोः अर्थात् मैत्रेयी–भीमसिंहयोः स्थितिस्तदानीं तत्सर्वं विलोक्य विचित्रा एव प्रावर्त्तत। अन्ततः श्रीभीमसिंहमहोदय एव प्रोक्तवान्–

"अरे! चन्द्रप्रभे! त्वं सुशिक्षिता बुद्धिमती च वर्त्तसे। तव माता (श्वश्रूः) इदमेव वाञ्छति यत् त्वं गृहस्य समस्तम् उत्तरदायित्वम् अवगम्य तत्र रुचिं जनयस्व गृहकार्येषु च तस्याः साहाय्यं सम्पादयस्व। तत्र एवंविधेन रोदनेन किं कार्यम्?"

"पापाजी! भवानपि मातुरेव पक्षपातं करोति। मया यावत् संभवं वर्तते तावत् कार्यं क्रियते। इतोऽधिकं मत्तः आशा न कर्त्तव्या" इति कथयन्ती रोदनं कुर्वाणा चन्द्रप्रभा सकोपं स्वकक्षे प्रविष्टवती।

सायंकाले च यदा तस्याः पतिः दशरथः समागतस्तदा समग्रमेनं घटनाक्रमं स्वमनोनुकूलं विधाय रोदं रोदं श्रावितवती। दशरथोऽपि अशान्तमानसेन सर्वं समाकर्ण्य तत्क्षणमेव पित्रोः समक्षं समागत्य एवं निजगाद-"भवन्तः चन्द्रप्रभां यत् किमपि कथयन्तु तत्सर्वं मम पुरास्तादेव कृपया कथयन्तु। मम पृष्ठतः कृपया न तां कथयन्तु किंचिदपि। न जाने तां कथं सदैव तर्जयन्तः प्रताडयन्तः एव च भवन्तः वर्त्तन्ते। "पुत्री" शब्दोच्चारणं कुर्वतामपि भवतां स्वभावः तां प्रति क्रूरश्वश्रूरिव वर्तते।"

"किं पुत्र्यः गृहकार्येषु मातुः साहाय्यं न कुर्वन्ति? मातुः सुख-दुःखात्मकेषु भावेषु सहभागित्वं न वहन्ति? सा तुं सम्पूर्णे दिवसे पर्यङ्के निषण्णा निद्रमग्ना भूत्वा शयनमेव कुरुते। त्वं सर्वं वृतान्तमजानन्नेव तस्याः पक्षधरो भूत्वा विवादं कर्त्तुं समागतः"-इति मैत्रेयी पुत्रस्य दशरथस्य वचनानि निशम्य कोपाविष्टा भूत्वा प्रोक्तवती।

"भवती पुनः दोषारोपं विदधाति। अहं पक्षपातं न करोमि, प्रत्युत सत्यमेव भणामि। सत्यं तु कटु भवत्येव। गृहे भवत्कृते किमपि कार्यं तु वर्तत एव न हि। केवलं दोषान्वेषणमेव रोचते भवत्यै। अहं तु सम्पूर्णे दिवसे कार्यालये कार्यमग्नो भूत्वा परिश्रान्तः सन् यदा गृहं प्रत्यागच्छामि तदा त्वत्राऽपि प्रतिदिनं नवीनमेव नाटकं प्रचलितम् .....।" दशरथः पुनरब्रवीत्।

पुत्रस्य दशरथस्य वचनमाकर्ण्य अधुना तस्य पितुः श्रीभीमसिंहमहोदयस्य शरीरं कोपेन ज्वालावलीढमिव संवृत्तम्। तस्य मनसि इयं भावना समागता यत् यदि दशरथः कश्चिद् लघुबालकः समभविष्यत् तर्हि तस्य मुखे चपेटिकां प्रादास्यत्। पुनरपि स कथंचित् कोपं नियम्य-"अरे! मूढ! कलहं कः कुरुते? आवां कुर्वहे अथवा तव पत्नी चन्द्रप्रभा? सम्पूर्णे दिने यदि तव माता सेविकावत् कार्यं कुर्यात् तदा तु सर्वं समीचीनं भवेत्, परन्तु यदि वधूं किमपि कार्यं कर्त्तुं कथयेत् तदैव सा कलहं कर्त्तुं प्रारभते। किम् आवां युवयोः सेवकवत् वर्तावहे? किं सत्यं किं च असत्यम् इति अधुना त्वं मां शिक्षयिष्यसि? किम् आवां मूर्खौ बुद्धिहीनौ च भवावः"?-"इत्येवम् अधुना पर्यन्तं तूष्णीं स्थितः श्रीभीमसिंहः पुत्रं दशरथं साक्रोशम् अवादीत्"।

"पापा! कृपया भवान् शान्त एव तिष्ठतु। एतत् सर्वं मह्यं तु भवत्प्रायोजितमेव प्रतिभाति।"–इत्येवं दशरथप्रोक्तं वचनं निशम्य मैत्रेयी स्वपत्युः श्रीभीमसिंहस्य महान्तमपमानभावं विज्ञाय तत्र महद् दुःखमनुभूतवती। तत्क्षणं तु तस्या मानसे एष विचारः समागतो यद् दण्डमुत्थाप्य पुत्रं प्रताडयन्ती सा तं तत्कालमेव गृहाद् बर्हिः कुर्यात्। सा तु स्वप्नेऽपि न विचारयति स्म यद् दशरथः पित्रोस्तथाविधमपमानं विधास्यति। सा त्वेतद् विचार्य विस्मिता आसीद् यत् वधू चन्द्रप्रभा दशरथस्य हृदये किम्प्रकारकं विषं स्थापितवती? यां कन्यकाकल्पां वधूं सा "पुत्रि! पुत्रि!" इति कथयन्ती समालिंगितवती सैव तां किं सर्पिणीव दंष्टवती?

"भवन्तौ मम पृष्ठतः आवयोः निन्दां कुर्वन्तौ अन्योन्यं समुद्वेजयतः। भवन्तौ विचारयतः यद् आवां किमपि न जानीवः न च किमपि पश्यावः"–इति दशरथः पितरौ अभिलक्ष्य प्रोक्तवान्।

तस्य तं मिथ्यारोपं निशम्य तौ हतप्रभौ दुःखातिशयेन निश्चेष्टौ च संजातौ। येषां सम्पूर्णं व्ययभारं तौ उत्थापयतः स्म सर्वविधस्य सौख्यस्य सुविधायाश्च कृते प्रयासं कुरुतः स्म ते एव साम्प्रतं तान् दिनानुदिनं आक्षेपभाषां श्रावयन्ति स्म। मैत्रेयी विचारयति स्म यत् पुत्र-पुत्रवधूभ्यां समं निर्वाहः कठिनतरः प्रवर्तते। एतन्मध्ये एव श्रीभीसिंहमहोदयोऽपि सेवानिवृत्तः संजात आसीत्।तद् विलोक्याऽपि तयोः दिनचर्यायां किमपि परिवर्तनं न समागतम्। दशरथस्तु स्वकीयं सर्वं वेतनं केवलं भ्रमणेषु आपणेषु समायोजनेषु च व्ययीकुरुते स्म। परन्तु दैनन्दनस्य गृहस्य सर्वं व्ययभारं श्रीभीमसिंहमहोदय एव स्वीयसेवानिवृत्तमासिकधनेन (पेंशन) यथा कथंचित् साधयति स्म।

बहुवारं तु मैत्रेयीदेवी पुत्रं दशरथम् एवम् अवादीत्–"पुत्र! दशरथ! तव पितृमहोदयाः सेवानिवृत्ताः संजाताः। गृहस्य केचन व्ययभारास्त्वया अपि वोढव्या येन सर्वं यथावत् साधुरीत्या प्रचलेत् प्रतिमासं दूरभाषस्य विद्युद्व्ययपत्रकस्य च व्ययभारं त्वमेव साधयस्व ....." इत्यादि।

परन्तु दशरथः श्रुतमपि सर्वम् अश्रुतमिव करोति स्म। एवं पितरौ गृहव्ययमाध्याय सदैव समुद्विग्नौ बभूवतुः परन्तु दशरथस्य मनसि चन्द्रप्रभाया वा मानसे तत्सर्वस्य कृते कश्चिदपि प्रभावो नाऽभवत्।

पौत्र्याः संगीताया जन्मदिवसाऽवसरे ये उपहाराः प्राप्यन्ते स्म ते सर्वे सुरक्षिताः क्रियन्ते स्म। परन्तु यदा अन्येषां प्रतिवेशिबालकानां संगीतायाः सखीनां वा जन्मदिवसस्य समारोहावसरे उपहाराणां प्रदानावसरः समुपस्थितो जायते स्म तदा उभावपि तत्र किमपि ध्यानं न कुरुतः स्म। फलतः तत्राऽपि सामाजिको व्यवहारो ताभ्यामेव

निष्पाद्यते स्म। यदा मैत्रेयी कदाचित् आपणात् एकां शाटिकाम् आनयति स्म तदा चन्द्रप्रभा दशरथेन समम् आपणे गत्वा शाटिकाद्वयं क्रीणाति स्म। धनं कुतः प्राप्यते इति तत्र विचारणमेव निरर्थकमासीत्।

विगतमासेषु दशरथः एकं कारयानं क्रेतुं वारं वारं विचारयति स्म। पितुः श्रीभीमसिंहस्य समक्षं तेन बहुशः चर्चाऽपि कृता परन्तु श्रीभीमसिंहस्तद्विषये तूष्णीमेव बभूव। एतद्विषये पितुः श्रीभीमसिंहस्य मौनभावम् उपेक्षां वा विलोक्य दशरथः क्षुब्धः सञ्जातः। अन्ततः पिता भीमसिंह एव तमेवमब्रवीत्-"पश्य दशरथ! मया परिवारस्य सर्वेषां सदस्यानां कृते गृहस्य व्यवस्था स्वकीय-सेवाकाले एव सम्पादिता। त्वत्कृते स्कूटरयानमपि क्रीतवान्। अधुना त्वं स्वयमेव प्रबन्धं विधाय स्वकीयधनेन कारयानं क्रीणीहि अथवा वायुयानं क्रीणीहि, न तत्र मम काश्चदपत्तिः। परन्तु मम पार्श्वे कारयानं क्रेतुं धनं न वर्तते।" पितुस्तद्वचनं समाकर्ण्य तदानीं दशरथः शान्त एव सञ्जातः परन्तु तस्य मनोभावेन स्पष्टमेव परिलक्ष्यते यत् स पितुः निषेधवाक्यमाकर्ण्य प्रसन्नो न वर्त्तते।

अस्तु, एतन्मध्य एव चन्द्रप्रभा द्वितीयं वारं गर्भवती सञ्जाता। परन्तु मैत्रेयी तं समाचारं निशम्याऽपि प्रथमवारमिव यथा सा प्रेमव्यवहारं विशिष्टमवधानं वा ज्ञापयति स्म तथा स्नेहम् उत्साहं वा न प्रदर्शितवती। संभवतस्तस्मादेव वधूः चन्द्रप्रभाऽपि श्वश्रूं मैत्रेयीम् उद्वेजयितुं नवीनम् उपायं गृहीतवती।

एकदा श्रीभीमसिंहः कार्यवशाद् नगराद्बहिरासीत् मैत्रेयी च महानसे कार्यरता बभूव। पौत्री संगीताऽपि विद्यालयं गतवती। चन्द्रप्रभा प्रक्षालितानि वस्त्राणि सुव्यवस्थितानि (प्रेस) करोति स्म इति तदैव मैत्रेयी वधूं चन्द्रप्रभां भोजनार्थम् आहूतवती। परन्तु तत्क्षणमेव "धम्" इति शब्दमाकर्ण्य सा चन्द्रप्रभायाः कक्षे धावन्तीव समागता। चन्द्रप्रभा धरायां पतिता आसीत्। तद्विलोक्य मैत्रेयी किंकर्तव्यविमूढा भूत्वा स्वयमेव संज्ञाहीनेव सञ्जाता। पुनः कथञ्चिद् आत्मानं नियम्य वध्वाश्चन्द्रप्रभाया आनने वारं वारं शीतलजलबिन्दुसेचनेन तां चेतनायुक्तां प्रापितवती। जलं पाययित्वा सा चन्द्रप्रभां पृष्टवती-"वधु! किं स्वस्था तु वर्तसे?" चन्द्रप्रभा मन्दस्वरेणाऽब्रवीत्-"मातः! किं मे संवृत्तम्? अहं तु वस्त्रेषु प्रेसं करोमि स्म .....न जाने कथं चक्रमिव भ्रान्ता भूत्वा नीचैः पतितवती"। मैत्रेयी तदाकर्ण्य-"अस्तु, अधुना उत्तिष्ठ। पर्यङ्के शयनं कुरुष्व। तुभ्यं विश्रामः अपेक्षते। मन्ये दौर्बल्यवशात् तदेतत् संवृत्तम्" इत्युक्त्वा आश्रयं प्रदाय शनैः शनैः पर्यङ्कपर्यन्तं व्यवस्थापितवती। पुनश्च उष्णं दुग्धं प्रदाय ताम् आश्वस्तां कृतवती। यदा च सा पुनः किञ्चिद् व्यवस्थिता संजाता तदा सा स्थालीपात्रे भोजनं संयोज्य तदर्थं प्रस्तुतवती। चन्द्रप्रभा तु केवलम् एकामेव रोटिकां भुक्त्वा भोजने किञ्चिद् अरुचिं प्रदर्श्य मुखप्रक्षालनार्थं प्रस्थिता।

यदा पर्याप्तकालं सा न प्रत्यागता तदा मैत्रेयी तां द्रष्टुं स्नानागारस्य पार्श्वे मुखप्रक्षालनस्थले (बेसिन-समीपे) गतवती। तत्र सा दृष्टवती यत् चन्द्रप्रभा वमनमिव कृत्वा पुनरेव संज्ञाशून्या भवन्ती धरायां पतितेव वर्तते। सा चन्द्रप्रभाम् इतस्ततः कृत्वा संज्ञानं प्रापयितुं प्रयासं कृतवती परन्तु तत्र निष्फला बभूव। अन्ततः यथा कथंचित् सा महता प्रयासेन तां विष्टरपर्यन्तं प्रापितवती। गृहे तु तदानीं कश्चिदपि न बभूव। तदानीं दूरभाषयन्त्रमपि निष्क्रियमासीत् अन्यथा तु कश्चित् चिकित्सक एव आहूतः अभविष्यत्। एतस्याम् अवस्थायां च वधूम् एकाकिनीं परित्यज्य क्वचिद् गमनमपि दुष्करमासीत्। अथ च संगीताया विद्यालयाद् आगमनस्याऽपि समयः प्रवर्तते स्म। सा विचारितवती यत् यदि चन्द्रप्रभा कदाचिद् दारुणावस्थायां व्रजेत् किमप्यप्रत्याशितं वा भवेत् तदा तस्याः कारागारगमनमपि संभाव्यते। तस्याः प्रतिवेशे तथाविध एव घटनाक्रमः कतिचिन्मासपूर्व एव प्रवर्तित आसीत् यस्मिन् नववध्वाः प्रताडनामालम्ब्य श्वशुरौ कारागारे प्रापितौ। एवं नानाविधैरमाङ्गलिकैरनपेक्षितैश्च विचारैः परिवृता भूत्वा तदानीं सा एकाकिनी भवन्ती भयाक्रान्ता बभूव।

अस्तु, एकघण्टाऽनन्तरमेव तस्याः पतिः श्रीभीमसिंहमहोदयः नानावस्तुभार-समन्वितः हट्टात् गृहे समागतः। सा तस्यै केवलम् एकग्लासपानीयमेव प्रदाय तत्क्षणं कमपि चिकित्सकम् आनेतुं प्रास्थापयत्। श्रीभीमसिंहोऽपि सर्वं वृत्तान्तमधिगम्य समुद्विग्नः दुःखितश्च भवन् चिकित्सकमानेतुं सपदि एव प्रयातः। मार्गमध्ये तेऽपि विचारयन्ति स्म यत् न जाने वधूः वास्तविकरूपेण सघनम् अस्वस्था वर्तते अथवा तौ पीडयितुं कामपि नवीनां भूमिकां नवीनं वा व्यूहं विरचयति।

यदा भीमसिंहमहोदयेन सह चिकित्सकः समागत्य निपुणं च निरीक्ष्य तान् अब्रवीद् यत् किमपि विशिष्टं न चिन्तनीयम्। गर्भावस्थाकाले एतत्सर्वं प्रवर्त्तते एव। तदर्थं बलवर्धकं पेयम् (टानिक) औषधं च लिख्यते तत्सर्वं यथासमयं दातव्यम् इति। तदा चिकित्सकस्य वचनं निशम्य तावुभावपि सन्तुष्टौ अश्वस्तौ च बभूवतुः। परन्तु चन्द्रप्रभायाः आकस्मिकसंज्ञाशून्यतायाः विषये यदा ते चिकित्सकं पप्रच्छुस्तदा स एवमवादीत्-"यदा सा स्वस्था भवेत् तदा कृपया तां पृच्छतु यद् इतः पूर्वं कदाचित् तस्याः अकस्मादेव संज्ञाशून्यता प्रादुर्भूता न वा? एतस्याः पितरावपि प्रष्टव्यौ येन यदि प्रचीनः कश्चिद् अपस्मारसदृशो रोगः स्याद् अथवा एतस्य रोगस्य कश्चिद् इतिहासो ज्ञातः स्यात् तदा तथाविधमेव औषधं दातव्यं भवेत्। यदि पूर्वमपि एतस्या मस्तिष्के कश्चित् तथाविधः आघातः स्यात् तदा विशेष-परीक्षणं (स्कैनिंग) कर्त्तव्यं भविष्यति। एष रोगस्तु अत्यधिकमानसिक-चिन्तनकारणात् विशेषाघात-वशादपि च भवितुं शक्नोति।"

सायंकाले यदा दशरथः स्वकीयकार्यालयात् प्रतिनिवृत्तः तदा तस्मै चन्द्रप्रभायाः

समग्रं रोगवृत्तान्तं निवेद्य तस्याः पितरौ सूचयितुं श्रीभीमसिंहो मैत्रेयी च निर्दिष्टवन्तौ। पुत्र्याः चन्द्रप्रभायास्तद्वृत्तं विदित्वा तस्याः पितरौ अग्रिमे दिवसे एव समागतवन्तौ। तस्यास्तद्विचित्रं रोगं च समाकर्ण्य तावपि आश्चर्यचकितौ बभूवतुः। यतोहि ततः पूर्वं कदाचिदपि सा अपस्मारसदृशेन तथाविधेन रोगेण ग्रस्ता नाऽभूत्। यदि तथाविधा सा रोगग्रस्ता इतः पूर्व नाऽभूत् तदा कथमत्र रुग्णा संजाता? चन्द्रप्रभाया माता प्रोक्तवती यत् अस्मिन् गृहे समागत्य साम्प्रतं मन्ये तस्याः कन्या मस्तिष्के किमपि दुःखं धारयति, समुद्विग्नतां वा वहति, अथवा भृशम् आत्मचिन्तन-मन्थनेन (तनाव) संग्रस्ता वर्तते। मातृगेहे तु सदैव सा प्रसन्ना आसीत् पुनः श्वशुरालये समागत्य कथमेष रोगप्रस्तारः?

चन्द्रप्रभायाः मातुस्तत्सर्वं वचनं निशम्य श्रीभीमसिंहमहोदयो मैत्रेयी च अत्यन्तं चिन्तातुरौ समुद्विग्नताग्रस्तौ च बभूवतुः। चन्द्रप्रभा तु तद्घटनाऽनन्तरं सदैव विष्टरे आरामं प्रकुर्वाणा समयं व्यत्येतुं प्रारब्धवती। परन्तु तौ सदैव वध्वाः सेवायामेव निरतौ संजातौ। मैत्रेयी प्रत्यहम् उभयोः कालयोः भोजननिर्माणे पौत्र्याः संगीतायाः सज्जायाम्, गृहस्य सामान्यव्यवस्थायामेव च नितरां निमग्ना भवति स्म, परन्तु मनसि कथमपि शान्तिं शरीरे च विश्रामं न प्राप्नोति स्म। दशरथोऽपि कदाचिद् भोजननिर्माणे एव न्यूनतां दोषं वा प्रदर्श्य तस्यै कष्टमेव प्रयच्छति स्म। कदाचिद् द्विदलं तस्मै न रोचते, कदाचित् नीवनभोजन-पदार्थ-निर्माणे आग्रहं दर्शयते स्म परन्तु पत्नीं चन्द्रप्रभा कदापि भोजननिर्माणे साहाय्यं कर्तु न कथयति स्म।

यदि मैत्रेयीदेवी फलानां रसं निःसार्य वध्वै न प्रयच्छेत् तदा वधूस्तु, रसपानमपि न कुर्यात्। वस्तुतः गृहे तस्याः स्थितिः वध्वाः चन्द्रप्रभायाः सेविकावत् समजायत। गृहकार्यस्य आधिक्यवशाच्च प्रत्यहम् आशान्तिरपि भवितुं प्रारब्धा। यदि कदाचित् मैत्रेयी पर्याप्तं परिश्रान्ता भूत्वा पर्यङ्के निपतिता भवति स्म तदा श्रीभीमसिंह एव महानसे गत्वा कपद्वयं चायं निर्माय तया सह उपविश्य एककपचायं च तस्यै प्रदाय चायपानं करोति स्म। तदानीं मैत्रेयी तत्सर्वं विलोक्य कथयति स्म-"किम् अस्मिन् आयुषि त्वया एव सर्वम् एतत् करणीयं भविष्यति?"

गृहस्य दैनन्दिनः व्ययभारोऽपि शनैः शनैः कष्टसाध्य एव सम्प्रवृत्तः। दशरथस्तु गृहस्थ-व्ययसम्बन्धे किमपि ध्यानमेव न करोति स्म। सेवानिवृत्तिमासिकधनस्य (पेंशन) दशसहस्त्ररूप्यकेण तथा च प्राप्तभविष्यनिधिवित्तस्य च पञ्चसहस्त्ररूप्याणि निःसार्य एवं पञ्चदश-सहस्त्ररूप्यकेण प्रतिमासं गृहस्य दैनन्दिनः व्ययः प्रसाध्यते स्म। पुनरपि कदाचिद् विद्युद्व्यजनस्य, कदाचित् प्रकाशयन्त्रस्य, कदाचित् जलप्रक्षेपकयन्त्रस्य (टुल्लू-मोटरपम्प) कदाचित् प्रेसयन्त्रस्य फ्रिज-कूलर-आदि-शीत-कारकयन्त्राणां सुधारक्रियायां वा पर्याप्तं धनं व्ययीभूतं दृश्यते। एतेषां सर्वेषाम्

उत्तरदायित्वमपि ते एव निर्वहन्ति स्म। एतस्मिन्नयुषि आरामस्यापेक्षया तेषां सर्वः समयः गृहस्य व्यवस्थाया मेव रुध्यते स्म।

कतिपयदिवसाऽनन्तरं पिता भीमसिंहमहोदयः पुत्रं दशरथमवादीत् यत् उपरिस्थितं कक्षद्वयं स भाटके प्रदातुमिच्छति येन कश्चिद् धनागमो भवेत्। परन्तु दशरथः पितृमहोदयस्य प्रस्तावस्य पर्याप्तं विरोधमकरोत्। तेन इदमपि संकेतितं यत् स स्वयमेव उपरिस्थिते कक्षे वासं कर्तुमिच्छति। श्रीभीमसिंहमहोदयोपि तूष्णीम् इति कृत्वा स्थितो यत् उपरिस्थिते कक्षे यदि दशरथो व्यवस्थितो भवेत् तदा नीचैः स्थिते गृहभागे पृथक् निवसन्तौ तौ शान्तिमेव अनुभविष्यतः।

परन्तु यथा यथा ते सहजं भवितुं वाञ्छन्ति स्म तथा तथा सर्वम् असहजमेव प्रवर्त्तते स्म। दशरथस्तु आत्मानम् एकमात्रम् उत्तराधिकारिणं मत्वा तस्य सर्वविधं लाभमेव ग्रहीतुं सदैव उत्सुक आसीत् परन्तु उत्तरदायित्वं किमपि नाऽनुभवति स्म। स पितुः श्रीभीमसिंहमहोदयस्य सर्वं संचितं भविष्यनिधिधनमपि ग्रहीतुमिच्छति स्म। स त्विदं तथ्यमपि विस्मृतवान् यत् सेवनिवृत्त्यनन्तरं प्राप्तभविष्यनिधिधनस्य लक्षद्वयं तु उपरिस्थितस्य कक्षद्वयात्मकस्य आवासस्य निर्माणे एव व्ययीभूतम्। स कदाचित् एकलक्षरूप्यकाणां कदाचित् पञ्चाशत् सहस्ररूप्याणां प्रायश एव याचनां करोति स्म। स तु तद्गृहमपि स्वकीयनामधेये विधातुम् आग्रहं करोति स्म। यद्यपि स इदमपि जानाति स्म यत् पित्रोरनन्तरं तु स स्वाभाविक एव उत्तराधिकारी भविष्यत्येव परन्तु वर्तमाने काले तस्य मानसे कश्चिदपि सन्तोषो नाऽभवत्।

श्री भीमसिंहमहोदयस्तु दैनन्दिनेन प्रवर्तमानेन कलहेन नितान्तम् उद्विग्न आसीत्। इतस्तु मैत्रेयीदेवी अपि सम्पूर्णे दिवसे प्रायः कार्यव्यस्ता भवन्ती क्षणमपि विश्रामं नाऽधिगच्छति। एतावती व्यस्तता कार्याधिक्यं च स तदापि नाऽनुभवति स्म यदा दशरथः शिशुरासीत्। तदानीं तु शरीरे बलमपि बभूव। यौवनावस्था-करणात् स्फूर्तिः आसीत्, उत्साहः आसीत्, मनसि किमपि कर्त्तुं निर्मातुं वा भावनाऽपि बभूव। परम् अधुना तु सा स्वीयजनैरेव प्रदत्तेन कष्टेन भग्ना भूत्वा व्याधि-वार्धक्यजन्यं दौर्बल्यं धारयन्ती मानसेन शरीरेण चेत्युभयथाऽपि सा खण्डित-प्राया सम्प्रवृत्ता।

"अद्य सायम् अस्माकं भोजनं न निर्मातव्यम्" इत्युक्त्वा प्रायः प्रत्यहमेव दशरथः स्वपत्न्या समं भ्रमणार्थं समययापनार्थं वा आपणे प्रतिष्ठते स्म। यदि कदाचित् स एकाकी गच्छति स्म तदा पत्न्याः कृतेऽपि टिफिनपात्रे भोजनमादाय प्रत्यावर्तते स्म। श्री भीमसिंहमहोदयो मैत्रेयी च यथा कथंचित् गृहे एव कृशरादिकं (खिचड़ी) निर्माय रात्रौ भुक्त्वा निद्रामग्नो संजातौ स्तः।

साम्प्रतं तु पौत्र्याः संगीतायाः कृतेऽपि पितामहस्य पितामह्याश्च पार्श्वे गमनस्य प्रतिबन्धः प्रारब्धः। संगीता तु स्वीयपितामह्या समं तथाविधा स्नेहयुक्ता, जाता यत् तां विना कथमपि शयनमपि न करोति स्म। परन्तु सा साम्प्रतं मातुः पार्श्वे एव शयनार्थं विवशीकृता। कदाचिद् यदि सा तस्यै किमपि भोज्यं वस्तुजातं प्रददाति स्म तदा तस्याः माता तद्वस्तुजातं हठात् आकृष्य अपचयपात्रे (डस्टबिन) प्रक्षिपति स्म। एवम् उभावपि तौ केवलं मूकदर्शकौ भूत्वा एतज्ज्ञातुमसमर्थौ स्तः यदेतस्य शीतयुद्धस्य कारणं किमस्ति? प्रत्यहं क्लेशः प्रवर्धते स्म परन्तु एतस्य विद्रोहस्य कारणं तौ न ज्ञातवन्तौ।

पुत्रः दशरथोऽपि किमपि श्रोतुं न समुद्यतः। एकदा संगीता पितामह्याः पार्श्वे एव समागत्य सुप्तवती। आह्वाने कृतेऽपि न आगतवती तदा दशरथः तत्र समागत्य चपेटिकाद्वयम्प्रदाय तां निगृह्य हठात् स्वकक्षे प्राप्तवान्। बालिका संगीता तु "दादी-मां दादी-मां" इति कृत्वा सहाहाकारं प्रकामं रुदितवती। तस्मिन् काले श्रीभीमसिंहमहोदयोऽपि यदा तां सहायतां कर्तुम् आश्रयं वा प्रदातुं प्रयत्नं कृतवान् तदा दशरथस्तमपि एकम् आघातं प्रदाय दूरीकृतवान्। तदाघातवशात् भीमसिंहमहोदयाः भूमौ निपतन्तोऽपि कथंचित् आत्मानं व्यवास्थापयन्, परन्तु भित्तिकायां संघर्षणात् तेषां शिरःस्थानात् रुधिरस्रावः सम्प्रवृत्तः। क्षणेनैव तत्र अकल्पितमिव घटितम्। मैत्रेयी तु तद्विलोक्य हतप्रभेव संजाता। केवलम् अन्तःपीडया रोदन्ती स स्वपत्युः भीमसिंहमहोदयस्य शिरः स्वकीयेन करेण संयम्य रुधिरप्रवाहस्यावरोधं विधाय सामान्य-चिकित्सा-पट्टिकामाश्लेष्य सामान्यावस्थां प्रापितवती।

तस्यां निशायां किमपि भोजनमेव न निर्मितम्। सर्वे सदस्याः संक्षुब्धाः अन्तर्मुखाश्च बभूवुः। मन्ये सर्वेषां बुभुक्षैव अस्तंगता। रात्रौ द्वादशवादने श्रीभीमसिंहमहोदयः स्वपत्नीं मैत्रेयीम् उक्तवान्-"मैत्रेयि! किं त्वं मया समं सहभागितां विधास्यसि? मन्ये मया करिष्यमाणो निर्णयो दुःखदो भवेत् सुखदो वा। परन्तु तत्र भविष्यत्काले केनचिद् आक्षेपेण पश्चात्तापेन वा न भाव्यम्। पूर्णतया पूर्वाऽपरं विचारं कृत्वा त्वं स्वकीयां सहमतिं कथयस्व।"

"किमेतद् भवान् मां पृच्छति? भवता सह सहभागितां विना कथमहं निवत्स्यामि?" मैत्रेयी प्रत्युक्तवती।

"अस्तु, प्रश्नं मा कुरु। यत् किमपि कथयामि तत् सावधानं शृणुष्व। यच्च शृणोषि तच्च मनस्येव स्थापयस्व। बहिः कथंचित् कश्चिदपि च आभासो न प्रभवेत्। श्वस्तने दिवसे स्वकीयां सर्वां यात्रासज्जां निष्पादयस्व। रूप्यकाणि आभूषणानि च यानि बैंके वर्त्तन्ते तानि सर्वाणि निःसारणीयानि। स्वकीयानि मदीयानि च आवश्यकानि वस्त्राणि मञ्जूषायां स्थापनीयानि। एको विष्टरः, कानिचित् भोजनपात्राणि, तैलम्, फेनिलम्

(साबुन) दन्तधावन-सामग्री, किञ्चिदल्पाहार-वस्तुजातम्। आवां देशाटनार्थं प्रस्थास्यावः। न जाने कदा प्रतिनिवर्त्स्यावहे। यदि प्रतिनिवर्तनं न भवेत् तदा तत्रापि न विचारणीयम्। यत् किमपि अत्र परित्यक्तं स्यात् तदर्थं को मोहः? अहं परश्वस्तने दिवसे प्रातः चतुर्वादने एव किञ्चिदन्धकारयुक्ते काले टैक्सीयानम् आनेष्यामि।"

"तव मानसे साम्प्रतं किं प्रचलति?" मैत्रेयी आश्चर्यमिश्रितेन स्वरेण प्रोक्तवती।

"अधुना किमपि प्रश्नं मा कुरु। सर्वं पश्चात् कथयिष्यामि" इत्युक्त्वा श्रीभीमसिंहमहोदयः मैत्रेयी च कथमपि तां रात्रिं व्यतीतां कृतवन्तौ।

अथ अन्येद्युः सर्वं यथासंकल्पितं सम्पाद्य अग्रिमे प्रातःकाले चतुर्वादने एव किञ्चिदन्धकारयुक्ते नभसि अन्तिमं वारं स्वकीयं गृहं साश्रुनयनं पूर्णतया निर्वर्ण्य श्रीभीमसिंहो मैत्रयीदेव्याः पाणिं प्रगृह्य यदा प्रस्थितस्तदा तत्र कदाचिदपि न प्रतिनिवृत्तः। पूर्वं तु केचन दिवसास्तेन एकस्मिन् अन्यस्मिन् नगरे आवासभोजनालये (होटल) व्यत्यापिताः पुनरेकदा तस्मिन्नेव नगरे तस्य कश्चिद् बालसखा श्रीरामसिंहः सहसा दृष्टिपथमागतः। तस्यैव सहयोगेन स कक्षद्वयात्मकमेकं भवनं क्रीत्वा तत्रैव शनैः शनैः सर्वाणि जीवनयापनार्थम् आवश्यकानि वस्तूनि संगृह्य अल्पकालेनैव जीवनं सुव्यवस्थितं कृतवान्।

यदा कदा तयोः संस्मृत्यां स्वकीयं नगरं सम्बन्धिनः परिजनाश्च समायान्ति स्म, मधुर-कटु स्मृतयोऽपि उद्वेलितं कुर्वन्ति स्म, संगीतायाः बालसुलभलीला अपि तां स्मारयन्ति स्म परन्तु कदाचिदपि पुत्रस्य दशरथस्य पुत्रवध्वाश्चन्द्रप्रभायाश्च नामधेयं तयो र्मुखात् नैव निःसृतम्। येषां संस्मरणं याः वाः स्मृतयः कष्टदाः भवेयुस्तेषां विस्मरणमेव समीचीनम्। जीवन-चक्रं तु कदापि गतिहीनं न भवति, सदैव चलायमानमेव प्रवर्तते। अत्र तु गृहे सामान्यं दैनिकं कार्यं निष्पाद्य अपि विश्रामस्य पर्याप्तः समयः उपलभ्यते स्म।

श्रीभीमसिंहमहोदयास्तु समीपस्थे एकस्मिन् आश्रमे गत्वा तत्र घंटाद्वयं निर्धन-बालकान् पाठयितुं प्रारब्धवान्। स इदमपि अनुभवति स्म यत् तस्य निरुद्धा जीवनगतिःपुनः प्रचलितुमभवत्। तस्य अवसादपूर्णा अवस्थाऽपि शनैः शनैरस्तंगता। उद्विग्नतायाः मनोभावः समाप्तो जातः। रक्तचापोऽपि सामान्यः समवर्तत। एवं समयः साधुरीत्या व्यतीतो भवति स्म। उभावपि पतिपत्न्यौ कदाचित् पृष्ठतः परिवृत्य न दृष्टवन्तौ। यत् परित्यक्तं हापितं वा तदर्थं हृदये कदाचिदपि मोहभावः न समुत्पन्नः। तौ उभावपि एनं कठोरं निर्णयं कृतवन्तौ यत् कदाचिदपि आजीवनं स्वीये पुरातने गृहे न प्रस्थास्यावहे। तस्य कपाटमपि न द्रक्ष्यावः। यदि द्वयोर्मध्ये कश्चिदेको मृतोऽपि स्यात् तदाऽपि सूचनां न प्रेषितां करिष्यावहे। अत एव यदा एकस्यां रात्रौ भीमसिंहः सहसा चिरनिद्रायां

विलीनः संजातस्तदा मैत्रेयी विचारितवती यत् पुत्रो दशरथः सूचनीयो न वा? सा तदानीं बहु समुद्विग्ना विचलिता च संवृत्ता।

अन्ततः तस्याः अन्तःस्थितो विवेकभावस्ताम् अवोचत्-"गृह-परित्यागस्य द्वादश-वर्षाणि व्यतीतानि। एतेषु द्वादश-वर्षेषु यदा कश्चित् ताम् अन्वेष्टुं परिज्ञातुं वा प्रयासमेव न कृतवान्, न चाऽपि तस्याः आवश्यकताम् अनुभूतवान् तदा तत्र तस्य कर्तव्य-स्मारणेन को लाभः? एतेषु द्वादशवर्षेषु अत्राऽपि प्रतिवेशे समाजे च पर्याप्तं परिचयभावाः समुत्पन्ना आसन्। सर्वे अत्राऽपि परस्परस्य सुखस्य दुःखस्य च सहभागिनो वर्तन्त एव"।

अत एव बहुभिः प्रोक्ताऽपि मैत्रेयी पुनः पुत्रं दशरथं किमपि न सूचितवती प्रत्युत स्वपत्युः श्रीभीमसिंहमहोदयस्य मुखे स्वयमेव अग्निं प्रदत्तवती। सा स्वपत्ये यद् वचनं प्रदत्तवती तस्य पूर्णतया पालनं सम्पादितवती।

श्रीभीमसिंहमहोदयस्य निधनाऽनन्तरं पूर्वं तु सा अत्यन्तम् अन्यमनस्का एकाकिनी च भवन्ती दुःखमग्ना संजाता। परन्तु शनैः शनैः सा आत्मानं संयम्य जीवनचर्यां परिवर्तितामकरोत्। नैराश्यं पृथग्विधाय अवसादं च दूरीकृत्य पुनः जीवनं चलायमानं कर्तुं बद्धपरिकस समवर्तत। साम्प्रतं सा स्वकीयकक्षद्वयात्मकस्य गृहस्य एकस्मिन् कक्षे लघून् बालकान् किमपि पाठयितुं प्रारब्धवती। तेन न केवलं किमपि धनमेव उपार्ज्यते स्म प्रत्युत मनोविनोदश्चापि प्रवर्तते स्म। गृहस्य दैनिकं कार्यजातं तु सुनीता समागत्य सम्पादयति स्म। प्रातः सायं समानवयस्काभिः प्रतिवेशिनीभिः समं भ्रमणकार्ये वार्तालापप्रसंगे च समयः व्यत्येति स्म। साम्प्रतं व्यतीतं सर्वं भूतकालं कथमपि स्मृतिपथे न समागच्छति स्म। एतत् तस्याः कृते वरदानमेव आसीत् यत् शरीरं यथाशक्यं सर्वं दैनन्दिनं कार्यं सम्पादयितुं सामर्थ्यं धारयति स्म। पत्युः श्रीभीमसिंहस्य निधनस्यापि साम्प्रतं दश वर्षाणि व्यतीतानि। सा सम्प्रति सप्ततिवर्षीया संजाता वर्त्तते।

० ० ०

"कि चिन्तयसे अम्ब!" स समागतो युवकः प्रश्नम् अकार्षीत्।

तस्य प्रश्नं समाकर्ण्य सहसा सर्वं भूतकालीनं चिन्तनं विहाय मैत्रेयीदेवी पुनः वर्तमाने काले समागता। सा पूर्वं तु किंचित् अव्यवस्थिता सम्भ्रमयुक्ता च संजाता परन्तु तत्क्षणमेव आत्मानं नियम्य किंचिंद् विस्रब्धमानसा च भूत्वा तं युवकम् एवम् अवादीत्-"किमपि नहि पुत्र!, त्वं स्वकीयम् आगमन-प्रयोजनं कथयस्व"?

"पितामहि! अम्ब! अहं भवतीं गृहं नेतुकामः समागतोऽस्मि। कृपया मया सह भवती स्वकीये गृहे प्रत्यावर्तनं करोतु।" स युवकः प्राह।

"अहं तु एतदपि न जानामि यत् त्वं कोऽसि? कुतोऽसि? पुनः केन अधिकारेण त्वया समम् अहं गच्छेयम्? अहम् अज्ञातमनुष्यैः समं क्वचिदपि गन्तुं न समुत्सहे।" मैत्रेयीदेवी तं युवकम् उपेक्षितमिव कुर्वाणा प्रत्यब्रवीत्।

"अहं भवदीयपुत्रस्य श्रीदशरथस्य आत्मजः सूर्यकान्तनामधेयोऽस्मि। अम्ब! मम जन्मनः कतिचित् मासपूर्वमेव भवती गृहं परित्यज्य पितामहेन समं प्रस्थितवती आसीत्। अहं पुनः भवतीं पूर्वस्मिन् गृहे नेतुम् अत्र समागतः।"–युवकः पुनरेव प्राह।

"को दशरथः? अहं तु दशरथनामधेयं कमपि पुरुषं नैव जानामि। न च कश्चिदपि मम पुत्रो वर्त्तते। त्वं व्यर्थमेव स्वकीयं समयम् अत्र हापयसि। कृपया स्वगृहं प्रयाहि"–मैत्रेयी प्रत्यवदत्।

"अम्ब! कृपया मम वार्त्तां शृणोतु। अहं भवद्भ्यां समं घटितैः सर्वैः वृत्तान्तैः पूर्णतया परिचितः संजातः। अधुना त्वहं भवतीम् आनेतुमिह समागतः ..." इत्यादि वाक्यं सर्वं कथयिष्यमाणं पौत्रं सूर्यकान्तं मध्ये एव निवार्य मैत्रेयीदेवी रूक्षेण कठोरेण च भावेन निर्वर्ण्य समीपस्थां सुनीतां सम्बोध्य एवम् अवादीत्–"अहं तव किमपि श्रोतुं न कामये। पुत्रि! सुनीते! मन्ये युवकोऽयं कुतश्चिद् भ्रान्तिवशात् इह समागतो वर्त्तते। कृपया एनं गृहस्य बहिर्द्वारपर्यन्तं प्रतिष्ठापयस्व" इत्येवं कथयन्ती स्वकीयनयनेषु समुद्भूतानि अश्रूणि कथं कथमपि नियन्त्रितानि विधाय कक्षाऽभ्यन्तरे प्रविष्टवती।

पुनः सा भित्तिकायाम् एकतः स्थापितस्य श्रीभीमसिंहमहोदयस्य चित्रस्य समक्षं स्वकीयं हस्तद्वयं संयोज्य प्रोक्तवती–"नाहं जानामि यत् मया साधु कृतं न वा परन्तु भवता समं सुविचारितं निर्णयं भवत्समक्षं प्रदत्तं वचनं च पूर्णतया साम्प्रतमपि निर्वहामि सुस्थापितं च सम्पादयामि। मन्ये मम निर्णयेन भवदीयः आत्मा शान्तिमेव प्राप्स्यति।"

ततः परं मैत्रीयीदेव्याः नयनाभ्याम् अनवरतम् अश्रुबिन्दवो निपतितुं प्रारब्धाः। ते अश्रुबिन्दवः पौत्रस्य मोहकारणात् अथवा व्यतीतानां दिवसानां पुनः स्मरणवशात् वा निपतन्ति इति निर्णेतुमशक्यम् आसीत् तत्र। मन्ये ते अश्रुबिन्दवः कथयन्ति स्म–"अधुना पुनः कथं कुत्र वा प्रत्यागमनम्?" इति।

***

अन्तिमम् आह्वानम्

"शुभे! अहं कार्यालयीय-कार्यवशाद् दिल्लीनगरं प्रति गन्तुं कामये। यदि तवाऽपि तत्र गमनस्य कश्चिदभिलाषः स्यात् तदा त्वमपि तत्र चलितुं शक्नोषि। विगतमासे त्वं स्वकीयप्रियसख्याः अपर्णायाः विवाह-समारोहे गन्तुं न प्राभवः। अत एव यदि तत्र गत्वा तदर्थं वर्धापनं शुभकामनां च प्रदातुमिच्छसि तदा तदपि त्वं कर्तुं शक्नोषि। अद्यैव निर्णयं कृत्वा सायंकालपर्यन्तं त्वं मदीये कार्यालये दूरभाषद्वारा सूचयस्व येनाऽहं रेलयानस्य आरक्षणं कारयेयम् ....." इत्युक्त्वा शुभायाः पतिः श्रीराजीवलोचनः स्वकार्यालयं प्रति प्रस्थितः।

पत्युः श्री राजीवलोचनस्य दिल्लीप्रस्थान-प्रस्तावमाकर्ण्य मम मानसे स्वप्रियतमां सखीम् अपर्णां द्रष्टुं मेलितुं च महती व्याकुलता प्रादुर्भूता। तस्याः जीवनसहचरम् अवगन्तुं द्रष्टुं च कश्चिद् विशेषः समुत्साहः समुत्कण्ठा च हृदये प्रकटीभूता। प्रायः एकमासपूर्वमेव अपर्णायाः विवाहस्य निमन्त्रणपत्रं समागतमासीत्। यदा तस्या निमन्त्रणपत्रं समागतं तदा तद्विलोक्य मम चक्षुषोः विश्वासः एव नाऽभवत् यद् इदं निमन्त्रणपत्रम् अपर्णाया एव वर्त्तते अथवा अन्यस्याः कस्याश्चित्। सैव अपर्णा यस्याः कृते विवाहस्तु दासतायाः शृङ्खला इव प्रतीयते स्म ..... अथवा तादृशः स्वर्णिमः पञ्जरः प्रतीयते स्म यत्र निबद्धा स्त्री स्वकीयान् पक्षान् दोधूयमानः कश्चिद् विहंगम इव विवशः कातरश्च भवन् उड्डयने प्रयतनं प्रकुर्वाणः स्वकीयान् प्राणान् परित्यजति।

अस्तु, अपर्णामहं बाल्यकालादेव जानामि। सा काचिद् विचित्र-स्वभावसम्पन्ना पृथक् चिन्तनशीला कन्यका बभूव। आवां वाराणसीनगरे बहुकालपर्यन्तं प्रतिवेशिरूपेण निवासं कृतवत्यौ। तत्रावयोर्मध्ये महत् सामञ्जस्यमासीत्। आवां सदैव गल्पवार्तां (गप्प) क्रीडां परिहासं च कुर्वाणे समाने विद्यालये समानकक्षायामेव च अधीयाने बहूनि वर्षाणि व्यतीतानि कृतवत्यौ। अपर्णाया माता-पित्रोः विवाहविच्छेदः केनचित् कारणेन तस्याः बाल्यकाले एव संजातः। सा स्वकीयेन जनकेन सममेव निवसति स्म। विद्यालय-शिक्षा-समाप्त्यनन्तरम् उच्चशिक्षा-प्राप्त्यर्थं दिल्लीनगरे गत्वा सा एकस्मिन् छात्रावासे प्रविष्टा बभूव। अहं तु वाराणस्यामेव एकस्मिन् महाविद्यालये स्नातक-परीक्षार्थं प्रविष्टा। परन्तु पत्र-दूरभाषादिद्वारा आवयोः सौहार्दतन्तुः सदैव संयुक्तो बभूव।

परा-स्नातकपरीक्षामुत्तीर्य अहं तु विवाहिता भूत्वा वाराणस्यामेव स्वकीयश्वशुरालये व्यवस्थिताऽभवम्, परन्तु अपर्णा त्रिंशद्वर्ष-देशीया भूत्वाऽपि विवाहस्य विषये न किमपि ध्यातवती। अद्यतनात् प्रायः त्रिवर्ष-पूर्वम् एकदा सा यदा मां मिलितवती तदाऽहं तया समं दिनद्वयं यापितवती। तदानीं तस्या व्यक्तित्वे विचारे व्यवहारे च समागतं परिवर्त्तनं विलोक्य अहं तु हतप्रभेव संजाता। सा तथाविधा बाल्यकालस्था

सरलस्वभावसम्पन्ना मन्दस्मितियुक्ता चञ्चला निश्छला च अपर्णा नाऽभवत् अपितु तस्याः स्थानम् एका आधुनिकगंभीरस्वभावसम्पन्ना अपर्णा गृहीतवती। तस्याः परिधानमपि कश्चित् युवकवत् जीन्स-पैन्टयुक्तमासीत्। नारीसुलभा कोमलता लज्जा च प्रायः अस्तंगतेव बभूव। स्वस्थापितैः जीवनमूल्यैः समं जीवमाना अपर्णा .....उन्मुक्ता .....स्वच्छन्दा .....स्वतन्त्रा .....पूर्णतया आत्मनिर्भरा .....दम्भयुक्ता च.....या खलु आत्मानम् अन्ययुवतीभिः पृथक् इव परिलक्षयति स्म। सा विवाहादिकमपि व्यर्थमिव बन्धनात्मकं मन्यते स्म। यस्याः कृते गार्हस्थ्य-जीवनमपि हीनतायुक्तं पारतन्त्र्य-प्रदायकं स्वतन्त्रताच्छेदकं च कल्पते स्म। सा प्रायशः कथयति स्म- "न हि भो! न हि, अहं कस्याऽपि पुरुषस्य आजीवनं दासतां वोढुं समर्था न भवामि .....अहं स्वकीये संसारे एव सुप्रसन्नाऽस्मि .....कस्यचिदपि हस्तक्षेपं स्वजीवने सोढुं न समर्था .....भारतीयसमाजे मनुष्येषु एष अपरः कुत्सितः स्वभावः प्रकृतिश्च वर्त्तते यत् ते परेषां वैयक्तिके जीवने साभिलाषं हस्तक्षेपं दृष्टिक्षेपं च कुर्वाणा दृश्यन्ते .....इदमत्यन्तम् अनुचितमहं मन्ये .....।" इत्यादि।

यदाऽहम् अपर्णाया गृहे गतवती आसम् तदानीमेव अकस्मात् तस्याः आवासस्वामी दुःसंयोदागत्य पृष्टवान्-"पुत्रि! त्वं द्वित्रिदिनाद् दृष्टिपथं नागता? .....किं क्वचिद् गतवती? .....कुशलं तु वर्तते?"

आवासस्वामिनस्तत्प्रश्नमाकर्ण्य अपर्णाया दृष्टिः वक्रेव संजाता। सा तस्मै किमपि विशिष्टं नोत्तरितवती। तद्गमनानन्तरं च मां निरूपयन्ती एवम् अवादीत्- "पश्यसि नु .....कथम् एतेषाम् अवरोधकारकः प्रश्न-कारकश्च स्वभावः प्रवर्त्तते ..... अहं क्वचिदपि गच्छेयम्.....पर्यटेयम् .....जीवेयम् .....अथवा म्रियेः .....कश्चित् कथं सर्वं ज्ञातुमिच्छति? मया समं कस्याऽपि किं प्रयोजनम्? अहं तु कस्यचिदपि जीवने क्वचिदपि हस्तक्षेपं न करोमि .....पुनः कथं सर्वेषां मानसे मद्विषये तथाविधा जिज्ञासा परिपृच्छा .....हस्तक्षेपभावना च?"

तदानीम् अहम् अनुभूतती यत् प्रायः सप्ततिवर्षात्मकस्य पितृतुल्यस्य वत्सलताप्रायस्य आवासस्वामिनस्तथाविधः साधारणप्रश्नोऽपि अपर्णायाः कृते तस्याः जीवने हस्तक्षेपसदृश इव प्रतिभाति स्म।

अतएव तथाविधायाः आत्मकेन्द्रितायाः स्वच्छन्दताप्रियायाः अपर्णायाः जीवनधारा कथं विवाहाऽभिमुखं प्रवृत्ता? तस्या जीवनं विवाहस्य चक्रे कथं निपतितम्? स को महानुभावो वर्त्तते यस्य हस्तक्षेपः सा स्वकीये स्वच्छन्दतामये निर्द्वन्द्वे जीवने स्वीकृतवती? किम् अपर्णाऽपि मादृशी एव गार्हस्थ्यकार्यं सम्पादयति स्म? किं तस्याः स्वातन्त्र्ययुक्तायां दिनचर्यायां विवाहाऽनन्तरं किमपि परिवर्त्तनं समागतं न वा?... इत्यादि प्रश्नानाम् उत्तरं ज्ञातुकामा एव अहं स्वपत्या श्रीराजीवलोचनेन

समं दिल्लीनगरे गन्तुं स्वीकृतिं प्रदाय यात्रार्थम् आवश्यकानि स्वकीयानि वस्तूनि व्यवस्थापयितुं समुद्यता अभूवम्।

मार्गे वार्तालाप-प्रसंगे अहं स्वपतिं श्रीराजीवलोचनम् अपर्णायाः स्वाभावस्य विचारस्य च विषये यदा सर्वं विस्तरेण प्रोक्तवती तदा तत्सर्वमाकर्ण्य सोऽपि कश्चिदाश्चर्यचकितो भूत्वा तद्विषये विशिष्टः कुतूहलयुक्तः संजातः। अस्तु, अन्यस्मिन् दिवसे वयम् अपर्णायाः गृहं प्राप्तवन्त एव।

परन्तु तत्र समागत्य त्वहम् अपर्णां विलोक्य पुनरेव स्तब्धा संजाता। वस्तुतः अपर्णायाः व्यक्तित्वे इदं परिवर्त्तनं निरूप्य अहं स्वयमेव आश्चर्यचकिता बभूव। विगतकालेषु दृष्टा तीव्रस्वभावसम्पन्ना दक्षतापरिपूर्णा उष्णस्वभावयुक्ता अपर्णा काचित् सामान्या भारतीया गृहिणी इव सुस्वभावसम्पन्ना कोमलवाग्व्यवहारा मृदुला शीतला च प्रतीयते स्म। तस्याः कटिप्रदेशे सुरुचिरतया समावेष्टिता शाटिका, शोभनवेणीसंयुक्तः केशविन्यासः, ललाटस्योपरि कुंकुमस्याभा, केशमध्ये स्पष्टतया परिलक्षिता सिन्दूररेखा.....सर्वमेवैतत् तस्याः प्राक्तन-स्वभाव-वैपरीत्यमेव द्योतयते स्म।

सा आवयोः पर्याप्तम् आतिथ्यं कृतवती। अस्मदीयः पतिः श्रीराजीवलोचनस्तु तां निपुणतया निरीक्ष्य वारं वारं मामेव घूर्णयते स्म। तस्य नयनानां भाषा यथा मां पृच्छति स्म यत् पश्य इमाम् अपर्णाम् यथा त्वम् एतस्याः विषये प्रोक्तवती आसीः तत्सर्वं तु कथमपि एतस्या विषये न विराजते ...! त्वं मां किम् उक्तवती .....? इयं च सा तथा कथमपि न वर्त्तते .....इति। तदानीं तु मत्पार्श्वे तस्य नयनानां प्रश्नस्य किमपि उत्तरं न बभूव।

अस्तु, अपर्णायाः पतिः कतिपयदिवसानां कृते तदानीं दिल्लीनगराद् बहिर्गतोऽभवत्। यद्यपि मम तु स्वपत्या श्रीराजीवलोचनेन सममेव अतिथिभवने (गेस्ट हाउस) एव निवासस्य कार्यक्रम आसीत् परन्तु अपर्णा मां स्वगृहे एव स्थातुम् अनुरोधं कृतवती। मयाऽपि विचारितं यत् राजीवलोचनस्तु सम्पूर्णे दिवसे स्वकार्यालयीयकार्यक्रमे एव व्यापृतो भविष्यति अहं च एकाकिनी तत्र समुद्विग्ना एव भवेयम् इति अपर्णया सममेव तस्या गृहे निवासः समुचित इति विचार्य तत्रैव संस्थिता। श्रीराजीवलोचनश्च तदनन्तरं स्वकार्यसाधनार्थं ततः प्रस्थितः।

श्रीराजीवलोचनस्य गमनाऽनन्तरमेव अहम् अपर्णायाः समक्षे प्रश्नानां वृष्टिं कर्तुं प्रारब्धवती-"किम्भो! किमेतत् सर्वम्? .....कथमेतत्? एतावत् त्वयि परिवर्तनं कथम्? अहं तु किमपि विश्वासमेव कर्तुं न पारये ....." इत्यादि।

मम प्रश्नसमूहान् समाकर्ण्य अपर्णा साट्टहासं हसितवती। तस्याः स पुरातनः निश्छलः बालसुलभः अट्टहासः बहुवर्षाऽनन्तरं मम कर्णयोः प्रवेशम्प्राप्तवान्। सा

प्रोक्तवती-"त्वम् अधुनैव तु समागता इति। किञ्चित्कालपर्यन्तं विश्रामं लभस्व धैर्यं च धारयस्व अहमपि तावत् किमपि गृहकार्यं साधयामि। त्वया त्वत्र दिल्लीनगरे दिनद्वयं स्थातव्यं वर्त्तते। सर्वाः वार्त्ताः शान्तेन मानसेन विस्रब्धभावेन च भविष्यन्ति। त्वम् एतावतीं व्याकुलतां कथं प्रकटयसि?" तदनन्तरम् अपर्णा किमपि निर्मातुमेव रसवतीं प्रविष्टवती।

अहमपि तदनुसरणं कुर्वती रसवत्याः कपाटसमीपे समागत्य तां पृष्टवती-

"किं भो! किं पाचयसि?"

"किञ्चिद् दक्षिणभारतीयं भोजनविशेषम्-इडलीम् उपमां (लवणयुक्तां यवागूं) च" सा प्रत्युक्तवती।

"अहो! सुन्दरमेव तत्, परन्तु साम्प्रतं मे किमपि भोजनस्य काचिदपि इच्छा न वर्त्तते। प्रातःकालीनेन जलपानेनैव मम उदरः परिपूर्णो वर्त्तते।" अहम् अपर्णां प्रोक्तवती।

"अरे! तुभ्यम् अधुना कः प्रददाति? एतत् सर्वं त्वहं प्रतिवेशिन्यै अनुराधायाः कृते सम्पादयामि। सा सम्प्रति गर्भावस्थायां वर्तते। सप्तमोऽयं मासस्तस्याः। साम्प्रतं तस्याः मनसि नानाविधानां विविधभोज्य-पदार्थानाम् आस्वादने भोजने च प्रवृत्तिः समुदेति। परन्तु परिस्थितिवशात् सा स्वयं रसवत्यां प्रविश्य किमपि विशिष्टं मनोनुकूलं पाचयितुं निर्मातुं च नितान्तमसमर्था वर्तते। ह्यस्तने दिवसे एव तया एतदेव भोक्तुं स्वाभिलाषः प्रकटितः, अत एव मया एतद्भोज्यनिर्माणे समुत्साहः प्रकटितः। विचारये यत् तदर्थं पूर्वसूचनां विना अकस्मादेव प्रदाय आश्चर्यचकितां विधास्यामि" ...-अपर्णा प्रावोचत्।

अपर्णायास्तदेतत् सर्वं वाक्यं समाकर्ण्य मम मानसे पुनरेव आश्चर्यं समुदितम्। इयमेव सा अपर्णा या प्रतिवेशिभिः समाचारेऽपि पृष्टे क्षोभभावं धारयति स्म, रुचिकरं न मन्यते स्म, सैव साम्प्रतं तेषां कृते विशिष्टं भोजनं निर्माय तान् आश्चर्यचकितान् विधातुं कामयते स्म? अहं तु तत्सर्वं दृष्ट्वा विश्वसितुमपि असमर्था। अहं तस्याः ललाटस्योपरि स्वकीयं पाणिं निधाय अभिनयं कुर्वाणा पृष्टवती-

"किं त्वं स्वस्था तु वर्त्तसे? तव स्वास्थ्यं तु समीचीनं प्रतिभाति"?

"ओह! अपसर .....त्व मां किं मन्यसे? अहं सा पूर्ववर्तिनी अपर्णा वस्तुतः नैव भवामि। अहं पूर्णतया परिवर्तिता संजाता।"-सा विहस्य स्वललाटात् मम पाणिं पृथक्कुर्वती प्रत्यवोचत्।

"तत्तु अहं स्वयमेव पश्यामि। परन्तु एतावत् परिवर्त्तनं त्वयि, कथं सम्पन्नम्? अहं तु किमपि विचारयितुमपि न शक्नोमि। वस्तुतः तत्सर्वं ज्ञातुमेव त्वहमत्र त्वत्पार्श्वे दिल्लीनगरे समागता।"-अहं स्वकीयां जिज्ञासां प्रकटितवती।

"तत्सर्वं त्वहं पश्चात् कथयिष्यामि। पूर्वं त्वहं स्व–प्रतिवेशिन्यै अनुराधायै एतत् सद्योनिर्मिताम् उपमाम् इडलीं च प्रदाय प्रत्यागच्छामि"–इति प्रोच्य अपर्णा तानि भोजनजातानि प्रदातुं प्रस्थितवती। प्रायः अर्धघण्टाऽनन्तरमेव यदा सा प्रतिनिवृत्ता तदा तस्याः मुखमण्डले प्रसन्नतायाः आत्मसन्तोषस्य च भावाः स्पष्टतया परिलक्ष्यन्ते स्म।

"मन्ये तव प्रतिवेशिनी अनुराधा इडलीम् उपमां च अत्यन्तं रुचिपूर्वकं भुक्तवती" अहं तां प्रात्यागतां विलोक्य पृष्टवती।

"एवं .....सा अत्यतं हृष्टमानसा भूत्वा वारं वारं मह्यं धन्यवादं प्रोक्तवती। मम मानसं तु तस्या हर्षमिश्रितम् आननं विलोक्यैव तृप्तितां प्राप्तम्। सत्यम्, अन्येभ्यः किमपि हितकरं विधाय प्रसन्नतां वा प्रदाय कियत् सुखं प्राप्तुं शक्यते इति त्वहं बहुविलम्बेन ज्ञातवती ....." इत्येवं कथयन्त्याः अपर्णाया नयनेषु विचित्रभावयुक्तं शून्यत्वं समुद्भूतम्। सा आकाशे निरूपयन्ती यथा अतीतकालस्य किमपि ध्यायं ध्यायं विचारमग्नेव संजाता। पुनः विचारमग्नतां परित्यज्य किञ्चिद् विराममिव कुर्वाणा यथा वर्तमानकाले सम्प्रविश्य पुनः माम् प्रोक्तवती–"अस्तु, त्वं स्वकीयं किमपि श्रावय वृत्तान्त–कदम्बकम्"।

"पश्य मम धीरतायाः अधीरतायाः वा इतोऽधिकां परीक्षां मा कुरुष्व" अहं प्रोक्तवती।

"किं तात्पर्यम्?' अपर्णा मन्दं विहस्य पृष्टवती।

"तात्पर्यम् एतत् यदहं तव जीवनदैनन्दिन्याः प्रत्येकं पृष्ठं पठितुमिच्छामि। इतः पूर्वं यदा त्वं त्रिवर्षपूर्वं मिलितवती तदा त्वम् एवंविधा तु कथमपि नाऽऽसीः। तदानीं तव जीवनशैली तु काचिद् अन्यरूपात्मिका एव प्रतीयते स्म। परन्तु अहमद्य एतज्ज्ञातुं कामये यत् तव जीवने तथाविधं किं तावद् घटितं यत् साम्प्रतम् एतत् आश्चर्यकरं परिवर्तनं तव जीवनपद्धतौ लक्ष्यते?" अहं स्वकीयां शङ्कामिश्रिताम् उत्सुकतां स्पष्टतया प्रकटितवती।

"ओह! त्वमेतत् सर्वं विज्ञातुकामा वर्तसे?" अपर्णा किञ्चिद् विस्मित्य पुनः शान्ता भूत्वा दीर्घं च निःश्वस्य काञ्चिद् गम्भीरतामालम्ब्य एवम् अग्रे वक्तुम् आरब्धवती–"विगतवर्षस्यैव एष वृत्तान्तः। अहं स्वकीयां प्राक्तनां भृतिं विहाय एकमन्यत् भृतिकार्यं लब्धवती। अत एव स्वकीयम् आवासगृहमपि क्वचित् नवीनकार्यालयस्यैव समीपे मार्गयामि स्म। अन्ततः काठिन्येन एकं गृहं कथञ्चिद् उपलब्धमेव। तत्र अधिकांशतो मध्यमवर्गीयाः निम्नमध्यमवर्गीयाश्च परिवाराः निवसन्ति स्म। ते सर्वे प्रायः परस्परस्य दैनन्दिनसमस्यानाम् अभिज्ञा आसन्। कः कुत्र गच्छति? .....कदा वा गच्छति? कः अस्वस्थो वर्तते? .....केन नवीनं नियोजनं

कार्यम् उपलब्धम्?.....को वा वृत्तिविहीनः संवृत्तः? .....कदा कस्य विवाहः?.....को दिवंगतः?".....इत्यादि।

त्वं तु जानास्येव यदहम् एवंविधाभिः वार्तासंहतिभिः कियतीं समुद्विग्नतां धारयामि स्म, न चैतत् सर्वं कदाचिदपि मह्यं रोचते स्म। स्वकीयनिवासस्वामिना सार्धमपि अहं रूक्षतापूर्वकमेव वर्तयामि स्म। न चेदमहं कदापि वाञ्छामि स्म यत् स मदीयदैनिककार्येषु कदाचिदपि किमपि वा प्रश्नाऽप्रश्नं प्रकुर्वीत।

अस्तु, मम समीपस्थे सम्बद्धे निवासगृहे (फ्लैट) कश्चिदेकः अवकाशप्राप्तो दम्पती प्रतिवसति स्म। पितृव्या (वृद्धपुरुषस्य पत्नी ऑन्टी वा) प्रायशः मम कार्यालय-गमन-काले द्वारैकदेशे स्थिता दृश्यते स्म। सा प्रायः मया समं वार्तां कर्तुं कामयते स्म परन्तु अहं सदैव ताम् प्रति उपेक्षाभावं धारयन्ती यथाशक्यं काममपि वार्तामकुर्वाणा सद्य एव कार्यालयम्प्रति प्रतिष्ठे स्म।

अथैकदा अहं गृहे वर्तमाना अत्यन्तं तीव्रेण ज्वरेण संग्रस्ता अभूवम्। स्वकीयपर्यङ्के एव निषण्णा उत्थातुमप्यशक्ता किमपि कर्तुं कुत्रचिद् वा गन्तुं न प्राभवम्। मम निवासगृहस्य (फ्लैट) बहिरेव द्वारदेशे समाचारपत्राणां दुग्धपैकटानां च सद्भावेन ताभ्यां वृद्ध-दम्पतीभ्याम् अनुमानितं यत् सम्भवतः अहं तथाविधा अत्यन्तम् अस्वस्था रुग्णा वा भवामि यत् स्वकीयं दुग्धं समाचारपत्रादिकमपि वा बहिरागत्य नेतुं न प्रभवामि। तत्सर्वं निरीक्ष्य ताभ्यां यथाकथंचित् द्वारमुद्घाट्य मां भीषणरूपेण ज्वरग्रस्तां विलोक्य चिकित्सासाहाय्यं प्रदत्तम्। पितृव्यमहोदया (आन्टी) तु प्रायः सप्ताहपर्यन्तं च मयि मातृवद् विशेषध्यानं दत्वा मम स्वस्थताप्रदाने सर्वविधं साहाय्यं कृतवती। पुनरपि सा यथावसरं मत्कृते किमपि निर्माय भोजनकाले प्रयच्छति स्म। कदाचित् मत्पार्श्वे एव स्थित्वा वार्तालापं कुरुते स्म। वस्तुतः तस्या व्यवहारः सर्वथा मत्कृते आत्मीयतापरिपूर्ण आसीत् तद्द्वारा प्रोक्तं "पुत्रि!" इति सम्बोधनमपि मह्यम् अत्यन्तं रोचते स्म।

परन्तु पुनः ते एव प्रश्नाः .....तथैव च प्रश्नारम्भाः .....तथैव च उपदेशाचाराः .....कुत्र कार्यं कुरुषे? .....किं कार्यं कुरुषे? .....अन्ये पारिवारिकाः कुत्र वर्त्तन्ते? .....के के वर्त्तन्ते? .....विवाहं कथं न करोषि? .....युवतीनाम् एवम् अविवाहित-जीवनं न समीचीनम् .....इत्यादि। तत्सर्वं श्रावं श्रावम् अहं पुनः समुद्विग्नताग्रस्ता भवितुं प्रारब्धवती। मम हृदये तां प्रति पुनः क्षोभभावः प्रादुर्भवितुं प्रारब्धः। तदनन्तरमहं तां दृष्ट्वाऽपि अदृष्टामिव मत्वा व्यवहारं कर्तुं प्रारब्धवती। यदा सा कदाचित् मम निवासगृहे (फ्लैट) आगच्छति स्म तदापि गुप्तच्छिद्रेण (स्पाइ होल) तां विलोक्य स्वकीयं द्वारमेव कदाचित् न समुद्घाटितवती। सा त्विदमेव मन्यते स्म यदहं गृहे न भवामि। एवमेव तां प्रति मम उपेक्षाभावः प्रवर्तते स्म।

अथ एकदा रविवासर आसीत्। अहं प्रातःकालादेव आरामुद्रायाम् आसन्दिकायाम् उपविश्य समाचारपत्रपठने निमग्ना अभूवम्। तदानीमेव पूर्वं द्वारस्थिताया विद्युद्घटिकाया नादः प्रारब्धः किञ्चित्कालानन्तरं च गृहकपाटे कस्यचित् हस्तप्रहारध्वनिरपि प्रादुर्भूतः। मया चेदं विचारितं यत् कस्तया समं प्रातःकाल एव स्वकीयं समयं हापयेत्। को वा तस्या व्यर्थम् उपदेशं श्रोतुं रुचिं कुर्यात्? इति तस्मादेव मया किञ्चिद् विचार्य स्वकीयः कपाटो न समुद्घाटितः। सा कतिचित् कालपर्यन्तं कपाटे ध्वनिं विधाय पुनः मन्ये तत इति विचार्य प्रस्थिता यदहं संभवतः गृहे न भवामि। तस्मिन् दिवसे चाऽहं प्रातःकालीनं सर्वं कार्यजातं निष्पाद्य भोजनादिकं च विधाय मध्याह्ने सानन्दं सुप्तवती।

सायंकाले च यदा क्वचिद् गन्तुं गृहाद् बहिर्निःसृता तदा अस्मदीयाऽऽवासभवनानां परिरक्षकः (वाचमैन) मां विलोक्य पृष्टवान्–"मैडम भवत्समीपस्थ–निवासगृहस्य महोदयानां कः समाचारः?"

"कथं किमभवत् तेषाम्?" अहं साश्चर्यं पृष्टवती।

"अरे! किं भवती न जानाति? प्रातःकाले एव तत्र ये वृद्धपुरुषाः निवसन्ति ते महता हृदयाघातेन पीडिताः संजाताः। अत्यन्तं दारुणावस्थायां ते चिकित्सालयं प्रापिताः .....प्रतीयते यत् तेषाम् अन्तिमः श्वास एव प्रचलति .....न जाने तेषां किं सम्पन्नम्? .....अहं तु इदमेव विचारयामि स्म यद् भवती तेषां समीपस्था फ्लैटनिवासिनी वर्तते अत एव संभवतस्तद्विषये जानाति, तस्मादेव च पृष्टमासीत्।"

आवास–भवानानां परिरक्षकस्य (वाचमैन) तत्सर्वं वचनं निशम्य माम् एवं प्रतीयते स्म यथा मम पादयोरधस्ताद् धरा एव विचलिता बभूव। ओह! तत्क्षणमेव मया विचारितं यत् तदानीं संभवतः सा वृद्धा पितृव्या एव मदीयं साहाय्यं ग्रहीतुकामा मम कपाटे ध्वनिं प्रकरोति स्म। परन्तु मयैव तदानीम् उपेक्षाभावं धारयन्त्या कपाटो न समुद्घाटितः। तदनन्तरं किञ्चिद् विचार्यैव स्वकीये स्वार्थमये कर्मणि मम अन्तरात्मा मां धिक्कर्तुम्प्रारब्धवान्। अस्तु, कथंचित् इतस्ततः पृष्ट्वा किञ्चित्काठिन्येन च चिकित्सालयस्य संकेतं विज्ञाय यथाकथञ्चिदहं यदा चिकित्सालयं प्राप्तवती तदा दृष्टवती यद् वृद्धस्य पितृव्यमहोदयस्य तु देहान्तः समभवत्। सा मातृकल्पा वृद्धा पितृव्या पूर्णतया असहायावस्थायाम् एकाकिनी एव तदानीं पितृव्यमहोदयस्य पार्थिवशरीरस्य सन्निकटे विलापं प्रकुर्वाणा तिष्ठति स्म। तदानीं सा वृद्धा याभ्यां नेत्राभ्यां मां दृष्टवती तदहं साम्प्रतमपि विस्मर्तुं न शक्नोमि।

वृद्धा पितृव्यमहोदया (ऑन्टी) तदानीं चिकित्सालयस्य औपचारिकतायाः सामान्य–प्रक्रियायामेव समुद्विग्ना बभूव। स्वपत्युर्निधनाऽनन्तरं कस्याश्चिदपि एकाकिन्याः

महिलायाः का मनोदशा भवतीति केवलं कल्पयितुमेव शक्यते। अहं चिकित्सालयस्य सर्वस्मिन् औपचारिकताकर्मणि तस्याः यथाशक्यं साहाय्यं विधाय तदानीम् आत्मानं कथमपि सन्तोषयाञ्चकार। तयोः वृद्धदम्पत्योः काचित् सन्ततिः नाऽभूत्। दूरस्थसम्बन्धिनां समाह्वाने सम्पर्केऽपि च सा प्रतिषेधं कुर्वन्ती प्राह–"यदा जीवितावस्थायां कश्चित् किमपि न पृष्टवान् तदा तस्मिन् दिवंगते संजाते एव कथं कस्यचिदपि कृतज्ञतां धारयेयम्?" अन्ततः वृद्धपितृव्यस्य दाहसंस्कारः विद्युत्–शव–दाहगृहे सुसम्पन्नः।

अहं तु स्वहृदये स्वकीयस्याऽपराधबोधस्य भारं समुद्वहन्ती प्रायः सप्ताहपर्यन्तं तया सममेव समयं यापितवती, तस्याः सर्वविधां दैनन्दिनीं व्यवस्थां च सम्यक्तया सम्पादितवती। वार्तालापप्रसंगे एकदा सा माम् उक्तवती यत् यदा तव पितृव्यस्य हृदयाघातपीडा समुद्भूता तदानीं दुर्भाग्यात् तदीयं दूरभाषयन्त्रं निष्क्रियं बभूव। तदानीं सा मम द्वारदेशे सहायतायाचनार्थमेव गतवती आसीत्। तया विचारितमासीद् यन्मम दूरभाषः सक्रियो भवेत् अथवा अहं स्वकीयस्कूटीयानद्वारा एव कथंचित् गत्वा कमपि चिकित्सकं सूचयेयम्, अथवा किमपि टैक्सीयानमाहूय चिकित्सालयप्रापणे तस्याः सहायतां कुर्याम्। परन्तु तस्याः दुर्भाग्यमेव आसीद् यत् अहं तदानीं गृहे समुपस्थिता नाऽभूवम्। अस्तु,यथोचितसमये चिकित्साप्रापणाऽभावात् एव तस्याः पितृव्यः दिवंगतः। चिकित्सकः कथयति स्म यद् यदि पञ्चदशमिनटपूर्वम् असौ चिकित्सालये प्राप्स्यत् तर्हि तस्य जीवनरक्षा समभविष्यत्। अस्तु नियतिं को निवारयितुं शक्नोति। यद् भावि तत्तु सम्भूतमेव साम्प्रतम् .....इति।

किञ्चित्कालं विरम्य दीर्घं च निःश्वस्य अपर्णा पुनरेव अग्रे स्वकीयं वृत्तान्तं वक्तुमारब्धवती–"वृद्धायाः पितृव्यायाः (ऑन्टी) तद्वचनं समाकर्ण्य अहं तां किम् अकथयिष्यम्? कथमेतत् अकथयिष्यं यत् तस्यास्तस्मिन् कष्टमये काले अहं स्वगृहे एव तिष्ठामि स्म परन्तु क्षणिकस्वार्थवशात् आत्मकेन्द्रिता भूत्वा कपाटस्योद्घाटनं न कृतवती। संभवतः मम उपेक्षाकारणादेव तस्याः पतिः कालकवलितः संजातः।" इत्येवं कथयन्ती अपर्णा सबाष्पकण्ठा भूत्वा तूष्णीं बभूव।

अपर्णाया आत्मवृत्तान्तं निशम्य अहमपि स्वकीयनयनाभ्याम् अश्रुपातं निरोद्धुम् असमर्था संजाता। पुनः किञ्चिद् विरम्य साऽब्रवीत्–"अहं किं कथयेयम् अंकिते! अद्यतन–पर्यन्तमहं स्वकीयस्कन्धेषु तस्यैव अपराधबोधस्य भारं वोढुं विवशा भवामि। सा वृद्धा पितृव्या (ऑन्टी) यावत्कालपर्यन्तं प्रतिवेशिनीरूपेण स्थिता तावत्पर्यन्तं सा मामेव स्वकीयां सर्वाधिकां हितैषिणीं निकटतमां च मन्यते स्म। परन्तु मया तया समं किमाचरितम्? तत्सर्वमेव वारं वारं चिन्तयित्वा मम मनः सदैव दुःखमेव अनुभवति।"

"एवं न कथयस्व अपर्णे! त्वं तदा किं जानासि स्म यत् सा तदानीं किंविधे दुःखमये आपद्ग्रस्ते च काले वर्तते?" अहम् अपर्णां सान्त्वयन्ती प्रोक्तवती।

"एतस्यैव तु महद्दुःखं वर्तते अङ्किते! आपदस्तु कस्यापि समीपे पूर्वं सूचनां दत्वा नैव समागच्छन्ति। परन्तु यदा सा माम् आत्मीयां विज्ञाय मम सहायतां प्राप्तुकामा मम द्वारदेशे समागता तदानीम् अहमेव स्वयं तस्यै स्वसमीपे समागमनस्य अवसरमेव न प्रदत्तवती। तद्दिवसाऽनन्तरं तु सा कदापि मम गृहे न समागतवती। मम कर्णविवरेषु साम्प्रतमपि तत्कृता खट्खटायमाना कपाटध्वनिः प्रविशन्निव विभाति। तत्कृतेन कपाटध्वनिना मम जीवनस्य दर्शने चिन्तने च सहसैव महत् परिवर्तनं समुत्पादितम्। येषां सामाजिकमूल्यानामहम् उपहासं करोमि स्म तेषामेव गहनः अर्थावबोधः साम्प्रतम् मम हृदयस्याऽन्तस्तले सम्प्रविष्टः। शनैः शनैरहम् प्रतिवेशिजनानां कृते उपेक्षाभावं परित्यक्तवती। आत्मकेन्द्रितां स्वार्थवृत्तिं च परित्यज्य परार्थभावनामपि मानसे किञ्चित् प्रवेशितंवती। इदमपि चाऽनुभूतवती यत् परस्परस्य सुख-दुःखेषु गमनाऽऽगमनेन अन्योन्यस्य हितचिन्तनेन निःस्वार्थभावपूर्वकं परोपकारकरणेन च जीवनं रसमयमेव प्रवर्त्तते।"-अपर्णा मन्दस्वरेण प्रत्युक्तवती।

"अथ विवाहस्य विचारस्तव मानसे कथं समागतः? त्वं तु विवाहं स्वतन्त्रताबाधकं पराधीनता-प्रदायकम् अर्गलायुक्तम् अस्वाभाविकं च मन्यसे स्म?"-अहम् पुनः अपर्णाम् पृष्टवती।

"तेष्वेव दिवसेषु मम साक्षात्कारः श्री राजीवलोचनेन समं संबभूव। ममैव कार्यालये तस्य नवीनं पद-स्थापनम् आसीत्।यद्यपि प्रथमदर्शनेन तु स सामान्य एव प्रतिभाति स्म, परन्तु तस्य उदात्तविचारैः परोपकारादिवृत्तिभिश्च अहं नितरां प्रभाविता आसम्। एवम् आवां काञ्चित् सन्निकटतामधिगम्य परस्परस्य च विचारसाम्यमाध्याय सहसैव विवाहबन्धने सुसम्बद्धौ बभूविव। साम्प्रतमहं स्वकीयगार्हस्थ्यस्य सामाजिक-दायित्वे चिन्तने च पर्याप्तं निरता भवन्ती सुखम् अनुभवामि। परन्तु मम हृदये तया वृद्धप्रतिवेशिनीद्वारा कृतम् अन्तिमम् आह्वानं तथाविधं प्रविष्टमिव वर्तते यत् कथमपि हृदयात् नैव निःसरति। तत्तु कण्टकाग्रभाग (फांस) इव सदैव पीडयतितराम्।" इत्येवम् प्रत्युच्य अपर्णा पुनरेव रुद्धकण्ठा प्रावर्तत।

अहम् अपर्णायाः पाणिं स्नेहेन गृहीत्वा सम्पीडितवती। इमे द्वि-त्रिदिवसाः दिल्लीनगरे कथं व्यतीताः एतत्तु मया कदाचिद् अवगतमेव न हि। आवां पर्याप्तं परस्परं प्राचीनाम् बाल्यकालीनान् वृत्तान्तान् स्मारं स्मारं मधुरं कटुकं च अनुभवं साधयन्त्यौ सुखेन समयं व्यतीतं कृतवत्यौ। परन्तु अपर्णायाः हृदयात् तदन्तिमस्य समाह्वानस्य पीडायाः व्यथाकण्टकं निःसारयितुमहं नितराम् असमर्था एव संजाता।

***